दूल्ह कुंवर तरफथी भेट.

श्रीमद्वल्लभाचार्यग्रन्थरत्नमालायां ग्रन्थरत्नाङ्कोऽष्टमः ।

श्रीमदखण्डभूमण्डलाचार्यवर्यश्रीकृष्णवदनविरहवैश्वानरावतार-
श्रीश्रीमद्वल्लभाचार्यद्वैतीयीककुमारश्रीश्रीमद्विट्ठलेश्वर-
प्रभुचरणैर्निजपितृचरणनाम्ना प्रादुर्भावितः

अखण्डशुद्धाद्वैतब्रह्मवादशुद्धपुष्टिमार्गप्रतिपादनपरः
पेटलादस्थेच्छारामभट्टाविर्भावितप्रदीपसमलङ्कृतः


श्रीमद्ब्रह्मसूत्राणुभाष्ये

द्वितीयस्तवकः ।

श्रीभृगुकच्छस्थगणपतितनुजनुषा 'एम्. ए.,' इत्यादिपदभाजा
शास्त्रिमन्नलालशर्मणा
निश्शुल्कं संशोध्य
पाटणस्थशाहोपनामनगीनदासात्मजेन श्रीमद्वैष्णवपरिषद्विद्याविभागमन्त्रिणा
'बी. ए., एल्एल्. बी.' इतिपदभाग्वाडीलालेन
मुम्बापुर्यां
निर्णयसागरयन्त्रालये मुद्रयित्वा प्राकाश्यं नीतः ।

श्रीमद्वल्लभाब्दः ४४८. वैक्रमसंवत् १९८२.

मूल्यं मुद्रा ।



Published by Vadilal Nagindas Shah, B. A. LL. B., 3rd Bhoiwada Bhuleshwar, Bombay.

Printed by Ramchandra Yesu Shedge, at the Nirnaya Sagar Press,
26-28, Kolbhat Lane, Bombay.

॥ विज्ञापनम् ॥

अचिरेणैव प्राकाश्यं नेष्यते फलाध्यायात्मकस्तृतीयः स्तवकः सुविस्तृतपरिचायकेन विविधैः परिशिष्टादिभिश्च परिष्कृतः ।

श्रीमद्वल्लभाचार्याखण्डशुद्धाद्वैतब्रह्मवादोपयुक्तेषु संस्कृतमुद्रितपुस्तकेषु केषाञ्चिन्नामानि

मूल्य मार्गव्ययरहितम् ।

		रु०	आ०	पै०
१.	ॐगायत्रीभाष्यम् ।	०	४	०
२.	तैत्तिरीयोपनिषद्भाष्यम् ।	१	०	०
३.	छान्दोग्यप्रथमाध्यायभाष्यम् ।	०	८	०
४.	माण्डूक्योपनिषद्दीपिका ।	०	८	०
५.	नृसिंहोत्तरतापिनीदीपिका ।	०	८	०
६.	ॐश्रीमद्भगवद्गीता तत्त्वदीपादिसहिता ।	०	१२	०
७.	,, अमृततरङ्गिणीसहिता ।	२	०	०
८.	ॐशाण्डिल्यभक्तिसूत्रभाष्यम् ।	०	८	०
९.	जैमिनिसूत्रभावार्थपादभाष्यं सविवरणम् ।	०	८	०
१०.	ब्रह्मसूत्रपाठः पाठान्तरसहितः ।	०	४	०
११.	श्रीमद्ब्रह्मसूत्राणुभाष्यं मूलमात्रम् ।	३	०	०
१२.	,, सप्रकाशम् ।	२२	८	०
१३.	,, त्रिसूत्रीसाहित्यमात्रम् ।	२	०	०
१४.	,, पाठकशास्त्रिटीकायुतम् ।	६	४	०
१५.	,, ॐसप्रदीपं स्तवकद्वयात्मकम् ।	३	०	०
१६.	सप्रकाशरश्मितृतीयाध्यायपादत्रयमात्रम् ।	४	०	०
१७.	ब्रह्मसूत्रभावप्रकाशिकावृत्तिः ।	३	०	०
१८.	,, मरीचिकावृत्तिः ।	२	०	०
१९.	अधिकरणमाला ।	१	०	०
२०.	ॐअधिकरणसङ्ग्रहः ।	०	४	०
२१.	श्रीसुबोधिनीप्रथमस्कन्धः ।	२	०	०
२२.	,, ,, प्रकाशः ।	१	०	०
२३.	,, द्वितीयस्कन्धः ।	२८	०	०
२४.	,, तृतीयस्कन्धः सप्रकाशः ।	५	०	०
२५.	,, दशमस्कन्धजन्मप्रकरणं सप्रकाशम् ।	४	८	०
२६.	,, ,, ,, सर्वसाहित्यसहितम् ।	५	०	०
२७.	,, ,, फलप्रकरण लेखसहितम् ।	३	०	०
२८.	,, ,, ,, प्रकाशः ।	१	०	०
२९.	,, ,, ,, योजना ।	०	८	०



ननु स एवायमित्यतिदेशेपि तथाबुद्धिः सम्पद्येतैवेति व्यर्थो धर्मातिदेश इत्याशङ्क्य तथोक्तेपि समानधर्मत्वज्ञानाभावे हेतुमाह,

स्थानविशेषात् प्रकाशादिवत् ॥ ३४ ॥

स्थानविशेषादिति, धर्म्यैक्येपि स्थानविशेषप्राप्त्या समानधर्मत्वाभावो दृश्यते, अन्यत्रापि न तथात्वमायास्यतीत्यतिदेशो धर्माणामपि कृत इत्यर्थः, अस्मिन्नर्थे दृष्टान्तमाह प्रकाशादिवदिति, "यदादित्यगतं तेजः" (श्रीमद्भग. १५. १२.) इतिवाक्यादादित्यचन्द्राग्निगततेजसामैक्येपि न समानप्रकाशत्वं यथा तथात्रापीतिज्ञानसम्भवादित्यर्थः, आदिपदादेकस्यैव कालस्य यथोपाधिविशेषसम्बन्धादुत्तरायणत्वाद्युत्तमधर्मवत्त्वं तद्विपरीतधर्मवत्त्वं तथेत्यपि सङ्गृह्यते ॥ ३४ ॥

किञ्च,

उपपत्तेश्च ॥ ३५ ॥

सत्यज्ञानाद्युक्तधर्मविशिष्टब्रह्मणोन्य उत्तमोस्तीति वदता तत्रेत उत्कृष्टधर्मवत्त्वं वाच्यं, तच्चाशक्यं, प्रमाणाभावात्, साम्येपि तथा विशेषाभावोद्वैतश्रुतिविरोधश्च, तस्मादितः परस्यानुपपन्नत्वादुक्तरूपमेव परमकाष्ठापन्नं वस्त्वित्युपपद्यत इत्यर्थः ॥ ३५ ॥

तथान्यप्रतिषेधात् ॥ ३६ ॥

यथा सेत्वादयः श्रुत्योक्तास्तथैव "न तत्समश्चाभ्यधिकश्च दृश्यते" (श्वेता. ६.८.) इति श्रुत्यैव ततोधिकस्य प्रतिषेधात् त्वयाप्यस्मदुक्तप्रकारोनुसर्तव्य इत्यर्थः, अवतारकाले पूर्वं स्वशक्त्याविर्भावमकृत्वा पश्चात्तदाविर्भावे कृते लोकानां पूर्वावस्थातो भगवत्येवाधिक्यमिव प्रतीतं भवतीत्यभिप्रायेणान्यपदोपादानम् ॥ ३६ ॥

स्थानविशेषात् प्रकाशादिवत् ॥ ३४ ॥ इत आरभ्य श्रीमद्गोस्वामिचरणानां लेखो बोध्यः । तथाबुद्धिः उत्कर्षबुद्धिर्धर्म्यतिदेशेनेत्यर्थः, तथोक्तेपि धर्म्यतिदेशोक्तावपि, समानधर्मत्वाभावः सकलधर्मिगतैकस्यैव धर्मस्य समानत्वाभावः, अन्यत्र स्फटिकादौ वक्ष्यमाणदृष्टान्ते तेजसि च, न तथात्वं न धर्माणां समानत्वम् ॥ ३४ ॥

उपपत्तेश्च ॥ ३५ ॥ 'सत्यं ज्ञान'मित्यादिना प्रतिपादितादन्य उत्कृष्टो नेत्यत्र सूत्रद्वयेनोपपत्तिमाह सूत्रकार इत्याहुः किञ्चेत्यादिना, तत्र एतदपेक्षयोत्कृष्टत्वेनाङ्गीकृते, इतः 'सत्यं ज्ञान'मित्यादिनोक्तात्, विशेषाभावः इत उत्कृष्टधर्मसत्त्वे विशेषाभाव इत्यर्थः ॥ ३५ ॥

तथान्यप्रतिषेधात् ॥ ३६ ॥ तत् सेत्वादिधर्मवान्, ततः उक्तधर्मवतः, अस्मदुक्तप्रकारः 'सत्यं ज्ञान'मित्यादिनोक्तधर्मवतो ब्रह्मत्वस्वीकारः, पूर्वं अवतारात्पूर्वं, स्वशक्त्या स्वसामर्थ्येन, आविर्भावं धर्माविर्भावं, पूर्वावस्थातः अनवतारावस्थातः, भगवत्येव अवतारावस्थापन्ने पूर्वस्मिन्नेव, आधिक्यमिव पूर्वं सर्वं भगवति स्थितमेवाविर्भूतमिदानीमिति इवशब्दः, अन्यपदोपादानमिति, तथा च 'न तत्सम'इतिश्रुत्यान्यप्रतिषेधात् तथा पूर्वरूपमेवमितिसूत्रार्थ इत्यर्थः ॥ ३६ ॥

---

१. न समानधर्मत्वमिति कपुपैगोपुस्तकेषु न समानधर्मवत्त्वमिति बपुस्तके । २. अन्यत्रेत्यत्रापीति पैगोपापुस्तकेषु । ३. आदित्यचन्द्राग्निगते इति कपुस्तके । ४. तत्रापीतीति कैपुस्तके । ५. धर्मत्वमिति वपापुस्तकयोः । ६. तथेत्यत्रापीति कैगोपुस्तकयोः । ७. अद्वैतविरोधश्चेति पुपुस्तके । ८. दित.परस्या इत्येतान्यक्षराणि लुप्तानि पुपुस्तके । ९. श्रुत्युक्ता इति वपापुस्तकयोः । १०. अस्मदुक्तमार्ग इति पैपुस्तके अस्मदुक्त एव मार्ग इति कपुबगोपापुस्तकेषु । ११. कृत इति वपापुस्तकयोः ।

प्रकरणमुपसंहरन् फलितमर्थमाह,

अनेन सर्वगतत्वमायामशब्दादिभ्यः ॥ ३७ ॥

अनेन सेत्वादिव्यपदेशानां मुख्यार्थकत्वनिराकरणेन व्यापकत्वं ब्रह्मणः सिद्धमित्यर्थ इति केचित्, तन्न, "जन्माद्यस्य यतः" (ब्र. सू. १.१.२.) इत्यादिना सर्वदेशगतकार्यकर्तृत्वमुक्तमिति तेनैव व्यापकत्वस्य सिद्धत्वात्, न चाविरोधसाधनप्रकरणत्वात् पूर्वं सिद्धं सर्वगतत्वमनेनोक्तग्रन्थेन कृत्वा सेत्वादिवाक्यैः सममविरुद्धमित्यर्थ इति वाच्यं[3]मितिचेदग्रिमपदवैयर्थ्यापत्तेः, अत्रैवं ज्ञेयं, नोक्तकर्तृत्वेन व्यापकत्वमेकान्ततो ब्रह्मणि रोद्धुं शक्नोति, योगसिद्धदूरश्रवणादिवत् परिच्छिन्नेनाप्यनेकदेशगतकार्यकरणसामर्थ्यविशेषस्य वक्तुं शक्यत्वात्, अन्यथा पूर्वसिद्धव्यापकत्वविरोधेन सेत्वादिव्यपदेशैः परिच्छिन्नत्वेन ब्रह्मणोन्यस्य परत्वं न शङ्केत, विरोधपरिहाराय तु सामान्यात्त्वविरोध इति वदेत्, तस्मादेवं सूत्रार्थो ज्ञेयः, अनेन ब्रह्मणोन्यस्य परत्वनिरासेन आयामशब्दादिभ्यः व्यापकत्ववाचकश्रुतिवाक्यादिभ्यः साक्षात्सर्वगतत्व[6]प्रतिपादकेभ्य एवं सर्वगतत्वं सिध्यति न तु गौतमीयानामिव कर्तृत्वाद्यनुपपत्त्येत्यर्थः, ते च शब्दाः "आकाशवत् सर्वगतश्च नित्यः" "ज्यायान् दिवो ज्यायानाकाशात्" (छान्दो. ५. १४. ३.) "वृक्षइव स्तब्धो दिवि तिष्ठत्येकस्तेनेदं पूर्णं पुरुषेण सर्वम्" (तै. आ. १०. १०. ३.) इत्यादयः, आदिपदात् "सर्वतःपाणिपादान्तं सर्वतोक्षिशिरोमुखं सर्वतःश्रुतिमल्लोके सर्वमावृत्य तिष्ठति" (श्रीमद्भग. १२. १३.) इत्यादिस्मृतयः सङ्गृह्यन्ते, अनेन ब्रह्मणि श्रुतिरेव मुख्यं प्रमाणं, अनुमानं तु विलम्बोपस्थितिकत्वेन साध्यसिद्धिपराहतमपीच्छाविशेषेण जननीयं चेदभ्युच्चयमात्रं पर्यवसा[12]स्यतीतिभावः ॥ ३७ ॥ १० ॥

इति तृतीयाध्याये द्वितीयपादे दशमं परमतः सेतून्मानेत्यधिकरणम् ॥ १० ॥

अनेन सर्वगतत्वमायामशब्दादिभ्यः ॥३७॥ प्रकरणं धर्मधर्मिविरोधनिरासप्रकरणं, स्वसिद्धान्तदृढीकरणार्थैकदेशिमतं दूषयितुमुपन्यस्यन्ति अनेनेत्यादि, व्यपदेशानां सेतुविधृत्यादिपदवाच्यानां ब्रह्मदृष्टान्तानां, मुख्यार्थेत्यादि सधर्मकस्य ब्रह्मत्वनिराकरणेनेत्यर्थः, तथा च परब्रह्मत्वनिराकरणेपि सोपाधिकस्य ब्रह्मणो व्यापकत्वमस्त्येवेति फलितं, केचित् मायावादिनः, व्यापकत्वस्य जगत्कर्तुर्व्यापकत्वस्य, पूर्वं सिद्धं जन्माद्यधिकरणसिद्धं, सेत्वादिवाक्यैः सममित्यादि, सेत्वादिवाक्यप्रतिपादितसधर्मकोपक्षीणमेव वाच्यं न तु तत् परब्रह्मव्यापकत्वमित्यर्थः, अग्रिमेत्यादि, इति चेदुच्येत तदा अग्रिमपदस्य व्यापकताबोधक 'आयामशब्दादिभ्य' इतिपदस्य वैयर्थ्यापत्तेरित्यर्थः, उक्तवैयर्थ्यमुपपादयन्ति अत्रैवमित्यादिना, रोद्धुं निश्चेतु, शक्नोति सूत्रकार इत्यर्थः, एकान्ततः वास्तवं, ब्रह्मणि सधर्मके ब्रह्मणि, अन्यथा सधर्मके वास्तवव्यापकत्वाभावे, परत्वं न शङ्केत परिच्छिन्नत्वेन सधर्मकस्य व्यापकत्वासिद्ध्या परब्रह्मत्वस्याप्यसिद्ध्यान्यस्य परमहत्त्वं कथं शङ्केतेत्यर्थः, ननु श्रुतिषु सधर्मकस्यापि ब्रह्मत्वेन प्रतिपादनाद्विरोधपरिहारार्थमेव शङ्केत्यत आहुः सामान्येत्यादि, तथा च 'सामान्यात्तु' इतिसिद्धान्तसूत्र इत्थमेव सूत्रं कुर्यादित्यर्थः, सामान्यात् ब्रह्मसत्तायाः सर्वत्रापि सत्त्वादपरस्मिन्नपि ब्रह्मत्वमविरुद्धमित्यर्थः स्यादित्यर्थः, इत्थं च तावतैवोपपत्तेरितरवैयर्थ्यमिति फलितं, व्यापकत्वेत्यादि, व्यापकत्ववाचकपदघटितश्रुतीत्यर्थः, आदिपदात् सूत्रस्थादिपदात्, विलम्बेत्यादि व्याप्तिज्ञानपरामर्शादिकृतविलम्बेनेत्यर्थः, साध्येत्यादि, श्रुत्या ब्रह्मरूपसाध्यसिद्धेरनुमानवैफल्यमित्यर्थः, इच्छाविशेषेण सिसाधयिषाबलात्, अभ्युच्चयमात्रं वृथास्वीकारमात्रमित्यर्थः ॥ ३७ ॥ १० ॥

इति तृतीयद्वितीये दशमाधिकरणम् ॥ १० ॥

---

१. पूर्वसिद्धमिति सर्वेष्वादर्शेषु । २. सर्वमविरुद्धमित्यर्थमिति बपापुस्तकयोः । ३. अग्रिमपदवैयर्थ्यापत्तेरिदिचेदितिपाठः सर्वेष्वादर्शेषु । ४. कार्यकारणेत्यादि पुंपुस्तके । ५. परत्वनिरास इति कपुस्तके । ६. सर्वगतत्वाप्रतिपादकेभ्य इति बपुस्तके । ७. एवमिति कपुगोपुस्तकेषु । ८. इयं श्रुतिरेव । ९. पादं तदिति कपुस्तके । १०. एतेनेति कपुगोपुस्तकेषु । ११. अभ्युचयत्वमात्रमिति कपुपुंगोविपुस्तकेषु । १२. पर्यवसिष्यतीति पुंगोपुस्तकयोः ।

एवं सर्वोत्तमत्वनिरूपणेनोत्तमाधिकारिणां भजनीयत्वप्रयोजकं रूपमुक्त्वा तदितराधिकारिणां तदाह, ते हि फलप्रेप्सव एव भजिष्यन्ति, तच्च फलदातृत्व एव सम्भवतीति तदाह,

फलमत उपपत्तेः ॥ ३८ ॥ (३.२.११.)

अत ईश्वरादेव फलं भवति यत्किञ्चिदैहिकं पारलौकिकं वा, कुतः ? उपपत्तेः, "सर्वस्य वशी सर्वस्येशानः" (बृह. ६. ४. २२.) इतिश्रुतिर्वस्तुमात्रेशितृत्वमसङ्कुचितमाह, नह्यन्यस्य वस्त्वन्यो दातुं समर्थोतो भगवानेव तथेत्यर्थः।

केचित्तत्रैव कर्मणस्तत्कार्यापूर्वस्य च फलदातृत्वमाशङ्क्य तत्रानुपपत्तिमत्रोपपत्तित्वेन व्याकुर्वन्ति, तत्त्वग्रे जैमिनिमतोपन्यासस्वमतोपन्यासाभ्यां व्यास एव व्यक्तीकरिष्यतीत्यधुनैवाप्राप्तनिराकरणमग्रिमसूत्रद्वयवैयर्थ्यं स्यादिति ॥ ३८ ॥

श्रुतत्वाच्च ॥ ३९ ॥

पूर्वसूत्रेण श्रुतमीशितृत्वं फलदान उपपत्तित्वेन निरूपितमिह तु साक्षाच्छ्रुतिमेव फलदातृत्ववाचिकां प्रमाणयति, सा च "स वा एष महानज आत्मान्नादो वसुदान" (बृह. ६. ४. २४.) इत्यादिरूपा, चकारात् "सुखं दुःखं भवो भावः" (श्रीमद्भग. १०. ४.) इत्युपक्रम्य "भवन्ति भावा भूतानां मत्त एव पृथग्विधाः" (श्रीमद्भग. १०. ५.) इत्यादिरूपा स्मृतिः सङ्गृह्यते ॥ ३९ ॥

अत्र कर्मवादी प्रत्यवतिष्ठते,

धर्मं जैमिनिरत एव ॥ ४० ॥

ननु कर्मण एव फलमितिपक्षेप्युपपत्तिश्रावणे तुल्ये, तथा हि ईश्वरवादिनापि कर्मनिरपेक्षेण तेन फलमिति न वक्तुं शक्यं, विधिवैयर्थ्यप्रवृत्त्यनुपपत्तिप्रसङ्गाभ्यां, तत्सापेक्षत्वे तदेवास्तु, कृतं तत्सापेक्षेण तेन, न चाचेतनं चेतनाधिष्ठितमेव कार्यक्षममिति केवलेन तेन न फलं सम्भ-

---

फलमत उपपत्तेः ॥ ३८ ॥ अन्ते फलाधिकरणनिरूपणेनाविरोधादिनिरूपणस्य सार्थक्यं निरूपयन्नधिकरणमारभत इत्याहुः एवमित्यादिना, एवं पूर्वाधिकरणोक्तरीत्या, सर्वोत्तमत्वनिरूपणेन ब्रह्मणि सर्वोत्तमत्वनिरूपणेन, इतराधिकारिणां सकामानां, तदाह भजनीयत्वमाह, ते हि सकामा हि, तच्च सकामभजनीयत्वं च, तदाह फलदातृत्वमाह, अत इत्यादि, अत्रोद्देश्यतत्तद्देवताभ्यः फलमुत भगवत इति संशयः, तेषां तेषां देवानामुद्देश्यतया श्रावणं 'सर्वस्य वशी सर्वस्येशान' इतिश्रुतिश्च संशयबीजं, देवान्तराणामुद्देश्यत्वात्तेभ्य एव फलमिति पूर्वः पक्षः, तेषामपीशानः परमात्मेति अत एव फलमितिसिद्धान्तः, तत्रानुपपत्तिमित्यादि, तत्पूर्वपक्षसिद्धान्तत्वेन सूत्रं व्याकुर्वन्तीत्यर्थः ॥ ३८ ॥

श्रुतत्वाच्च ॥ ३९ ॥ स्फुटं भाष्यम् ॥ ३९ ॥

धर्मं जैमिनिरत एव ॥ ४० ॥ सूत्रार्थमाहुः अत्रेत्यादि, उपपत्तीत्यादि, फलतरतमभावे फलतदभावयोर्वोपपादिका युक्तिरुपपत्तिः, श्रावणं कर्मणो ब्रह्मणो वा सकाशात्फलमितिश्रुतिदर्शनं, तुल्ये ईश्वरात्फलपक्षे कर्मणः फलपक्षे च ते तुल्ये इत्यर्थः, सूत्रार्थस्तु, अत एव उपपत्तिश्रावणरूपफलदानहेत्वोरस्तीत्यादेव धर्मं फलहेतुं जैमिनिराहेति, तदेवोपपादयन्ति तथाहीत्यादिना, प्रवृत्त्यनुपपत्तिः लोकानां धर्मात् फलाभावे धर्मकरणे प्रवृत्त्यनुपपत्तिः, तत्सापेक्षत्वे ईश्वरस्य फलदाने कर्मसापेक्षतयोक्तदूषणयोर्वारणे, कृतं अलम्, तत्सापेक्षेण कर्मसापेक्षे-

---

१. उपपन्नत्वेनेति कपुस्तकयोः। २. द्वयेति लुप्तं पुंपुस्तके। ३. वैयर्थ्यश्चेति पुंगोपुस्तकयोः। ४. त्विति लुप्तं दापुस्तके। ५. वसुदान इति बपुस्तके। ६. अत्रेति लुप्तं वेपुस्तके। ७. श्रवणे इति सर्वेष्वादर्शेषु। ८. ईश्वरवादिनामिति कपुपुस्तकयोः। ईश्वरवादिनामपीति वेपुस्तके। ९. इत आरभ्य माच्यमित्यन्तं लुप्तं गोपुस्तके। १०. न फलसम्भव इति पुंपुस्तके, फलासम्भव इति कपुपुस्तकयोः।

वतीति वाच्यं, कर्मस्वरूपं स्वर्गादिकश्च न लोकसिद्धं किन्तु श्रुतिसिद्धं, तत्र च स्वर्गादिफलसाधकत्वेनैवोत्पत्तिवाक्येष्वर्थवादेषु च[1] "ज्योतिष्टोमेन स्वर्गकामो यजेत" (आप. श्री. १०. २. १.) "अग्निहोत्रं जुहोति प्रजाकामः" (   ) इत्यादि, "दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत" (   ) "परमेष्ठिनो वा एष यज्ञोऽग्र आसीत्तेन स परमां काष्ठामगच्छत्" (तै. सं. १. ६. ८८.) इत्यादिषु कर्म श्रूयते, स च तत्साध्यत्वेनैव, एवं सति लोकेऽन्यथादर्शनेऽपि धर्मिग्राहकप्रमाणेन तथैव सिद्धत्वान्नात्र काचन शङ्का, ईश्वरवादिनो नित्यज्ञानादिमत्त्व[2] इवामुष्मिकफलत्वेन तत्प्रतिबन्धकापगमे भवतीत्यावयोस्तुल्यं, तस्याशुतरविनाशित्वेऽपि श्रुतिसिद्धकारणतानिर्वाहाय तद्व्यापारोऽपूर्वं कल्प्यते, अविषमादीश्वराद्विषमफलोत्पत्त्यनुपपत्ति[3]र्वैषम्यनैर्घृण्ये च[4] स्याताम्, अतः कर्मण एव फलमिति जैमिनिर्मनुते ॥ ४० ॥

पूर्वं तु बादरायणो हेतुव्यपदेशात् ॥ ४१ ॥

तुशब्दः पूर्वपक्षव्युदासार्थः, बादरायणस्त्वाचार्य इतःपूर्वोक्तमीश्वरमेव फलदत्वेन मनुते, कुतः? हेतुव्यपदेशात् हेतुत्वेन श्रुतौ व्यपदेशादित्यर्थः, "एष उ एव साधु कर्म कारयति तं यमेभ्यो लोकेभ्य उन्निनीषते एष उ एवासाधु कर्म कारयति यमधो निनीषते" (कौशी. ३. ९.) इतिश्रुतौ न केवलं कर्मकारयितृत्वमुच्यतेऽपि तु फलदित्सया तथात्वं[5], अतः फलदत्वमीश्वरस्यैव व्यपदिष्टं भवतीति नानुपपत्तिः काचित्, 'नन्वीश्वरस्य स्वतः फलदाने समर्थस्य[6] फलदित्सायां सत्यां कर्मकारणे को हेतुः? कार्यवैचित्र्यञ्च कथम्?'[7]इत्यादि चोद्यं "कृतप्रयत्नापेक्षस्तु विहितप्रतिषिद्धावैयर्थ्यादिभ्यः" (ब्र. सू. २. ३. ४२.) इत्यत्र निरस्तं, विद्वन्मण्डने[8] श्रीविट्ठलेन च, अतः सकामैरपि स[9] एव भजनीय इति सिद्धम् ॥ ४१ ॥ ११ ॥

इति तृतीयाध्याये द्वितीयपाद एकादशं फलमत इत्यधिकरणम् ॥ ११ ॥

॥ इति श्रीवेदव्यासमतवर्तिश्रीवल्लभाचार्यविरचिते श्रीमद्ब्रह्मसूत्राणुभाष्ये तृतीयाध्यायस्य द्वितीयः पादः ॥

णेश्वरेण, तेन धर्मेण न फलसम्भव', स च स्वर्गादिश्च, तत्साध्यत्वेन धर्मसाध्यत्वेनैव सिद्ध इत्यर्थः, अन्यथादर्शनेऽपि राजादिभ्यः कर्मकरणाभावेऽपि फलदर्शनेऽपीत्यर्थः, धर्मिग्राहकप्रमाणेन कर्मफलयोः कार्यकारणभावबोधकश्रुतिप्रमाणेन, तथैव सिद्धत्वात् कर्मण्येव फलस्य सिद्धत्वात्, अत्र वेदबोधितकर्मतत्फलयोः, नित्यज्ञानादिमत्त्व इवेति ईश्वरवादिनो नित्यज्ञानादिसिद्धिर्यथा धर्मिग्राहकमानेनेश्वरे तथा ममापि धर्मफलयोः कार्यकारणभावावगतिरित्यर्थः, ननु धर्मस्य फलहेतुत्वेऽव्यवहितोत्तरक्षणे फलं कुतो नोदेतीत्यत आहुः आमुष्मिकेत्यादि, तत्प्रतिबन्धकापगमे स्वर्गादौ लौकिकदेहाद्यपगम इत्यर्थः, तस्य कर्मण, स्वमत एव वेदोपपत्तिर्न ब्रह्मवादिमते इत्याह अविषमादित्यादि ॥ ४० ॥

पूर्वं तु बादरायणो हेतुव्यपदेशात् ॥४१॥ सूत्रार्थमाहुः इत इत्यादिना, अन्यद्भाष्यं स्फुटम् ॥ ४१ ॥ ११ ॥

इति तृतीयद्वितीय एकादशाधिकरणम् ॥ ११ ॥

इति श्रीमद्गोस्वामिश्रीवल्लभजीसुतगोपालजीविरचितेऽणुभाष्यप्रदीपे तृतीयाध्यायस्य द्वितीयः पादः ॥ २ ॥

---

१. उत्पत्तिवाक्येष्वर्थवादेष्विति वंपुस्तके। २. सत्त्व इति पुंपुस्तके। ३. अनुत्पत्तिरिति वपुस्तके। ४. चेति छुप्तं पुंपुस्तके,। ५. तथेत्यधिकं वपुस्तके। ६. फलदानसमर्थस्येति कपुपुस्तकयोः। ७. इत आरभ्येत्यन्तं छुप्तं वपुस्तके। ८. 'ने श्रीविट्ठ'इत्येतान्यक्षराणि छुप्तानि पुंपुस्तके। ९. एष इति गोपुस्तके।

॥ अथ तृतीयाध्यायस्य तृतीयः पादः ॥

पूर्वपादे जडजीवधर्मनिराकरणेन शुद्धसच्चिदानन्दविग्रहरूपत्वं ब्रह्मणो निरूपितं, इह तु ब्रह्मण एव धर्मा विचार्यन्ते, ते चेदेकस्मिन् वाक्य एव सर्वे पठिता भवेयुस्तदा न विचारणीया भवेयुर्विरोधाभावात्, पठिताश्च तत्तदुपासनप्रकरणेषु, क्वचित् त एव, क्वचिद्भिन्नाः, यथा वाजसनेयिनः पञ्चाग्निविद्यां प्रस्तुत्य षष्ठमन्यमग्निं पठन्ति 'तस्याग्निरेवाग्निः' (बृह. ८. २. १४.) इति, छन्दोगास्तु पञ्चसङ्ख्ययैवोपसंहरन्ति 'अथ य एतानेवं पञ्चाग्नीन् वेद' (छान्दो.७.१०.१०.) इति, तथा प्राणसंवादे मुख्यप्राणादन्यांश्चतुरः प्राणान् वाक्चक्षुःश्रोत्रमनांसि पठन्ति, वाजसनेयिनस्तु तमपि पञ्चमं पठन्ति, अपरञ्च, अथर्वोपनिषत्सु क्वचिद्गोकुलवृन्दाकाननसञ्चरद्गोपरूपमनल्पकल्पद्रुमप्रसूनविरचितविचित्रस्थलीककालिन्दीसलिलकल्लोलसङ्गिमृदुतरपवनचलदलकविराजमानगण्डमण्डलद्युतिमण्डितकुण्डलप्रभानुभावितवामांसमिलन्मूर्धन्यमहामणिकमुरलिकामुखावलीमिलदतितरलकरकमलयुगलाङ्गुलीवशंवदविविधस्वरमूर्च्छनामोहितव्रजैरत्ननितम्बिनीकदम्बकटाक्षकुवलयार्चितं क्वचित् कोदण्डमण्डितभुजदण्डखण्डितप्रचण्डदशमुण्डमतिविचित्रचरित्राभिरामं रामस्वरूपं क्वचिदतिकरालवदनवित्रासितकमलाकमलासनवृषभासनादिकं नृकेसरिरूपं क्वचिदुरुक्रमादिरूपं च निरूप्यते, तथा च द्रव्यदेवताभेदाद्यागभेदवद्धर्माणामावापोद्वापाभ्यां दृष्टादृष्टफलभेदाच्च वेद्यभेदे प्राप्ते ब्रह्मानेकत्वापत्तौ श्रुतिविरोधाद्विनिगमकाभावात् सर्वेषामुपासनाविषयाणामब्रह्मत्वमापतितं, ननूपासनाविषयाणामौपाधिकत्वात्तेषाञ्चाविद्याकल्पितत्वात्तद्विशिष्टानां तथात्वं युक्तमेव, न चैवं तन्निरूपकाणां वेदान्तानामब्रह्मपरत्वप्रसङ्गः, शुद्धस्य ब्रह्मणो दुर्ज्ञेयत्वेनोपाधिविशिष्टोपासनया चित्तशुद्धौ सत्यां स्वत एव तज्ज्ञानं भविष्यतीत्येतत्तात्पर्यकत्वादितिचेत्, मैवम्, समन्वयविरोधापत्तेः, तासां ब्रह्मविद्यात्वहानेश्च, श्रुतेः प्रतारक-

सर्ववेदान्तप्रत्ययं चोदनाद्यविशेषात् ॥ १ ॥ साधनाध्यायस्य द्वितीयचरणानुवादपूर्वकं तृतीयचरणार्थमाहुः पूर्वपाद इत्यादिना, शुद्धेत्यादि, जडजीवधर्माणां निराकरणेन ब्रह्मणि श्रुतिप्रतिपादितानां ब्रह्मस्वरूपनिरूपणेन विरुद्धधर्माश्रयत्वस्य श्रुतिबोधितत्वेन च शुद्धसच्चिदानन्दविग्रहत्वं प्रतिपादितमित्यर्थः, इह तृतीयचरणे, विचार्यन्ते उपासनार्थमुपसंहारार्थं च विचार्यन्त इत्यर्थः, प्रसङ्गः सङ्गतिः, ते विरुद्धधर्माः, एकस्मिन् 'आसीनो दूरं व्रजति' 'अपाणिपादो जवनः' इत्यादिवत्, विरोधाभावात् 'स्थितं व्रजन्तमासीनं शयानं वा गुहाशय'मितिवत् कालभेदेन पर्यायभेदेन च विभावने विरोधाभावादित्यर्थः, षष्ठं पञ्चत एवैकमधिकमित्यर्थः, तं रैतं, यागभेदवत्, तथा च द्रव्यदेवतात्मकरूपभेदेन यागभेदवदुपासनाभेदोक्तधर्मभेदे ब्रह्मभेदः स्वीकार्य इत्येका कोटिः संशये, द्वितीयामाहुः धर्माणामित्यादिना, मुरलीकोदण्डादिधर्माः साकारस्य, 'सदेव'इतिसत्त्वांशास्थूलत्वादयो निराकारस्य तयोर्मध्य एकेषां उद्वापेन त्यागेन इतरेषामावापेन स्वीकारेण, दृष्टेत्यादि, दृष्टं फलं दर्शनं, अदृष्टं पदप्राप्तिमहत्त्वादिरूपं, वेद्यभेदे तत्तदुपासनाप्रकरणोक्तधर्मैर्वेद्यभेदे प्राप्ते, ब्रह्मानेकत्वापत्तौ ब्रह्मण एवोपास्यत्वेन ब्रह्मानेकत्वापत्तावित्यर्थः, श्रुतिविरोधात् 'एकमेवाद्वितीय'मितिश्रुतिविरोधात्, विनिगमकाभावादित्यादि, तथा च ब्रह्म सधर्मकमुत निर्धर्मकमुपासनाभिस्तद्भिन्नं वेति संशयः, पूर्वपक्षमाहुः ननूपासनेत्यादि, तद्विशिष्टानां उपासनावाक्योक्तधर्मविशिष्टानां, तथात्वं अब्रह्मत्वं, इतिचेदित्यन्त एकः पूर्वपक्षः, तं पूर्वपक्षं दूषयन्त आहुः मैवमित्यादि, समन्वयेत्यादि, तथा चोक्तरीत्या तात्पर्यबोधकत्वमावश्यकीकार्यं उपनिषदां शक्त्या तत्सम्बन्धिधर्मा

१. शुद्धस्यैवेति चपापुस्तकयोः । २. ब्रह्मगता धर्मा इति कैचपापुंगोपुस्तकेषु । ३. उदाहरन्तीति पुंगोपुस्तकयोः । ४. मजनरेत्यादि कंपुस्तके, मजवरेत्यादि चपापुंगोपु । ५. चरिताभिराममिति गोपुस्तके । ६. चपदं द्वमं कपुस्तके, उरुक्रमादिकं चेति पापुस्तके । ७. रामुच्चयेत्यादि गोपुस्तके ।

त्वापत्तेश्च, अपरञ्च, 'योन्यथा सन्तमात्मानमन्यथा प्रतिपद्यते किं तेन न कृतं पापं चौरे[1]-णात्मापहारिणा' (महा.शान्ति.२२१.२७.) इत्यन्यथाज्ञानं निन्दन्ती श्रुतिः[2] कथं फलसाधकत्वेन तत्तदुपासनां[3] वदेत्? स्पष्टार्थानां श्रुतिवाक्यानां निर्णयमकृत्वा सन्दिग्धार्थानां ज्योतिराकाशादि-शब्दानां तद्वाचकत्वं न निर्णयेद्[4]भगवान्[5] व्यासः, एवञ्च सत्युक्तरीत्या यागवत्तेषां परस्परं[6] भेदश्चा[7]वश्यक इत्युभयतःपाशारज्जुरिति प्राप्तेभिधीयते,

सर्ववेदान्तप्रत्ययं चोदनाद्यविशेषात् ॥ १ ॥ (३. ३. १.)

सर्ववेदान्तप्रत्ययमनेकरूपनिरूपकैः सर्वैर्वेदान्तैः[8] प्रत्ययो ज्ञानं यस्य तत्तथा, ब्रह्मणोनन्तरूपत्वेपि[9] यानि यानि रूपाणि विविधैर्जीवैरुपासितुं शक्यानि तानि तानि रूपाणि तैस्तैर्वेदान्तैर्निरूप्यन्त इति तावद्रूपात्मकमेवं[10] ब्रह्मेत्यर्थः, तत्र हेतुः चोदनाद्यविशेषादिति, चोद्यते कर्तव्यत्वेन बोध्यतेनेनेति चोदना विधिवाक्यमितियावत्, तस्या[11]विशेषादित्यर्थः, यथैकस्मिन्नग्निष्टोमे शाखाभेदेपि चोदना तथैव भवति 'अग्निष्टोमेन यजेत[12]' (आप.श्रौत.१०.२.१.) इति तथेहापि सर्वेषु वेदान्तेषु ब्रह्मत्वेनैवोपासना विधीयत इति तथा, आदिपदात् साक्षा-त्परम्पराभेदेन मोक्षफलकत्वकथन[13]मप्युपासनानामविशिष्टमिति प्रयोजनसंयोगः सङ्गृह्यते ॥ १॥

भेदान्नेति चेदेकस्या[14]मपि ॥ २ ॥

ननु द्रव्यदेवताभेदाद्यागभेदवदुपास्यानां धर्मभेदेन मिथोभेदादुक्तहेत्वसिद्धिं भेदान्नेति चेदित्यनेनाशङ्क्य तत्परिहारमाह सूत्रकार एकस्यामपीतिसूत्रावयवेन, यथैकस्यामपि गृहीत-षोडशिकायामतिरात्रव्यक्तावगृहीतषोडशिकायाः सकाशाद्गुणाधिक्येपि नातिरात्रभिन्नयागत्व-मतिरात्रलक्षण[15]कर्मैवाधिकृत्य तद्ग्रहणा[16]ग्रहणयोर्विधानादेवमिहापि ब्रह्मैवाधिकृत्य तत्तद्धर्मवैशिष्ट्या-वैशिष्ट्ययोरुक्तत्वान्न ब्रह्मोपासनानां[17]भिन्नत्वमुपासनासु, तथा च ब्रह्मधर्मत्वेनाभेदस्य विवक्षितत्वा-

---

प्रतिपादकत्वेन ब्रह्मणि समन्वयोनुपपन्नस्तादृशतात्पर्यबोधकत्वेन समन्वयोक्तौ तु 'सर्वे वेदा यत्पदमामनन्ति' 'वेदैश्च सर्वैरहमेव वेद्यः' इत्यादिश्रुतिविरोधः, तासां उपनिषदां, ब्रह्मविद्यात्वहानेः तात्पर्यबोधकतायां तात्पर्यस्या-ब्रह्मत्वेन ब्रह्माबोधकत्वमिति ब्रह्मविद्यात्वहानेरित्यर्थः, प्रतारकत्वापत्तेः ब्रह्मण्यविद्याकार्ये ब्रह्मत्वबोधनेयथार्थवक्तृत्वे प्रतारकत्वापत्तेरित्यर्थः, दूषणान्तरमाहुः अपरमित्यादिना, स्पष्टार्थानां उपनिषद्घटकानां रामकृष्णादिपदानां, तद्वाचकत्वं ब्रह्मवाचकत्वं, तथा च येषां ब्रह्मवाचकतायां न सन्देहस्तेषां न विचारः कृतो वाचकत्वे सन्दिग्धानां तु विचारः कृतोतो वाचकत्वेनैवोपनिषदां समन्वयो व्यासाभिप्रेत इत्यर्थः, तेषां उपासनावाक्यप्रतिपादितधर्मविशिष्ट-ब्रह्मस्वरूपाणां, पाशारज्जुरिति भेदानङ्गीकार आमिक्षान्यायविरोधोङ्गीकार 'एकमेवे'त्यद्वैतश्रुतिविरोध एवं पाशारज्जुरित्यर्थः, अभिधीयते सिद्धान्त उच्यत इत्यर्थः, अनेकेत्यादि, व्यधिकरणबहुव्रीहिणा सूत्रैकदेशार्थमाहुः तत्तथेत्यन्तेन, आदिपदादिति, 'एकं वा संयोगरूपचोदनाख्याविशेषात्' इति सूत्रोक्ताश्चत्वारो हेतवोनेकरूपाणा-मैक्यसाधका बोध्याः, आदिपदादिति, इत्थं च सूत्रे चोदनाश्च आद्यश्चेति चोदनादीति समाहारद्वन्द्वोवसेयः, प्रयोजनसंयोगः एकस्मिन्नेव ब्रह्मणि नानाप्रकारैर्जातफलानां समुच्चयः ॥ १ ॥

भेदान्नेति चेदेकस्यामपि ॥२॥ धर्मभेदेन एकस्यामुपासनायामुक्तधर्मस्योपासनान्तरोक्तरूपेष्वभावेन, हेत्व-सिद्धिं 'संयोगरूपचोदनाख्याः' इतिहेतुचतुष्टयमध्ये भेदसाधकरूपात्मकहेतोरसिद्धिमित्यर्थः, इत्यनेनाशङ्क्य इति-

---

१. चौरेणेति वपुंगोषु । २. प्राचाम्मतेनेयं श्रुतिरेव । ३. तदुपासनामिति पापुस्तके । ४. निर्णीयादिति पुव्यतिरिक्तेषु । ५. भगवानिति लुप्तं पापुस्तके । ६. परस्परभेद इति प्रकाशपाठः । ७. चपदं लुप्तं पुंपुस्तके । ८. सर्ववेदान्तैरिति वपागोषु । ९. अपीति लुप्तं पापुस्तके । १०. एकमेवेति वपापुंषु । ११. तस्मादिति पुपुस्तके । १२. यजेदिति पापुस्तके । १३. मोक्षफलककथनमिति कंपुस्तके । १४. नैकस्यामपीति कपुस्तके । १५. लक्षणमिति गोपुस्तके । १६. तत्तदिति वपुस्तके । १७. उपासनभिन्नत्वमिति पापुस्तके ।

स्वदुक्तहेत्वसिद्धिः, एवं सति यत्रै[1]कस्मिन्नुपास्ये रूपेऽन्यस्माद्रूपादधिका गुणा उच्यन्ते तत्र तेषामुपसंहार उचित इतिभावः, अत्रायं विशेषो ज्ञेयः, उपासनाविषयेष्वखिलेष्वविशिष्टं[2] ब्रह्मत्वं ज्ञात्वा ते[3]ष्वेकतरं रूपं य उपास्ते तस्य तत्र सर्वे गुणा उपसंहर्तुमुचिताः, यस्त्वनन्तेषु विभूतिरूपेषु ओ[4]मित्यक्षरादि "ध्वोमित्येतदक्षरं ब्रह्म" (कठोप.२.१५-१६.) इति ज्ञात्वोपास्ते तस्य शाखान्तरीया अप्येतदक्षरोपासनप्रकरणोक्ता एवोपसंहर्तव्या नान्ये, तद्रूपमधिकृत्यैव तेषां गुणानां कथनात्, अन्यथातिप्रसङ्गात्, इयं तू[5]पासनामार्गीया व्यवस्थोक्ता, भक्तिमार्गीया त्वेतद्विलक्षणा, साग्रे वाच्येति ॥ २ ॥

नन्वग्निष्टोममेवोद्दिश्य यावन्तो धर्मास्तैत्तिरीयके पठ्यन्ते न[6] तावन्तो वाजसनेयके, तथा च त्वदुक्तरीत्या वाजसनेयिनां तद्धर्मोपसंहारोपि न्याय्यो भवेत्, न त्वेवं सः, शिष्टाचारादिविरोधात्, तथा पञ्चाग्निविद्यामे[7]वाधिकृत्योक्तोपि षष्ठोऽग्निर्न छन्दोगैः शक्यत उपसंहर्तुं, तथैवाथर्वणिकैर्नैकस्मिन् रूपे रूपान्तरधर्मा इति प्राप्त उत्तरं प[8]ठति,

स्वाध्यायस्य तथात्वे[9]न समाचारेधिकाराच्च सववच्च तन्नियमः ॥ ३ ॥

स्वाध्यायो वेदः, स एकमेव कर्म शाखाभेदेन भि[10]न्नभिन्नप्रकारकं बोधयतीति तत्प्रयुक्तः सम्यग्भूतेग्निष्टोमादिलक्षण आचारे तत्तदङ्गाचारनियमोन्यूनानधिककरणलक्षण इत्यर्थः, तावद्भिरेवाङ्गैर्योगसम्पत्तेरधिककरणस्याप्रयोज[11]नकत्वात्तावतामेवाङ्गानां करणं, ननूक्तं तद्धर्माणामप्युपसंहारस्त्वदुक्तरीत्या सम्भवतीत्यत आह अधिकारादिति, सर्वेषां शाखिनां स्वस्वशाखोक्तकर्मण्ये[12]वाधिकारो न परशाखोक्तेप्यतोपि त[13]थानियमः, चकारात् स्वशाखोक्तात् कर्मणोतिरिक्ततत्कर[14]णे न्यूनकरणे च "यदस्य कर्मणः" (आप. श्रौत. ३. १२. १.) इत्यादिप्रायश्चित्तश्रवणमपि तन्नियमे हेतुः समुचीयते, अत एव क्वचित् परशाखोक्तमपि व्यवस्थितविकल्प-

---

सूत्रभागेनाशङ्क्येत्यर्थः, स्वदुक्तहेत्वसिद्धिः ब्रह्मधर्माणां ब्रह्माभिन्नत्वाद्धर्मिभेदसाधकधर्मभेदरूपस्य तत्र हेतोर्ब्रह्मण्यसिद्धिरित्यर्थः, एवं सति सर्वोपासनाविषयरूपाणां ब्रह्माद्वैते सिद्धे सतीत्यर्थः, तत्र न्यूनगुणत्वेन प्रतीयमानोपासनाविषये रूपे, तेषां वाक्यान्तरोपासनाविषयधर्माणां, उपसंहारः सामान्यतया श्रुतस्य विशेषे नियमनं, अत्र गुणोपसंहारे, विशेषः वक्ष्यमाणो विशेषः, अखिलेषु ब्रह्मत्वेनोपासनाविषयेषु प्राणोपासनासु च, सर्वे गुणाः सर्वे ब्रह्मधर्माः, 'एतदक्षरं ब्रह्म' इत्यत्र ब्रह्मत्वं गौणीकृत्य वर्णप्राधान्येनोपासनं बोध्यं, एतदक्षरेत्यादि, एवंविधोपासनाबोधकशाखोक्ताः सर्वे धर्मा ईदृश उपास्य उपसंहार्या नत्वन्यविधोपास्यधर्मा अपि, अन्यथा तत्प्रकरणातिक्रमेणोपसंहारे, अतिप्रसङ्गात् प्रकरणस्याङ्गनियामकत्वभङ्गलक्षणातिप्रसङ्गादित्यर्थः, अग्रे स्वाध्यायसूत्रादौ ॥ २ ॥

स्वाध्यायस्य तथात्वेन समाचारेधिकाराच्च सववच्च तन्नियमः ॥ ३ ॥ स्वाध्यायसूत्र उपसंहारबाधकथनादुपसंहारस्याग्रे वक्तव्यत्वेप्यत्र बाधप्रसङ्गेन स्मरणादुपसंहारनिरूपणमितिबोधनाय सूत्रमवतारयन्ति नन्वित्यादि, रूपान्तरधर्माः इत्यस्य उपसंहर्तुं शक्यन्ते इत्यन्वय, सूत्रार्थमाहुः स्वाध्यायेत्यादि, तथात्वेनेत्यस्यार्थमाहुः एकमित्यादिना, समाचार इत्यस्यार्थमाहुः तत्प्रयुक्त इत्यादि, तत् शाखाभेदभिन्नप्रकारकनिरूपणं, अधिकारादित्यादिसूत्रभागं व्याकर्तुमाशङ्कते नन्वित्यादि, स्वदुक्तरीत्या ब्रह्मणि स्वदुक्तधर्मोपसंहाररीत्येत्यर्थः, तथा च तैत्तिरीयशाखोक्ताग्निष्टोमधर्मा वाजसनेयकानामप्यनुष्ठेयाः स्युरित्यर्थः, तथानियमः स्वशाखीयानामेवानुष्ठाननियमः, तन्नियमे स्वशाखोक्तयावद्धर्मानुष्ठाननियमे, अत एव अधिकारप्रायश्चित्तोपदेश-

---

१. कस्मिन्निति चपुस्तके। २. अविशिष्टब्रह्मत्वमिति कंपुस्तके। ३. एतेष्विति चपापुस्तकयोः प्रकाशे तु तेष्विति। ४. ओमित्यक्षरादिष्विति लुप्तं चपागोषु। ५. उपासनमार्गीयेति कंगोपुस्तकयोः। ६. ते तावन्त इति कपुपुस्तकयोः, चपापुस्तकयोस्तु नपदं लुप्तम्। ७. एवपदं लुप्तं चपागोषु। ८. पठन्तीति गोविपुस्तकयोः। ९. तथात्वेन हीति कपुस्तके। १०. भिन्नप्रकारकमिति पुंपुस्तके। ११. अप्रयोजकत्वादिति चपापुंगोषु। १२. एवपदं लुप्तं पुंपुस्तके। १३. तथापि नियम इति गोपुस्तके। १४. कारण इति गोपुस्तके।

विषयत्वेन कल्पसूत्र उच्यते, विकल्पे तूभयस्याशास्त्रार्थत्वमुपसंहारे तूभयस्यापि शास्त्रार्थत्वमतोपि नाग्नेरुपसंहारशङ्का, अत्र दृष्टान्तमाह सववदिति, यथा सवा होमाः सप्तसूर्यादयः शतौदनपर्यन्ता वेदान्तरोदितत्रेताग्न्यनभिसम्बन्धादाथर्वणोदितैकाग्निसम्बन्धाच्चाथर्वणिकानामेव कार्यत्वेन नियम्यन्ते तथा तत्तच्छाखायास्तथात्वात् तत्तदुक्त एव कर्मणि तत्तच्छाखिनामधिकाराच्च स्वस्वशाखोक्तादन्यूनानतिरिक्तकर्मकरणनियम इत्यर्थः, प्रकृतेपि यद्रूपोपासनाप्रकरणे यावन्तो धर्मा उक्तास्तस्मिन् रूपे तावद्धर्मवत्त्वेनैवोपासना कार्या तद्बोधकप्रमाणानुरोधान्न तु रूपान्तरोपासनप्रकरणोक्ता साधारणधर्मवत्त्वेनापि, तथा सति मत्स्योपासकस्य चापशरादिकमपि भावनीयं स्यात् पुरुषरूपोपासकस्य च लक्षयोजनायामशृङ्गादिकं, नन्वाथर्वणोपनिषत्सु श्रीरामोपासनायां "यो वै ये मत्स्यकूर्माद्यवतारा भूर्भुवःसुवस्तस्मै वै नमो नमः" (रामो. ता. ५.) इतिवाक्येन तदितरावतारत्वमुच्यते तेन तद्धर्मवत्त्वमप्याक्षिप्यते, सत्यमाक्षिप्यते तद्धर्मवत्त्वं, तत्रायमभिसन्धिः, परमकाष्ठापन्नं ब्रह्मस्वरूपमिदमिति ज्ञात्वा ह्युपासना कार्या, तेनैतस्यैवान्येवतारास्तत्तद्रूपेण तानि तानि कर्माण्ययमेव कृतवानिति ज्ञेयं परं, न तु तस्मिन्नेव रूपेन्यावतारधर्मवत्त्वमपीति, तथा च तस्मिंस्तस्मिन्नववारे तत्तद्धर्मवानिति श्रुत्या बोध्यते न तु सर्वत्रेति, तत्र बाधकमुक्तमेव, प्राणाद्युपासनास्वेतावान् विशेषः, यथा कर्मण्यतिरेके प्रायश्चित्तश्रवणं बाधकं श्रीरामस्वरूपाद्युपासनासु च तेनावतारेणाकृतकर्मणस्तत्र भावनेपराधो बाधको "योन्यथा सन्तमात्मानम्" (महा. शान्ति. २२१. २७.) इत्यादिवाक्यं च न तथा प्राणाद्युपासनास्वधिकगुणस्येतरत्रोपसंहारे किञ्चिद्बाधकं दृश्यत इति सत्कर्तुं शक्यत इति, ननु पुरुषादिरूपस्य विग्रहस्यैव शुद्धब्रह्मत्वादयमेवावतारान्तरेष्वपि लीलाकर्तेतिज्ञानमनुपपन्नमिति चेत्, मैवम्, धर्मिग्राहकमानेनैकस्यैव शुद्धस्यैवानन्तरूपत्वेन सिद्धत्वाद्वस्तुन एव

रूपहेत्वोः कर्माङ्गनियामकत्वादेव, व्यवस्थितविकल्पेत्यादि, व्यवस्थितविकल्पो नामोभयोरेककोटिनिर्णायको विकल्पो यथोदितानुदितहोमकल्पयोर्मध्य एकस्यैवाङ्गीकारस्तेनैव च यावज्जीवमनुष्ठानं न तु द्वितीयस्याङ्गीकारो यथा व्रीहियवादिस्थल इतिभावः, विकल्पे तु ऐच्छिकविकल्पाङ्गीकारे तु, उभयस्यापि विकल्पलब्धपक्षद्वयस्यापि, अशास्त्रार्थत्वं अष्टदोषदुष्टत्वेनाशास्त्रार्थत्वं, उभयस्यापि शास्त्रार्थत्वं शास्त्रेणोभयस्यापि प्राप्तिस्तथाचैकमपि न स्यात् परस्परविरोधादितिभावः, अत्र अग्निष्टोमादौ, ननु वेदविभागात् पूर्वं शाखाधिकारिभेदानामसम्भवात् सकलकर्माङ्गानां सर्वकर्मसूपसंहारः स्यादत आहुः अत्र दृष्टान्तमित्यादि, तथा चाविभागदशायामपि तत्तद्वेदे तत्तच्छाखानामपि नियामकानां विद्यमानत्वात्ताभिरेव नियमसम्भवान्न सर्वकर्मसु सर्वाङ्गोपसंहार इत्यर्थः, सवा होमाः आथर्वणिकानां प्रसिद्धाः, त्रेताग्न्यनभिसम्बन्धात् सवाहोमेष्वग्नित्रयसम्बन्धाभावात्, तथात्वात् तत्तच्छाखोक्तकर्मसु तत्तच्छाखोक्ताङ्गानामेवानुष्ठानं न तु विरुद्धेतरेषामित्यर्थनियामकत्वादित्यर्थः, उपासनायामपि तत्तदुपास्यरूपप्रकाराणामबाधकधर्माणामेवोपसंहारो न तु बाधकानामपीत्याहुः प्रकृतेपीत्यादिना, तथा सति तद्बोधकप्रमाणविरोधेन रूपान्तरासाधारणधर्माणामुपसंहारे कृते सतीत्यर्थः, लक्षेत्यादि, तथा च पुरुषोपासकस्य लक्षयोजनविस्तीर्णशृङ्गादि भावनीयं स्यादित्यन्वयः, अभिसन्धिः समाधानं, परमकाष्ठापन्नं अवतारदशापूर्वकालीनं, इदं उपासनाविषयीभूतं रूपं, अयमेव मूलस्वरूपाभिन्नत्वेन ज्ञात उपासनागोचर एव, इति ज्ञेयं परं इति मन्त्र उक्त इतिभावः, न तु सर्वत्र अन्यावतारेषु तदन्यावतारधर्माणामुपसंहारस्तु नेत्यर्थः, तत्र बाधकमुक्तं प्रकरणस्य तस्य नियामकत्वे प्रकरणस्याङ्गतानियामकत्वभङ्गलक्षणातिप्रसक्तिः स्यादितिबाधकमुक्तमित्यर्थः, नन्वेवमुपासनाविषयप्राणेष्वपि शाखान्तरोक्तप्राणधर्मोपसंहारो न स्यादित्यत आहुः न तथा प्राणेत्यादि, अधिकगुणस्येत्यादि, शाखाविशेषोक्तन्यूनसङ्ख्याकप्राणे शाखान्तरोक्ताधिकसङ्ख्योपसंहारेधिकसङ्ख्यायां न्यूनसङ्ख्यायाः सम्भवाद्विरोधाभावान्न किञ्चिद्बाधकमित्यर्थः, शक्यत इति बाधकं सत्कर्तुं न शक्यत इत्यर्थः, ननु साकारस्य सर्वादिपुरुषस्यैव परब्रह्मणः सर्वावतारूपत्वमुच्यते तत्र सम्भवति धर्मिभेदकानां निरूप्यमाणप्रकारभेदानां मूलावताररूपयोः सत्त्वादित्यत आहुः नन्वित्यादि, अनुपपन्नं 'अन्यथा

१. तदुक्त इति कपुपुस्तकयोः। २. धर्मत्वेनापीति चपापुस्तकयोः। ३. सर्वत्रापीति चपागोपु सर्वत्रेतीति तु प्रकाशे। ४. आदीति लुप्तं पुंपुस्तके। ५. स कर्तुमिति कपापुपु। ६. एवपदं लुप्तं पुंपुस्तके। ७. वस्तुत एवेति कपुस्तके।

तथात्वान्न काचिच्छङ्का, यथैकस्यैवान्योन्याभावस्यानन्तभावप्रतियोगिकतत्तद्रूपत्वं तावत्तत्प्रतियोगिकात्यन्ताभावरूपत्वं चाभावप्रतियोगिकान्योन्याभावात्यन्ताभावरूपत्वं च भावरूपत्वेऽप्यभावरूपत्वमेव चाङ्गीक्रियते तथेहाप्यस्तु, अभावत्वस्याप्रयोजकत्वात्, धर्मिग्राहकमानस्यैव तथात्वात्, तच्च तैत्तिरीयोपनिषत्सु "अतः परं नान्यदणीयसꣳ हि परात् परं यन्महतो महान्तं यदेकमव्यक्तमनन्तरूपं विश्वं पुराणं तमसः परस्तात्"(तैत्ति.महा.१.५.) इत्यादिश्रुतिरूपं प्रसिद्धमेव, अपरञ्च, सर्वासामुपासनानां हि ब्रह्मविज्ञानसाधनत्वेन श्रुतौ निरूपणं क्रियते यत्प्रकारिकोपासना विज्ञानहेतुः स प्रकारश्च निरूप्यते, एवं सत्येकस्यां शाखायां कतिपयगुणनिरूपणं तदितरस्यां शाखायां तदतिरिक्तानामपि गुणानामित्यत्र को हेतुरिति पृच्छामः, उपसंहारेण प्राप्तिमनिरूपणे हेतुं चेद्ब्रवीषि तत्र वदामः, एवं सति न्यूनगुणनिरूपिका श्रुतिः स्वोक्तानपि गुणान् न वदेत्, तथा हि, उपासनानां ब्रह्मविज्ञानफलकत्वस्य निर्णीतत्वात्तस्य चैकजातीयत्वाद् घटवत्कृत्स्नाशेषसाधनसाध्यत्वादशेषतन्निरूपिकैव श्रुतिर्निरूपयेत्, अन्यथा तूपासनाया नामोक्त्वा 'उपासीत' इत्येतावदेव वदेत्, गुणानामाक्षेपलभ्यत्वान्न वदेत्, उपसंहार्यानपि वा वदेत्, निरूपयति च गुणान्, नोपसंहार्यान्, न च स्वशाखामात्राध्येतृणामुपासनासिद्ध्यर्थं सर्वशाखासूपासनप्रकारोक्तिरिति वाच्यं, परशाखाऽज्ञानेन तदुक्तगुणोप-

---

सन्त'मितिदूषणादनुपपन्नमित्यर्थः, धर्मिग्राहकमानस्य 'यदेकमव्यक्तमनन्त'मितिश्रुतिरूपस्येत्यर्थः, तथात्वात् विरुद्धनानाधर्माश्रयत्वेन श्रुतिसिद्धत्वादित्यर्थः, भेदकनानाप्रकाराणां सत्त्वेपि धर्मिभेदाभावे दृष्टान्तमाहुः यथैकस्यैवेत्यादिना, अनन्तभावेत्यादि, तथा च घटान्योन्याभावे विद्यमाना ये पटान्योन्याभावास्ते घटभेदरूपा एवाभावाधिकरणकाभावस्याधिकरणरूपत्वाङ्गीकारात्, तत्तद्रूपत्वं घटभेदस्य पटादिभावप्रतियोगिताकनानाभेदरूपत्वं, घटात्यन्ताभावाधिकरणकनानाभावप्रतियोगिकाभावानां घटात्यन्ताभावरूपत्वमाहुः तावत्तदित्यादिना, एवं भेदाधिकरणकात्यन्ताभावानां भेदरूपत्वमपि, नन्वभावप्रतियोगिकाभावाधिकरणस्यैवाभावस्याधिकरणरूपत्वं न तु भावप्रतियोगिकस्यापीत्यत आहुः अभावप्रतियोगिकेत्यादि, भावरूपत्वेपीत्यादि प्रतियोगितत्तावच्छेदकयोर्भावरूपत्वेपि, अभावरूपत्वं प्रतियोगिभेदात्यन्ताभावरूपत्वं चेत्यर्थः, लाघवादितिशेषः, तथेहाप्यस्त्विति सर्वेषामप्यवताराणामवतारिणश्च निरूप्यमाणप्रकारभेदानां भेदकानां सत्त्वेप्यभेदः स्वीकृतोस्त्वित्यर्थः, अभावत्वस्य नानाभावानामभावरूपत्वस्य प्रतियोगितत्तावच्छेदकयोश्चाभावरूपत्वस्येत्यर्थः, अप्रयोजकत्वात् ऐक्यबोधकप्रबलप्रमाणत्वात्, स्वमत ऐक्यबोधकप्रमाणमाहुः तच्चेत्यादिना, तच्च धर्मिग्राहकप्रमाणञ्च, नन्वेकस्यैव ब्रह्मणः सर्वेवतारा ब्रह्माभिन्नाश्च तदावतारूपान्तरेऽन्यावतारस्वरूपाभेदेनान्यावतारधर्मवत्त्वेन विभावनयोपासने दोषो न स्यात् सर्वत्रोभयलिङ्गाधिकरणे विरुद्धधर्माधारत्वस्योक्तत्वादत एवंरीत्या विभावने श्रुतितात्पर्यविरोधरूपं दोषं वक्तुं वादिनं प्रत्याहुः अपरञ्चेत्यादि, विज्ञानहेतुः स्वस्य ब्रह्माभेदज्ञानहेतुः, सः विज्ञानहेतुभूतः, निरूप्यते शाखाभेदेषु भिन्नो भिन्नो निरूप्यते, तत्र को हेतुः भिन्नरूपैर्भिन्नरूपधर्मैश्चैकस्यैव विभावने ब्रह्मविज्ञानसम्भवे श्रुतिषु नानाधर्मवत्त्वेन नानारूपनिरूपणप्रयासे को हेतुरित्यर्थः, पृच्छामः एकाकारगुणैरेकरूपतया चानिरूपणे श्रुतितात्पर्यं पृच्छाम इत्यर्थः, प्राप्तिं एकरूपताया उक्ताया उपास्ये प्राप्तिं, अनिरूपणे सर्वशाखास्वेकस्वरूपताया अनिरूपणे, एवं सति उपसंहारेणापेक्ष्यादुपास्यरूपाणामेकजातीयतालाभे सति, सर्वशाखासूपास्यानामेकजातीयताङ्गीकारे न्यूनगुणनिरूपकशाखायां स्वोक्तगुणानामनिरूपणेप्युपासनाकरणप्रकारमाहुः तथा हीत्यादिना, तस्य सकलोपासनासाध्यब्रह्मविज्ञानस्य, एकजातीयत्वात् त्वन्मत एकजातीयत्वात्, घटवदिति घटो यथाशेषस्वजनकसमुदायसाध्यस्तद्वदुपासनापि त्वदभिमतरीत्या सकलगुणानुसन्धानसाध्यातोऽशेषगुणनिरूपकैव श्रुतिर्निरूपयेत् इत्यस्य पूर्वोक्तोपासनामित्यनेनान्वयः, अन्यथा तु अन्यशाखाश्रुतिस्त्वित्यर्थः, न वदेत् उपासनोपयोगिगुणान् न वदेदित्यर्थः, उपसंहार्यानिति, त्वन्मते उपासनाया अशेषगुणसाध्यत्वाद्न्यूनगुणनिरूपिका सकलगुणान्निरूपयेत् स्वोक्तानपि वा न निरूपयेदि-

---

१. तद्रूपत्वमिति सर्वेष्वादर्शः । २. तावदित्याद्यादर्शान्तरेषु पुंव्यतिरिक्तेषु । ३. भावाभावेत्यादि सर्वेष्वप्यादर्शेषु । ४. ब्रह्मज्ञानेत्यादि पुंपुस्तके । ५. यत्प्रकारकेत्यादि गोपुस्तके । ६. इदं पदं लुप्तं केंपुस्तके । ७. °फलत्वस्येति केंपुस्तके । ८. °कृतेत्यादि गोपुस्तके । ९. गुणानित्यादि बपागोषु । १०. सत्येत्यादि कबपापुंगोषु ।

संहारस्याप्यसम्भवेनोपासनाया एवासम्भवापातात्, तस्मात् स्वस्वशाखोक्तप्रकारिकोपासनायामेव सर्वेषामधिकारात्तथैवं ब्रह्मविज्ञानं भवति, तैत्तिरीयाणां वाजसनेयिप्रभृतीनां चाग्निष्टोमसम्पत्त्या स्वर्ग इव, प्रकृते ब्रह्मैक्यात्तत्तद्विज्ञानं ब्रह्मविज्ञानमेव, न हि रूपरसगन्धादिमत्यां भुवि पुरुषभेदेनैकस्यैवैकैकप्रकारकं यद्भूज्ञानं न तद्भूज्ञानं, एतेनानन्तधर्मवत्त्वं ब्रह्मणि ज्ञापितं, तदुक्तं "परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च" (श्वेता. ६. ८.) इति, अत्र 'स्वाभाविकी'इतिविशेषणादविद्याकल्पितत्वं शक्तीनां निरस्तम् ।

केचित्त्वाथर्वणिकानां विद्यां प्रति शिरोव्रतापेक्षणादन्येषां तदनपेक्षणाद्विद्याभेद इति प्राप्त उच्यते स्वाध्यायस्यैवं धर्मो न विद्यायाः, कथमिदमवगम्यते ? यतस्तथात्वेन स्वाध्यायधर्मत्वेन समाचारे वेदव्रतोपदेशनपरे ग्रन्थ आथर्वणिका इदमपि वेदव्रतत्वेन समामनन्ति "नैतदचीर्णव्रतोधीते" (मुण्ड.३.२.११.) इति चाधिकृतविषया'दैत'च्छब्दा'दध्ययन'शब्दाच्च स्वोपनिषदध्ययनधर्म एवैष इति निर्धार्यते, तस्मादनवद्यं विद्यैकत्वमितिसूत्रार्थं वदन्ति,

स चिन्त्यते, नह्यस्य विद्याधर्मत्वं विद्याभेदकं, उक्तन्यायेनान्यत्रापि तदुपसंहारस्य वक्तुं शक्यत्वात्, न चानुपसंहारार्थमेवातद्धर्मत्वं बोध्यत इति वाच्यं, उपक्रमोपसंहाराभ्यां विद्यैकत्वनिर्णयस्यैव दृश्यमानत्वादुपेक्ष्य इव भाति, ननु तदुक्तिर्यथा तथास्त्वतद्धर्मत्वबोधनस्यानुपसंहारार्थकत्वे कानुपपत्तिरिति चेत्, उच्यते, सूत्रस्य तदुक्तार्थत्वे हि तत्तात्पर्यकल्पना, स एव च न साधीयान्, तथा हि "स्वाध्यायोध्येतव्यः" (तैत्ति.आर.२.१५.) इत्यादिषु स्वाध्यायशब्दस्य वेदवाचकत्वं प्रसिद्धं समाचारशब्दस्य विहितक्रियावाचकत्वं च, तत्रोभयोरपि मुख्योर्थो बाध्यते, तस्मिन् सम्भवति तद्बाधस्त्वयुक्तः, किञ्चैवं "नन्वग्निष्टोममेवोद्दिश्य" इत्यादिनोक्ताशङ्काया अनिवृत्तिरिति ।

त्यर्थः, स्वशाखेत्यत्र मात्रपदेनेतरशाखाध्ययनज्ञानयोर्निरासः, उपासनासिद्ध्यर्थं उपासनाकृतिकारबोधनार्थं, परशाखाऽज्ञानेनेत्यत्राध्ययनाभावो हेतुर्बोध्यः, तत् शाखान्तरं, एतेन अनन्तशाखास्वनन्तगुणानां निरूपणेन, तत् ब्रह्मण्यनन्तधर्मवत्त्वं, केचित् शङ्करप्रभृतयः, स्वाध्यायस्यैव आथर्वणवेदोपनिषदध्ययनस्यैवेदं शिरोव्रतस्याध्ययनाङ्गत्वं न विद्याङ्गत्वमिति कथं ज्ञायत इति हेतुप्रश्न उत्तरमाहुः यत इत्यादि, अधिकृतेत्यादि, आथर्वणोपनिषदध्येतृविषयादित्यर्थः, एषः शिरोव्रतधर्मः, वदन्ति सिद्धान्तिनो वदन्तीत्यर्थः, स चिन्त्यते सूत्रार्थः सिद्धान्तिनो निश्चयार्थं विचार्यते, अस्य शिरोव्रतस्य, विद्याधर्मत्वमित्यादि, तथा चोक्तरीत्याध्ययनधर्मत्वेन विद्याधर्मत्वं विद्याभेदकत्वं वा न वक्तुं शक्यत इत्यर्थः, उक्तन्यायेन 'नैतदचीर्णव्रत' इतिरीत्येत्यर्थः, अन्यत्र अध्ययने, उपसंहारस्य शिरोव्रतोपसंहारस्य, अनुपसंहारार्थं विद्याभेदमङ्गीकृत्य विद्यान्तरधर्माणां विद्यान्तरेनुपसंहारार्थं, अतद्धर्मत्वं शिरोव्रतस्याध्ययनाभावो विद्याधर्मत्वं चेत्यर्थः, उपेक्ष्यः शिरोव्रतस्य विद्याधर्मत्ववक्ता उपेक्ष्य इत्यर्थः, नन्वाथर्वणिकानां शिरोव्रतस्य विद्याधर्मत्वं शाबरभाष्य उक्तं तेन च विद्याभेदे सिद्धे सर्वोपनिषदां ब्रह्मण्युपसंहारो न स्यादितिदूषणं भवतामभिप्रेतं तत्रेष्टापत्तिरस्माकमनुपसंहारार्थमेव च शिरोव्रतस्य विद्याधर्मत्वोक्तिर्यथातथास्तु प्रामाणिकत्वेन नोरीक्रियतां तथाप्याह अतद्धर्मेत्यादि, शिरोव्रतस्य स्वाध्यायधर्मत्वाभावस्य विद्याधर्मत्वस्य च बोधनस्येत्यर्थः, अनुपसंहारेत्यादि, सकलोपनिषदां ब्रह्मण्युपसंहाराभावार्थकत्व इत्यर्थः, कानुपपत्तिः को दोषः, सूत्रस्य स्वाध्यायसूत्रस्य, तदुक्तार्थत्वे शिरोव्रतस्य विद्याधर्मत्वनिर्णयार्थत्वे सम्भवति सतीत्यर्थः, तत्तात्पर्यकल्पना सूत्रस्य तदुक्तार्थत्वे शिरोव्रतस्य निर्णयार्थत्वे तात्पर्यकल्पना, स एव उक्तः सूत्रार्थ एव, तदुक्तसूत्रार्थासम्भवमुपपादयन्ति तथा हीत्यादिना, तत्र भवदुक्तसूत्रार्थतात्पर्यकल्पने, उभयोः स्वाध्यायपदसमाचारपदयोः, तस्मिन् मुख्यार्थे, तत् मुख्यार्थः, ननु तात्पर्यनिर्वाहार्थं मुख्यार्थबाधोपि

---

१. स्वेत्यादि पापुस्तके । २. तथैवेति गोपुस्तके । ३. चैकैकेत्यादि वपापुषु, वैकैकेत्यादि दाक्योः । ४. अन्तेत्यादि पापुस्तके प्रमादजम् । ५. स्वाध्यायस्यैष इति सर्वेप्यादर्शाः । ६. अध्ययनशब्दाच्चेति छुप्तं पापुस्तके । ७. नन्विति वपुपुस्तकयोः ।

नन्वाथर्वणोपनिषत्सु पठ्यते "स होवाचाब्जयोनिः योवताराणां मध्ये श्रेष्ठोवतारः को भविता येन लोकास्तुष्टा देवास्तुष्टा भवन्ति यं स्मृत्वा मुक्ता अस्मात् संसाराद्भवन्ति कथं चास्यावतारस्य ब्रह्मता भवति स होवाच तं होवाच नारायणो देवः" (गोपालो. ता. १.) इत्युपक्रम्य मथुरास्वरूपं निरूप्य निगद्यते "यत्रासौ संस्थितः कृष्णः स्त्रीभिः शक्त्या समाहितः" (गोपालो. ता. २.) इति, तेनास्यावतारस्याशेषावताराणां मध्ये श्रैष्ठ्यं निरूप्यते, श्रीभागवतेपि च "एते चांशकलाः पुंसः कृष्णस्तु भगवान् स्वयम्" (श्रीमद्भाग. १. ३. २८.) इति गीयते, पूर्वोक्तरीत्या तु सर्वतुल्यता प्रतीयत इति नैकतरनिर्धारः सम्भवति, किञ्च, ब्रह्मणो निरवयवत्वेनैकस्यांशित्वमन्येषां तदंशत्वमित्यपि वक्तुमशक्यमिति प्राप्तेभिधीयते।

"सत्त्वं यस्य प्रिया मूर्त्तिः" (श्रीमद्भाग. १०.८६.१५.) "विशुद्धसत्त्वं तव धाम शान्तम्" (श्रीमद्भाग. १०. २४. ४.) इत्यादिवाक्यैरप्राकृतो भगवत्स्थानभूतः सत्त्वनामा भगवद्धर्मरूप एवं कश्चनास्ति, यादृशेन रूपेण भगवान् कार्यं कर्तुमिच्छति तादृग्रूपं तं प्रकटीकृत्य तस्मिन् स्वयमाविर्भूयायःपिण्डे वह्निवत् तत्तत्कार्याणि करोति यस्मिन् यस्मिन्नवतारे स सोंश इत्युच्यते, तत्र हि विग्रहस्तत्राविर्भूतं ब्रह्मस्वरूपं च प्रतीयते, विग्रहस्य सत्त्वात्मकत्वेन धर्मरूपत्वात् तत्राविर्भूतस्यैव ब्रह्मत्वात् समुदितस्यावतारत्वेन गणनात् तत्रैकस्यैवांशस्य तद्रूपत्वं यत् तदेवांशत्वं, यत्राधिष्ठानमनपेक्ष्य स्वयमेव शुद्धं साकारं ब्रह्माविर्भवति भक्तार्थं स स्वयं पूर्णो भगवानुच्यते, एतदेव च 'श्रैष्ठ्य'मत एव 'सर्वतः पाणिपादान्त'त्वं स्वस्मिन् स्फुटं ज्ञापयितुं तोकादिभावेनाविर्बभूव, तेन यादृग्यादृग्लीलाविशिष्टं यद्यद्बाल्यपौगण्डाद्यवस्थाविशिष्टं तत्तद्रूपं नित्यमेवेति वयं जानीमः, न चैवं सच्चिदानन्दविग्रहोक्तिः सर्वत्र विरुद्धा भवेदिति वाच्यं,

---

न दोषायेत्यत आहुः किञ्चेत्यादि, एवं विद्यैकत्वमुरीकृत्य मद्योक्तोपासनाधर्माणां ब्रह्मण्युपसंहारानङ्गीकारे, उक्ताशङ्कायाः अग्निष्टोमस्य शाखाभेदेषूपपादितस्यैक्याङ्गीकारे शाखान्तरोक्ताग्निष्टोमाङ्गानां तदन्यशाखीयानामप्युपसंहारेणानुष्ठानापत्तिरित्याकारिकायाः शङ्काया अनुपपत्तिर्विद्याभेद उपासनाधर्माणां भवन्मतेनुपसंहारवच्छाखाभेदेष्वग्निष्टोमभेदे प्राप्तेग्निष्टोमधर्मोपसंहाराशङ्काया एवानुदयादित्युक्तं स्वरूपभेदं स्फुटीकर्तुमारभन्ते नन्वाथर्वणेत्यादि, तापनीयश्रुत्यर्थप्रसिद्ध्यर्थं श्रीभागवतवाक्यमाहुः एते चांशेति, पूर्वोक्तरीत्या 'यदेकमव्यक्ते'त्यादिश्रुत्युक्तरीत्या, सर्वतुल्यता सर्वेषामवताराणां तुल्यब्रह्मरूपता, एकतरनिर्धारः एको धर्म्यवतार इतरेंशकलावतारा इत्येकतरनिर्धारः, 'निष्कलं शान्त'मित्यादिश्रुत्यावतारधर्माणामुपसंहारानुपसंहारचिन्तैवापार्था इत्याहुः किञ्चेत्यादिना, इति प्राप्ते इति पूर्वपक्षे प्राप्ते, विशुद्धसत्त्वं प्राकृतगुणत्रयघटकसत्त्वापेक्षयातिरिक्तं ब्रह्मस्वरूपघटकं सत्त्वं, कार्यं कर्तुं 'ऐतदात्म्यमिदं सर्व'मित्यादिश्रुत्युक्तं कार्यं कर्तुमित्यर्थः, तादृग्रूपं तं स्वरूपघटकं शुद्धसत्त्वं, प्रकटीकृत्य मूर्तित्वेनाविर्भाव्य, स स इति, स सोवतारांशपदेनोच्यत इत्यर्थः, तत्र हि अवतारे हीत्यर्थः, समुदितस्य विग्रहतत्राविर्भूतोभयरूपस्य, तत्र अवतारे, एकस्यैवांशस्य सत्त्वे शुद्ध आविर्भूतांशस्य, तद्रूपत्वं ब्रह्मस्वरूपत्वं, तदेवांशत्वं एको मूर्तिभागोपर आविष्टभाग इति तद्ब्रह्मस्वरूपमेवांशपदेन व्यवह्रियत इत्यर्थः, धर्मिस्वरूपपरब्रह्माविर्भावं साकारं विवृण्वन्ति यत्राधिष्ठानेत्यादिना, अत एव यत एव साकारं पूर्णं तद्ब्रह्मात एवेत्यर्थः, तोकादिभावेनेत्यादि, तथा च यदा यदा यादृग्यादृक् पाणिपादादिपरिमाणानि प्रतीयन्ते तानि च तथैव ब्रह्मस्वरूपनिष्ठानीति 'सर्वत' इतिश्रुत्या बोध्यते, इदमेवोलूखलबन्धने मुखव्यादाने ब्रह्ममोहे नारदमोहे च प्रत्यक्षत एव श्रुत्युक्तार्थः प्रतीतिगोचर आस्तिकानां, नन्वानन्दमात्रकरपादमुखोदरादिमते नित्यावबोधस्य नित्यतोकादिभावस्य सत्त्वाघटितस्वरूपतया ब्रह्मणः सच्चिदानन्दत्वोक्तिर्विरुद्धा स्यादत आहुः नचैवमित्यादि, सर्वत्र

---

१. अवतारक इति पापुस्तके। २. निगद्यनिरूप्यत इति पापुस्तके। ३. एवपदं द्वयं पेपुस्तके। ४. तत्कार्याणीति पापुस्तके।

सत्त्वस्यापि भगवद्धर्मत्वेन सच्चिदानन्दरूपत्वादविरोधात्, मन्त्राधिष्ठानरूपाणि तु विभूतिरूपाणि, एतच्च यथा तथा भक्तिहंसे प्रपञ्चितं, तत्त्वं च "प्रकाशाश्रयवद्वा तेजस्त्वात्" (ब्रह्म. सू. ३. २. २८.) इतिन्यायेन, भगवद्धर्माणामपि सच्चिदानन्दरूपत्वाद्धीनाधिकारिणामप्युपासकानां फलेप्सूनां तत्तत्फलदानार्थमैश्वर्यादिरूपेण तत्र तत्र स्थितत्वमेव, नन्वेकस्यैव शुद्धस्यैवानन्तरूपत्वं भवतैवोक्तमतो मत्स्यादिरूपेष्वपि नाधिष्ठानत्वेन सत्त्वं वक्तुं शक्यं किञ्चैवं निराकारस्वभावत्वं ब्रह्मणः सिध्यतीति सत्त्वाव्यवहितप्राकट्योक्तिरप्यनुपपन्नेति चेत्, मैवं, सत्त्वाधिष्ठानत्वस्य प्रमाणसिद्धत्वेनानपोद्यत्वात्, तच्चोक्तं "यदेकमव्यक्तम्" (महाना. उ. १. ५.) इत्यादि, प्राकट्यं हि भक्तिनिमित्तकं, सा तु बहुविधेति तदनुरूपं प्राकट्यमपि तथा, सर्गादिकार्येष्वधिकृतानां भक्तानामितरासक्तिरप्यस्तीत्युपाध्यन्तरितस्नेहवत्त्वाचानन्तरूपत्वेन मत्स्यादिरूपोपि तदर्थं तद्व्यवहित एव प्रकटीभवति, ये तु भगवत्स्वरूपमात्रासक्तास्तदर्थं स्वयमेवातद्व्यवधानेन प्रादुर्भवति, एतेनैव निराकारत्वशङ्कापि निरस्ता, एतेन सोपधिस्नेहवदर्थमेव मत्स्यादिरूपप्राकट्यस्य प्रमाणसिद्धत्वान्निरुपधितद्वदर्थमेव श्रीव्रजनाथप्राकट्यस्यापि तथात्वात् सोपधिस्नेहवत्स्यपि पुरुषार्थदानस्यानुपङ्गिकत्वात् "पुरुषविधः" (तैत्ति. ब्रह्म.) इतिश्रुतेश्चैतदेव रूपं "रसो वै सः" (तैत्ति. ब्रह्म.) इत्यादिश्रुतिप्रतिपाद्यं निरुपधिस्नेहवतां विषयः, इदमेव च 'श्रैष्ठ्यं', मत्स्यादिरूपं तु सोपधितद्वतामेव तथा, तादृक्तद्वतामर्थ एव प्राकट्यादित्यवसीयते, एवं सति गुणभेदस्याप्रयोजकत्वात् सर्ववेदान्तप्रत्ययत्वं ब्रह्मणो निष्प्रत्यूहम् ॥ ३ ॥

श्रुतिषु, भगवद्धर्मत्वेनेत्यादि, तथा च विशिष्टस्यैव धर्मिरूपत्वाङ्गीकारान्न तूभयरूपत्वानुपपत्तिरितिभावः, मन्त्राधिष्ठानरूपाणि मन्त्रजपादिना जापकपश्यतां प्राप्तानि रूपाणीत्यर्थः, विभूतिरूपाणि परब्रह्मण इतरानधीनत्वेन मन्त्राद्यधीनत्वासम्भवाद्विभूतिरूपाण्येवेत्यर्थः, भक्तिहंसे प्रपञ्चितं भगवतः सर्वात्मत्वेन तत्प्रतिपादकैश्वर्यादिभावसम्भवादिति प्रपञ्चितमित्यर्थः, तत्त्वं च विभूतिरूपं चेत्यर्थः, तत्र तत्र उद्गीथादिरूपेषु, स्थितत्वमेव विभूतिरूपत्वमेवेत्यर्थः, क्वचिच्छुद्धस्य धर्मिणः क्वचित्कलायाः क्वचिदंशस्यावताररूपतेति प्रकारत्रयमसहमानः शङ्कते नन्वित्यादिना, एवं धर्म्यवतार आनन्दस्याकारसमर्पकतावदवतारान्तरेषु सत्त्वस्याकारसमर्पकतेत्यस्यानङ्गीकारे, ब्रह्मणः धर्म्यवतारातिरिक्तावताररूपब्रह्मणः धर्म्यवतार आनन्दस्यैवाकारसमर्पकत्वादिति बोध्यं, प्राकट्योक्तिः अंशकलावताराणां प्राकट्योक्तिः, समाधानमाहुः मैवमित्यादिना, सत्त्वाधिष्ठानत्वस्येत्यादि, धर्मिणि सत्त्वधर्मस्याधिष्ठानतानन्दआकारसमर्पक इतरावतारेषु सत्त्वमेवाधिष्ठानरूपमाकारसमर्पकमितिरीत्यानन्तेष्वपि रूपेषु साकारत्वस्य प्रमाण सिद्धत्वेन साकारानन्तरूपत्वस्यानपोद्यत्वात्, तच्च साकारानन्तरूपत्वे प्रमाणं चेत्यर्थः, प्राकट्यं हि ब्रह्मस्वरूपाणां प्राकट्यं हि, सा बहुविधा भक्तिर्बहुविधा, सकामनिःकामभेदेन कामानां भेदेन चेत्यर्थः, तदनुरूपं भक्त्यनुरूपं, तथा व्यवहिताव्यवहितभेदेन नानाविधं, उपाध्यन्तरितेत्यादि, तथा च कामनोपाध्यन्तरितस्नेहवत्त्वात्तेषां तान् प्रति रूपप्रादुर्भावोपि सत्त्वोपाधिव्यवधानेनैवेति बोध्यमन्यथा तेषां स्वरूपलाभः स्यान्न तु काम्यफललाभ इत्यर्थः, तद्व्यवहितः सत्त्वोपाधिव्यवहितः, स्वयमेव आनन्दरूप एव, अतद्व्यवधानेन मलिनसत्त्वाव्यवधानेन, एतेन अधिकारिभेदेन प्राकट्यभेदनिरूपणेनेत्यर्थः, निरुपाधितद्वदर्थं निरुपाधिस्नेहवदर्थं, तथात्वात् निरुपाधिस्नेहवद्भक्तार्थत्वात्, तथा फलदात्, एवं सति नानाविधभक्तिभेदैर्नानारूपैरेकस्यैव प्रकटीभावे सतीत्यर्थः, गुणभेदस्य तत्तत्स्वरूपनिष्ठधर्मभेदस्य, अप्रयोजकत्वात् धर्मिभेदप्रयोजकत्वासम्भवात्, सर्ववेदान्तेति निखिलनानारूपप्रतिपादकसर्ववेदान्तः ॥ ३ ॥

---

१. मन्त्राद्यधिष्ठातृरूपाणीति सर्वत्र । २. अनपनोद्यत्वादित्यादर्शान्तराणि । ३. अनन्तरूपमित्यधिकं बपागोषु । ४. न तथेति वंपुस्तके । ५. तद्व्यवधानेनेति कदापुषु । ६. °त्वाशङ्केति बपागोषु । ७. निरुपधितत्तदर्थमिति बपापुस्तकयोः, निरूपयितुं तदर्थमेवेति गोपुस्तके । ८. सोपाधीत्यादि सर्वेष्वादर्शेषु । ९. इत्यादिषु प्रतिपाद्यमिति गोपुस्तके । १०. सोपाधिस्नेहवतामिति ग्रुंपुस्तके सोपाधितद्वतामिति गोपुस्तके । ११. अध्यवसीयत इति पुंपुस्तके ।

दर्शयति च ॥ ४ ॥

वेदैकत्वेन विद्यानामेकत्वं श्रुतिर्दर्शयति "सर्वे वेदा यत्पदमामनन्ति" (कठो. २. १५.) इत्यादिना, उपासनाप्रकारभेदेनोपास्यभेददर्शने दोषं च दर्शयति "यदा ह्येवैष एतस्मिन्नुदरमन्तरं कुरुते अथ तस्य भयं भवति" (तैत्ति. ब्रह्म.) इति, 'उत्' इत्यव्ययमप्यर्थकं, तथा च 'अरम्' अल्पम'प्यन्तरं कुरुत' इत्यर्थः ॥ ४ ॥

ननु पूर्वसूत्रोक्तरीत्या गुणोपसंहारो न क्वचिदपि प्राप्तावसर इति सिद्धं, दृश्यते चोपसंहारः श्रीरामोपनिषत्सु "यो वै ये मत्स्यकूर्माद्यवताराः" (रामो. ता. ५.) इत्यादिनोक्तावताररूपत्वस्य श्रीरामे "नमस्ते रघुवर्याय रावणान्तकराय च" (श्रीमद्भाग. १. ७.) इत्यादिषु 'ते' इति युष्मच्छब्दविषये श्रीव्रजनाथे रघुवर्यत्वादेरित्याशङ्क्य तत्प्रयोजकं रूपमाह उपसंहार इत्यादिना,

उपसंहारोर्थाभेदाद्विधिशेषवत्समाने च ॥ ५ ॥

उक्तस्थलादिषु य[1] उपसंहारः स त्वर्थस्य पदार्थस्य भगवल्लक्षणस्योभयत्राप्यभेदादित्यर्थः, नन्वेवं सति मत्स्ये शरचापादिकं पुरुषे[2] शृङ्गादिकं भावनीयं स्यादिति चेत् तत्राह विधिशेषवदिति, यथा विधिविशेषाणाम[3]ग्निहोत्रादीना[4]मग्निहोत्रत्वादिलक्षणे धर्मे समानेपि सति स्वस्व[5]शाखोक्तप्रकारकस्यैव करणं नान्यशाखोक्तधर्मोपसंहार, एवमिहापि तत्तदवतारोपासकस्य तत्तदसाधारणधर्मवत्त्वेनैवोपासनं नान्यावतारधर्मवत्त्वेनापीत्यर्थः, यद्वा मत्वर्थीयो वत्प्रत्ययोत्र, तथा च विधिशेषोर्थवादस्तद्वत्समानं च भवति यत्तत्र चोपसंहार इत्यर्थः, अत्रैवं ज्ञेयं, एकस्यां श्रुतौ यस्य कर्मणो यत् फलमुच्यते तदितरस्यां[6] तस्यैव कर्मणस्तदितरत् फलमुच्यते, एवं सति द्वितीयश्रुत्युक्तफलकामनयापि तदेव[7] कर्म कर्तव्यं भवतीति तत्फलसाधकत्वस्योपसंहारः, यथा "यद् वैश्वदेवेन यजते प्रजा एव तद् यजमानः सृजते" (तैत्ति. ब्रा. १. ४. ११.) इत्येका श्रुतिरस्य यागस्य प्रजाफलकत्वमाह, "यद् वैश्वदेवेन यजते अग्निमेव तत् संवत्सरमाप्नोति तस्माद्वैश्वदेवेन यजमानः संवत्सरीणां स्वस्तिमाशास्त इत्याशासीत" (तैत्ति. ब्रा. १. ४. ११.) इति द्वितीया श्रुतिराह तत्रोक्तरीतिरिति ।

यत्तु विधि[8]शेषाणामग्निहोत्रादिधर्माणां तदेवैकमग्निहोत्रादिकर्म सर्वत्रेत्यर्थाभेदादुपसंहार इति, तन्न साधु, अग्निहोत्रादेस्तत्तच्छाखिनां स्वस्वशाखोक्तप्रकारस्यैव करणादतिरेके प्राय-

---

दर्शयति च ॥ ४ ॥ विद्यानां नानास्वरूपप्रतिपादकोपनिषदां, एकत्वं एकार्थप्रतिपादकत्वं, दोषं 'अथ तस्य भयं भवती'तिभयरूपं दोषं संसारसम्बन्धरूपम् ॥ ४ ॥

उपसंहारोर्थाभेदाद्विधिशेषवत्समाने च ॥ ५ ॥ पूर्वसूत्रोक्तरीत्या स्वाध्यायसूत्रोक्तरीत्या, गुणोपसंहारः अवतारान्तरधर्माणामवतारान्तरेषूपसंहारः, श्रीराम इति, तथा च मत्स्यकूर्माद्यवतारत्वस्य श्रीराम उपसंहारात् पूर्वसिद्धं विरुद्धमित्यर्थः, इत्याशङ्क्य इत्याशङ्कायां प्राप्तायां, तत्प्रयोजकं इतरधर्माणामत्रोपसंहारे प्रयोजकं, एवं सति भगवद्रूपार्थमैक्यस्योपसंहारे प्रयोजकत्वे सति, विधिविशेषाणां विधिवाक्यश्रवणानन्तरं जायमानबोधविषयाणां, तद्वत्समानं चेति, तथा च 'धर्मे वा एतद्यज्ञस्य क्रियते यत्प्रयाजानुयाजौ' इत्याद्यर्थवादानां नानाशाखीयदर्शपूर्णमासादिषु यथा स्तावकत्वेनोपसंहारस्तद्वदित्येकोर्थः, अथवा तादृशार्थवादवत् समानं कर्मफलद्वये समानं तत्र कर्मणि फलद्वयजनकत्वस्योपसंहार इत्यर्थः, तदेवोपपादयन्ति तत्रोक्तरीतिरित्यादि, एवं 'चार्थाभेदा'दित्यत्र धर्माभेदादित्यर्थः, 'समाने' इत्यत्र फलद्वये समाने, 'च' फल-

---

१. य इति लुप्तं गोपुस्तके । २. पुरुषे चेति बपागोषु । ३. विधिशेषाणामिति सर्वेष्वादर्शाः । ४. अग्निहोत्रादीनामिति लुप्तं पापुस्तके । ५. स्वेत्यादि पापुस्तके । ६. इतरस्यां तस्यामिति बपापुंगोषु । ७. तत्तदेव कर्तव्यमिति पुंपुस्तके । ८. विधिविशेषाणामिति गोपुस्तके ।

श्चित्तश्रवणाच्चान्यशाखोक्तधर्मोपसंहारः शक्यवचनः, प्राणाद्युपासनास्वधिकगुणस्येतरत्रोपसंहारे न किञ्चिद्बाधकं दृश्यत इति तत्र स कर्तुं शक्यत इति चकारेण तदादयः सङ्गृह्यन्ते, वस्तुतस्तु पूर्वसमुच्चयार्थश्चकारः, शाखान्तरोक्तधर्मोपसंहारप्रयोजनाभावस्य "स्वाध्यायस्य तथात्वेन" (ब्रह्म. सू. ३. २. ३.) इत्यत्र निरूपितत्वादुपसंहारबीजमनेन सूत्रेणोक्तम् ॥ ५ ॥

अन्यथात्वं शब्दादिति चेन्नाविशेषात् ॥ ६ ॥

ननूपासनासूक्तन्यायेन गुणोपसंहारो ह्युपास्यानां ब्रह्मत्वेनैक्ये सति भवति, मिथोविरुद्धानां गुणानां शान्तत्वक्रूरत्वतपोभोगादीनामुपसंहारे क्रियमाणे स्वरूपाणामन्यथात्वमब्रह्मत्वं स्यादित्यर्थः, तत्र हेतुः शब्दादिति, एकत्वैकरसत्वादिधर्मनिरूपकश्रुतेरित्यर्थः, समाधत्ते नाविशेषादिति, एकरसत्वं यथा श्रुतिबलान्निर्णीयते तथा विरुद्धधर्मवत्त्वमपि तत एव तथेत्यर्थः, तेन वस्त्वेव तत् तादृङ्मन्तव्यमितिभावः ॥ ६ ॥

पूर्वसूत्रोक्ताशङ्कानिराकरणं वा विकल्पेन पूर्वोक्तात् प्रकारान्तरेण कर्तव्यमित्याह न वेति[३],

न वा प्रकरणभेदात् परोवरीयस्त्वादिवत् ॥ ७ ॥

तमेवाह प्रकरणभेदादिति, अत्रायं भावः, श्रुतिप्रामाण्याद्यावच्चदुक्तधर्मवद्ब्रह्मेति मन्तव्यं, एवं सति यादृशोधिकारिणो यादृग् वेद्यं रूपं तादृशस्य तस्य तादृक् तन्निरूपयति प्रकरणभेदेन, तथा च ज्ञानप्रकरणे ज्ञानाधिकारिणो यादृग्रूपं ज्ञेयं तादृक् तैत्तस्मै निरूपयति "अदृश्यमग्राह्यम्" (मुण्ड. १. १. ६.) इत्यादिरूपा श्रुतिः, भक्तिप्रकरणे तु भक्तेर्बहुविधत्वाद् यादृग्यादृग्भक्तानां यादृग् यादृक् तदनुभवविषयस्तादृक्तादृक् तन्निरूपयत्याथर्वणोपनिषदिति, अत्र दृष्टान्तमाह परोवरीयस्त्वादिवदिति, "अस्मिन् मे लोकेर्द्धुकं स्यात्" (तै. सं. ६. २. ३.) इति कामवत आराग्रावान्तरदीक्षा पूर्वमुक्ता तदग्रे "परोवरीयसीमवान्तरदीक्षामुपेयाद्यः कामयेतामुष्मिन् मे लोकेर्द्धुकं स्यादिति चतुरोग्रेथ त्रीनथ द्वावथैकमेषा वै परोवरीयस्यवान्तरदीक्षा" (तैत्ति. सं. ६. २. ३.) इति पठितं, अस्य दीक्षाप्रकरणे पठितत्वा-

---

इत्यतत्कल्व'स्वोपसंहार' इत्यर्थः; तदादयः गणनिर्माप्य; सङ्गृह्यन्त इति तथा 'जामिकं नाति नु तद्धानि'-रितिन्यायादधिकग्रहणेपि मूलसङ्ख्याया अबाधने प्रकृतवैगुण्याभावात् सङ्गृह्यन्त इत्यर्थः, पूर्वसमुच्चयार्थः अभेदे उपसंहारसमुच्चयार्थं इत्यर्थः ॥ ५ ॥

अन्यथात्वं शब्दादिति चेन्नाविशेषात् ॥ ६ ॥ अब्रह्मत्वं विरुद्धधर्माणां धर्मिभेदकत्वादित्यर्थः ॥ ६ ॥

न वा प्रकरणभेदात् परोवरीयस्त्वादिवत् ॥ ७ ॥ आशङ्कानिराकरणं 'अन्यथात्वं शब्दा'दिति पूर्वसूत्रभागेन कृता याशङ्का तस्या अनेन सूत्रेण प्रकारान्तरेण निराकरणं क्रियत इत्यर्थः, तदुक्तः श्रुत्युक्तः, आथर्वणोपनिषदिति, तथा च ब्रह्मस्वरूपं सकलतद्गुणाश्च सर्वत्रोपास्येषु तिष्ठन्ति तथापि यादृशोपासकं प्रति यावन्तो गुणा भगवता प्रकटीक्रियन्ते तादृशस्थले श्रुत्या तावन्त एव निर्णीयन्त इति तथा श्रुतिभिर्निरूपणात् तात्पर्यमवसीयत इति, अत्र दृष्टान्तमित्यादि, एवमधिकारिभेदेन श्रुत्या भिन्नप्रकारेण ब्रह्मनिरूपणं कृतं तत्र दृष्टान्तमाहेत्यर्थः, विषयवाक्यमुक्त्वा दृष्टान्तं विशदयन्ति अस्मिन्नित्यादि, एतच्छ्रुत्यर्थस्तु 'अहीना'ख्ये सोमयागे 'अहीन'सत्रे चोपसद्दिनसङ्ख्यां पूर्वं विधाय तेषु दिनेष्ववान्तरदीक्षाङ्गव्रतपानस्तनसङ्ख्यां विधत्ते, तत्रावान्तरदीक्षा द्विविधा, योऽस्मिँल्लोके समृद्धिशीलं फलं कामयते तस्याराग्रमात्रावान्तरदीक्षा, सोमक्रयदिने सायमेकस्तनं, अपरेद्युः प्रातर्द्वौ स्तनौ, सायं त्रीन् स्तनान्, परेद्युः प्रातश्चतुःस्तनान्, एवम्पाने आराग्रदीक्षा सिध्यति सा पूर्वमुक्ता, आरं बलीवर्दप्रतोदनलोहं तद्वदग्रं मुखं यस्याः सा आराग्रा, तदग्रे परोवरीयसी वाक्येन्या, तत्र विपरीतं व्रतं, सोमक्रये चतुरः स्तनान् दुह्युः, अपरेद्युः प्रातस्त्रीन् सायं द्वौ, परेद्युः प्रातरेकमित्येवं दिनत्रयं, एवं दोहनक्रमस्थले परोवरीयसी द्वितीयावान्तरदीक्षा बोध्या, अस्येत्यादि,

---

१. स्वाध्यायस्येति लुप्तं पापुस्तके। २. तत्पदं लुप्तं पुंपुस्तके। ३. न चेतीति बपाठः प्रमादजः। ४. तत्पद लुप्तं बपापुंगोषु। ५. यादृगनुभवविषय इत्यादि कंपुस्तकपाठस्तु प्रमादज.।

दीक्षां विनोक्तरीत्या व्रते तु न परोवरीयस्त्वमेवं भक्तिप्रकरणीयानामाथर्वणोपनिषदाद्युक्तरूपाणां न भक्तिरहितोपास्यत्वं, ज्ञानसाधनत्वेन विष्णुस्मरणादावपि क्रियमाणे भक्तित्वं नेति ।

अथवा पूर्वसूत्रेण सर्वरूपेषु मिथः सर्वधर्माणामुपसंहारः प्राप्तः, स चैकान्तिभक्तानुभवविरुद्ध इत्यत्र व्यवस्थितविकल्पमाह न वेत्यन्तं, सर्वेष्ववतारेषु भगवदवतारत्वेन साधारणी भक्तिर्यस्य स सर्वत्रोपसंहारं करोतु नाम, यस्त्वेकान्ती तस्य स्नेहोत्कर्षेणान्तःकरणमेकस्मिन्नेव रूपे पर्यवसितमिति रूपान्तरमन्तःकरणारूढं न भवत्येवेति नोपसंहारसम्भावनापीति तदेतदुच्यते न वेत्यनेन, तत्र हेतुः प्रकरणभेदादिति, श्रुत्यादिषु तत्तदधिकारिणमुद्दिश्य तत्तत्प्रकरणमुक्तं, तेनात्र प्रकरणपदेनाधिकार उच्यते, एवं सत्युपासकादिभ्य उक्तरीत्योत्कृष्टाधिकारादित्यर्थः सम्पद्यते, परोवरीयस्त्वादिवदिति, परस्मात् परश्च वराच्च वरीयानिति परोवरीयानुद्गीथः, तथा चाक्ष्यादित्यादिगतहिरण्यश्मश्रुत्वादिगुणविशिष्टोपासनाया अप्युद्गीथोपासनत्वेन साम्येपि सर्वोत्कृष्टत्वेनात्रोद्गीथो भासत इति न हिरण्यश्मश्रुत्वादिगुणोपसंहारः परोवरीयस्त्वगुणविशिष्टोद्गीथोपासनायामेवं प्रकृतेपीति ॥ ७ ॥

संज्ञातश्चेत् तदुक्तमस्ति तु तदपि ॥ ८ ॥

एकान्त्यनेकान्तिनोरपि श्रीरामोपासकत्वादिसंज्ञा त्वविशिष्टेत्येकान्तिनोप्युपसंहारो युक्त इत्याशङ्कोत्तरं तु "न वा प्रकरणभेदात्" (ब्रह्म. सू. ३. ३. ७.) इत्यनेनैवोक्तं, संज्ञा तु लौकिकी, अधिकारस्त्वान्तरः, स एव बलीयानिति, संज्ञैकत्वस्य हेतोरन्वयव्यभिचारमाह अस्ति तु तदपीति, प्रमितभेदेष्वप्युपासनेषु परोवरीयस्त्वादिषु संज्ञैकत्वमुद्गीथोपासनेष्वस्तीत्यर्थः ॥८॥

अस्य व्रते स्तनपानक्रमस्य, उक्तरीत्या व्रते स्तनदोहनोक्तक्रमेण व्रते, एवं दीक्षाव्यतिरेकेण क्रियमाणोक्तव्रते दीक्षात्वाभावात्, न भक्तीत्यादि, भक्तिफलातिरिक्तफलार्थं नोपास्यत्वमित्यर्थः, भक्तित्वं नेति, भक्त्यतिरिक्तफलार्थं क्रियमाणत्वाद्भक्तित्वं नेत्यर्थः, पूर्वसूत्रेण 'उपसंहारोर्थाभेदादि'तिसूत्रेण, व्यवस्थितविकल्पं ज्ञानिनामुपसंहारो भक्तानां नेत्येवंविधव्यवस्थितविकल्पार्थं इत्यर्थः, न वेत्यन्तेन न वेतिसूत्रभागेनेत्यर्थः, तत्र व्यवस्थायां, अधिकार उच्यत इति, तथा चोत्कृष्टाधिकारे नोपसंहार इत्युच्यत इत्यर्थः, एवं सति प्रकरणभेदादित्यस्य अधिकारिभेदादित्यर्थे सिद्धे सतीत्यर्थः, उपासकादिभ्य इति प्रकरणभेदादित्यस्यार्थः, फलितार्थमाहुः उक्तेत्यादि, इत्यर्थ इति, तथा च प्रकरणभेदाद्व्यवस्थेत्यस्योत्कृष्टाधिकाराच्चोपसंहार इति फलितार्थ इतिभावः, उत्कृष्टाधिकारस्यानुपसंहारहेतुत्वं दृष्टान्तेन साधयन्ति परस्मादित्यादि, परात् अक्ष्याद्युद्गीथोपासनापरात्, अत एव वरः श्रेष्ठः, वराच्च वरीयान् वरत्वादेव श्रेष्ठतम इत्यर्थः, उद्गीथः ब्रह्मात्मकरूप उद्गीथः, इदञ्च छान्दोग्य उद्गीथविद्याकुशलेन प्रवाहणेनोक्तमुद्गीथविद्यासमाप्तौ, तथा हि 'आकाशो ह्येवैभ्यो ज्यायानाकाशः परायणं स एष परोवरीयानुद्गीथः स एषोनन्त' इति तद्विद्यायामेवाक्ष्यादित्यादिप्रतीकोपासनाप्युक्तेति, साम्येपि अक्ष्याद्युद्गीथोपासनस्याकाशोद्गीथोपासनस्योद्गीथत्वेन साम्येपीत्यर्थः, सर्वोत्कृष्टत्वेन इतरोद्गीथापेक्षयाकाशरूपोद्गीथस्योत्कृष्टत्वेन, उद्गीथः आकाशरूपोद्गीथः, न हिरण्येत्यादि, अक्ष्याद्युपासनायां विद्यमानहिरण्यश्मश्रुत्वादेर्नाकाशोद्गीथोपासनायामुपसंहार इत्यर्थः ॥ ७ ॥

संज्ञातश्चेत्तदुक्तमस्ति तु तदपि ॥८॥ अधिकारिभेदेनोपसंहारानुपसंहारव्यवस्थां पूर्वोक्तां द्रढयितुं किञ्चिदाशङ्क्य सूत्रं व्याकुर्वन्ति एकान्तीत्यादि, एकान्त्यनेकान्तिनोः ज्ञानिभक्तयोः, एकान्तिनोपि भक्तस्यापीत्यर्थः, इत्यनेनैवोक्तं अधिकारस्योपसंहारानुपसंहारव्यवस्थापनेनोक्तमित्यर्थः, संज्ञैकत्वस्येत्यादि, हेतोः उपसंहारहेतोः, अन्वयस्य व्यभिचारः यत्र यत्र संज्ञैकत्वं तत्र तत्र सर्वत्र संज्ञिकधर्माणां संज्ञिषूपसंहार इत्यन्वये व्यभिचार इत्यर्थः, प्रमितभेदेषु निर्णीतभेदेषु, तथा च छान्दोग्य उद्गीथावयवप्रणवस्योद्गीथत्वेनैवमादित्याक्षिपुरुषस्य

१. अथवापदानन्तरं "न भेदादिति चेदेकस्यामपि' (ब्र. सू. ३. ३. २.) इत्यस्य भाष्ये भक्तिमार्गीयव्यवस्थाप्रतिज्ञापूरणाय पक्षान्तरमाहु." इति गोपुस्तकेऽधिकम् । २ ऐकान्तिकेत्यादि वपागोषु । ३. नवेत्यादिनेति सर्वेष्वादर्शः । ४. °भेदेनेति वपागोषु । ५. °त्वेनैवेति वपापुषु ६. °त्वादीत्यादि पुपुस्तके । ७. प्रमितीत्यादि कपुपुस्तकयोः, प्रमितेरिति कंपुस्तके । ८. °ष्वस्तीत्यर्थ इति पुपुस्तके, °त्यस्तीत्यर्थ इति पुंपुस्तके ।

अथेदं विचार्यते, उपास्येषु रूपेषु बाल्यपौगण्डादिकमप्युच्यते, तथा सति विग्रहे न्यूनाधिकभाव आपततीति तत्रोक्तं सच्चिदानन्दत्वमनुपपन्नं स्यात् तेषां सदैकरूपत्वात्, प्राकृतत्वे च सर्वमसमञ्जसं स्यादिति प्राप्त आह व्याप्तेरिति,

व्याप्तेश्च समञ्जसम् ॥ ९ ॥

"सर्वतः पाणिपादान्तम्" (श्वेता. ३. १६.) इत्यादिश्रुतेः साकारमेव व्यापकमिति, चकारात् "सर्वरसः" (छान्दो. ५. १४. २.) इतिश्रुत्या रसात्मकत्वेन भक्तानां यादृशरूपेण लीलारसानुभवस्तादृग्रूपं क्रमेण योगमायापसारणेन प्रकटीकरोतीति बाल्यादिभावोपपत्तेः सर्वमुपपन्नमित्यर्थः, तेन यावदुक्तधर्मवद्ब्रह्मेति सिद्धम् ॥ ९ ॥

ननु ब्रह्मधर्मत्वेन ते सर्वे नित्या वाच्यास्ते च तत्तद्भक्तविशिष्टास्तत्र चैकस्यैव भक्तस्य पौर्वापर्येणानेकलीलासम्बन्धित्वं श्रूयते, तथा च पूर्वलीलाया नित्यत्वेन तत्सम्बन्धिभक्तस्यापि तथात्वं वाच्यं, एवं सति तस्यैवाग्रिमलीलासम्बन्धोशक्यवचनः, तथावचने तु पूर्वलीलाया नित्यत्वं भज्येत, नित्यत्वे त्वग्रिमलीलासम्बन्धिनो भिन्नत्वं स्यात्, तच्चानुभवतदावेदकमानविरुद्धमित्यत उत्तरं पठति,

सर्वाभेदादन्यत्रेमे ॥ १० ॥

लीलामध्यपातिनां सर्वेषां पदार्थानां ब्रह्मणा सहाभेदाद्ब्रह्मणश्चैकत्वात् पूर्वलीलातोन्यत्रोत्तरलीलायामपीमे पूर्वलीलासम्बन्धिन एव त इत्यर्थः, अत्रेदमाकूतं, "रसो वै सः" (तैत्ति. ब्रह्म.) इतिश्रुत्याँ "सर्वरसः" (छान्दो.५.१४.२.) इतिश्रुत्या च सर्वरसात्मकत्वं ब्रह्मणो

प्रतीकस्योद्गीथत्वेनोपासनमुक्तं, एवमाकाशमुपक्रम्य परोवरीयस्त्वगुणकमुद्गीथोपासनमुक्तं, न हि तत्र संज्ञैकत्वसत्त्वेपि धर्मोपसंहारोस्तीत्यन्वयव्यभिचार इत्यर्थः ॥ ८ ॥

व्याप्तेश्च समञ्जसम् ॥ ९ ॥ तथा सति ब्रह्मत्वाभिमते बालपौगण्डाद्यवस्थाङ्गीकारे सति, तत्रोक्तं ब्रह्मप्रकरणीयश्रुतिपूक्तं, तेषां ब्रह्मनिष्ठसच्चिदानन्दानां, सर्वमिति उपास्यरूपेषु साधितं ब्रह्मत्वं तेषां रूपाणां ब्रह्मत्वेनोपासने श्रुतिविरोधपरिहारादिकञ्चेत्यर्थः, इति प्राप्ते उक्तरीत्यावतारेष्वब्रह्मत्वप्रसक्त्यानुपास्यत्वे प्राप्ते, आह तत्परिहारं सूत्रकार आहेत्यर्थः, यादृशरूपेण यादृशयादृशरूपेण, क्रमेण भक्तानां लीलारसानुभावक्रमेण, सर्वमुपपन्नं व्याप्तेर्व्याप्तेः समञ्जसमित्युक्तत्वादाकाशे परिमाणन्यूनाधिकभानवद्ब्रह्मण्यपि सकलपरिमाणभानोपपत्तेः सर्वमुपपन्नमित्यर्थः, तेन 'यदेकमव्यक्तमनन्तरूप'मितिश्रुत्या साकारव्यापकब्रह्मरूपाणां प्रतीत्युपपादनेन, यावदुक्तधर्मवत् पूर्वोक्तबाल्यपौगण्डादिनिखिलधर्मवत् ॥ ९ ॥

सर्वाभेदादन्यत्रेमे ॥ १० ॥ अग्रिमसूत्रमवतारयन्ति नन्वित्यादि, ते सर्वे बाल्यादिधर्माः, नित्याः 'अनुच्छित्तिधर्मे'तिश्रुतेर्नित्या इत्यर्थः, ते च अवस्थारूपधर्माश्च, तत्तद्भक्तेत्यादि, तत्तदवस्थाविशिष्टोपासकभक्तसहितास्ते धर्मा नित्या वाच्या इत्यर्थः, श्रूयते 'यो नन्दः परमानन्द' इत्यादि कृष्णोपनिषदि श्रूयते, तस्यैव पूर्वलीलानुभवितुर्भक्तस्यैव, अशक्यवचनः एकस्मिन्नेकदा विरुद्धलीलाद्वयस्यासम्भवादेकस्मिन् भक्त एकदा नानालीलानुभवस्य चासम्भवादशक्यवचन इत्यर्थः, तथावचने तु पूर्वलीलायास्तिरोधानोक्तौ तु, नित्यत्वे पूर्वलीलाया नित्यत्वे, अग्रिमलीलासम्बन्धिनः ब्रह्मणो भक्तस्य चेत्यर्थः, भिन्नत्वं स्यात् एकस्मिन्नेकदा विरुद्धधर्मद्वयस्यैकस्मिन्नेकदा विरुद्धधर्मद्वयानुभवस्य चासम्भवाद्भिन्नत्वं स्यादित्यर्थः, तच्च सम्बन्धिभिन्नत्वं च, अनुभवतदावेदकमानविरुद्धमिति, एकस्मिन्नेव नानालीलास्तदनुभवोप्येकस्मिन्नेकस्यैवेति श्रुत्युक्तानुभवसम्बन्धैक्यबोधकमानविरुद्धमित्यर्थः, ब्रह्मणा सहाभेदादिति 'तस्मान्न भिन्ना एतास्तु ताभिर्भिन्नो न वै प्रभुः भूमावुत्तारितं सर्वं वैकुण्ठं स्वर्गवासित'मिति कृष्णोपनिषच्छ्रुतौ सर्वेषां ब्रह्माभेदश्रावणेन तथात्वात्, अन्यत्र देशविषये, इमे पूर्वलीलासम्बन्धिनः, ते

---

१. स्मृतेरिति बपापुस्तकयोः । २. यादृग्रूपेणेति सर्वेष्यादर्शाः । ३. °धर्मवत्त्वेनेति कपुस्तके । ४. नित्यत्व इति सप्तम्यन्तः प्रमादजः पाठः कपुस्तके । ५. सम्बन्धिभिन्नत्वमिति कपुस्तके । ६. °भव इति सप्तम्यन्तं कपुस्तके । ७. श्रुत्या चेति कपुस्तके । ८. सर्वरस इतिश्रुत्येति लुप्तं कपुस्तके ।

निर्णीतं, तथा च यस्य रसस्य ये विभावानुभावादिरूपास्तैः स रसः सम्पद्यत आतानवितानात्मकतन्तुभिः पट इवातस्तत्तादात्म्यं रसस्येति सर्वाभेदो निःप्रत्यूह इति, ननु विरुद्धदिक्क्योरेकजातीयभाववतोर्भक्त्यतिशयेन युगपदेकजातीयलीलासहितभगवत्प्रादुर्भावे भगवतो व्यापकत्वेनैवम्प्रादुर्भावस्योपपन्नत्वेपि लीलापदार्थानामव्यापकत्वाद्युगपदाविर्भावोनुपपन्नो भक्तयोः समानत्वाद्भक्तिमार्गविरोधापाताद्विनिगमकाभावाच्चैकत्र मायया प्रदर्शयतीति च वक्तुं न युक्तमितिशङ्काप्येताभ्यां सूत्राभ्यां निरस्तेति ज्ञेयं, ब्रह्मणो व्यापकत्वाल्लीलायाश्च तेन सहाभेदात् तथात्वादेकस्मै भक्ताय यथा ब्रह्मणा सह लीलापदार्था आविर्भवन्ति तथैव तदैवान्यत्रापि भक्तसमानदेश आविर्भवन्तीति सर्वसामञ्जस्यात्॥ १०॥

ननु व्यापकत्ववत् पूर्णानन्दैश्वर्यवीर्यादयोपि धर्मास्तेषु प्रतीता भवेयुः, न चैवमस्ति, दुःखसम्भावनायां प्रभुमेव प्रार्थयन्ति यतः, एवं सति व्यापकत्वमपि न वक्तुं शक्यं, तुल्यत्वात्, अत उत्तरं पठति,

आनन्दादयः प्रधानस्य॥ ११॥

पूर्णानन्दैश्वर्यादयः प्रधानस्य धर्मिणो ब्रह्मण एव धर्माः, लीलापदार्थास्तु ब्रह्मधर्मत्वेन व्यापका उच्यन्ते, व्यापकस्य धर्मिणोनागन्तुकधर्मस्य व्यापकत्वनियमात्, न हि धर्मेषु पूर्णानन्दत्वादयः सम्भवन्ति, धर्मित्वापत्त्या धर्मत्वव्याहतेः, अत एवात्र प्रधानपदमुपात्तं गुणभावेन लीलापदार्थानामाविर्भाव इति ज्ञापयितुम्॥ ११॥

ननूपासकस्य प्रियत्वादिप्रकारकज्ञानक्रममादाय प्रियत्वादिधर्माणां शिरस्त्वादिरूपत्वमानन्दमयाधिकरणे निरूपितमिति लीलास्थानामपि प्रियत्वादिज्ञानस्य सत्त्वादत्रापि स्वरूपोपासकस्य प्रियशिरस्त्वादिधर्माणामुपसंहारः कार्य इत्याशङ्क्य परिहरति प्रियशिरस्त्वाद्यप्राप्तिरिति,

---

उत्तरलीलासम्बन्धिन, ननु श्रुत्या भक्तानामभेदनिश्चयेपि सकललीलास्थपदार्थाना कथमभेद इत्याकाङ्क्षाया तदुपपादयन्ति अनेदमित्यादिना, पूर्वश्रुत्या रसात्मकत्वेन यत् सिद्ध तदाहु तथा चेत्यादिना, विभावा इत्यादि सात्त्विकादय आलम्बनविभावरूपा भक्ता उद्दीपनविभावरूपा वसन्तादय संचारिभावा गूढानुभववासनादयोनुभावाः कटाक्षवेणुवादनादय, तेषा सर्वेषा रसाभेदे सिद्धे सर्वमुपपद्यत इति तदुपपादयन्ति आतानेत्यादिना, आताना दीर्घतन्तव, विताना तेषु प्रोततन्तव, अत इत्यादि, तथा च पटे तन्तुरूपकारणाना यथाभेदस्तादात्म्यरूपस्तथा रसे कारणीभूतनिखिललीलास्थपदार्थानामपि रसतादात्म्यरूपाभेदसिद्ध्या रसत्वेन सर्वेषामभेदाद्भक्ताना पूर्वोत्तरलीलाकरणेपि न भेदोनित्यत्व वेति, इदानीं विरुद्धदेशस्थैकजातीयभक्तलीलास्थपदार्थेषु किञ्चिदाशङ्क्य परिहरन्ति नन्वित्यादिना, युगपत् विरुद्धदेशद्वये युगपदित्यथ, उभयत्र भक्ताभ्या सह लीलाकरण एकाकारलीलापदार्थानामनाविर्भावणे दूषणमाहु भक्तयोरित्यारभ्य न युक्तमित्यन्तेन, भक्तिमार्गेत्यादि, एकत्र मायया कापट्येन लीलापदार्थसम्पादन एकान्तभक्तेषु स्वल्पमपि मेन्तर नास्तीति यो भक्तिमार्गस्तस्य विरोध इत्यर्थ, निरसनप्रकारमाहु ब्रह्मण इत्यादिना, तथात्वात् ब्रह्मरूपत्वाद्व्यापकत्वादित्यर्थ ॥ १० ॥

आनन्दादय' प्रधानस्य ॥ ११ ॥ सूत्रमवतारयन्ति नन्वित्यादिना, तेषु भक्तेषु, एवं सति पूर्णानन्दैश्वर्यवीर्यादीनामभावे सतीत्यर्थ, ब्रह्मधर्मत्वेन व्यापका इति, धर्मत्वेन व्यापकता चाकाशपरिमाणे प्रसिद्धा, न हि व्यापकाकाशस्य परिमाण आकाश एकदेशे नित्य वाक्येन त्रिच्छीक्रियते तद्वद्ब्रह्मधर्मा अपि बोध्या इत्यर्थ, अनागन्तुकधर्मस्य परिच्छिन्नप्रतीतिविषयत्वप्राकृतत्वप्रतीतिविषयत्वादयो धर्मा ब्रह्मण्यागन्तुका लीलासम्बन्धिधर्मास्त्वनागन्तुका एवानुपदोक्तकृष्णोपनिषच्छ्रुतेरित्यर्थ, स्वोक्तार्थ सूत्रकारसम्मतिमाहुरत एवेत्यादिना, आविर्भाव आनन्दाविर्भाव, एतदन्वयो लीलापदार्थेषु बोध्य ॥ ११ ॥

---

१ ॰भावानुपपत्तेरिति वैपुस्तके। २ नपद लुप्त कपुस्तके। ३ सूत्राभ्यामिति लुप्त बपुस्तके। ४ धर्मव्याहतेरिति कपुपुस्तकयो, धर्मव्यपहतेरिति वैपुस्तके। ५ धर्मगुणभावेनेति घपापुस्तकयो।

प्रियशिरस्त्वाद्यप्राप्तिरुपचयापचयौ हि भेदे ॥ १२ ॥

चित्तशुद्धितारतम्यहेतुकप्रियत्वादिज्ञानं लीलास्थानां चित्तशुद्ध्यपेक्षाभावान्न सम्भवतीति न तेषामत्रोपसंहारः कार्य इत्यर्थः ।

अथवा नन्वानन्दमयोपासनामाथर्वणोपनिषदुक्तपञ्चरात्राद्यागमोक्तप्रकारेण कुर्वतः पुरुषरूपे पक्षाद्युपसंहारस्यायुक्तत्वादानन्दमयाधिकरणे तद्रूपस्यैवोक्तत्वात् पुरुषरूपः कथमानन्दमयः? तथात्वे वा कथं नोक्तोपसंहारः? अपरञ्च, मोदप्रमोदयोरुपचितानुपचितानन्दरूपयोर्युगपत्सत्त्वेन देशभेदेनापि भिन्नत्वान्नित्यानन्दैकरसे ब्रह्मणि तादृग्रूपकथनमनुपपन्नमित्याशङ्क्य परिहरति प्रियशिरस्त्वादीति, यद्याथर्वणोपास्यात् प्रियशिरस्त्वादिविशिष्टस्य भेदः स्यात् तदा तदप्राप्तिः स्यान्न च तथेति प्रियशिरस्त्वादिकमुपासनामार्गीयस्याप्याथर्वणिकादेरुपसंहार्यमेवेत्यर्थः, चित्तशुद्धितारतम्यहेतुकं प्रियत्वादिज्ञानमितिपक्षे परोक्षवादपक्षेपि तत्र भेदाभावान्मोदप्रमोदयोर्न त्वदुक्तरूपत्वमित्यर्थः, ब्रह्मधर्मा एव भिन्ना इत्युपासनार्थं तानादाय शिरःपाण्यादि निरूप्यत इति तत्रैव निरूपितमस्माभिः, यद्यप्यानन्दमयाधिकरण

प्रियशिरस्त्वाद्यप्राप्तिरुपचयापचयौ हि भेदे ॥ १२ ॥ पूर्वत्रिसूत्र्या साकारव्यापकत्वादयो भगवद्धर्मा भक्तेष्वपि तिष्ठन्ति पूर्णानन्दैश्वर्यादयस्तु भगवति धर्मिण्येव तिष्ठन्ति नान्यत्रेति सिद्धं, एतत्सूत्रप्रयोजनं वक्तुं सूत्रमवतारयन्ति नन्वित्यादि, भगवन्निष्ठा द्विविधा एक उपासका एक एकान्तभक्ताः, तत्रोपासकैर्यथा प्रियशिरस्त्वादिप्रकारभगवद्विशेष्यकज्ञानैर्भगवान् विभाव्यते तथा भक्तानामपि भगवति प्रियत्वस्य भानात् प्रियत्वस्य च शिरस्त्वरूपताया आनन्दमयाधिकरणे व्यवस्थापितत्वादेकान्तभक्तैरपि प्रियशिरस्त्वमुपसंहृत्य भगवति तेन रूपेण भजनं कर्तव्यमितिपूर्वपक्षं समाधत्ते उपासकस्येत्यारभ्य परिहरतीत्यन्तेन, स्वरूपोपासकस्य एकान्तभक्तस्य, तारतम्य, हेतुकं साधारणशुद्धौ मोदज्ञानमसाधारणशुद्धौ प्रमोदज्ञानमित्यादिरीत्या बोध्यमित्यर्थः, चित्तशुद्ध्यपेक्षाभावात् निरुपधिस्नेहकारणत्वेन चित्तशुद्धेरपेक्षाभावादित्यर्थः, तेषां प्रियशिरस्त्वादिधर्माणां, अत्रोपसंहारः भक्तानां भगवद्भजने भगवत्फलसंहारः पूर्वनिरुक्तपक्षे, एकान्तभक्तानां निर्णयसम्भवेप्युपासनामार्गीयाणामुपासनानिर्णयस्यासम्भवात्तन्निर्णयार्थं प्रकारान्तरेण व्याख्यानमाहुः नन्वानन्दमयेति, तथा च पक्षिरूपस्य धर्मानुपसंहृत्य पुरुषरूपोपासनां कुर्वतः इति प्रकारः, तद्रूपस्यैवोक्तत्वात् 'पुरुषश्चक्रे द्विपद' इत्यादिना पक्षिरूपस्यैवोक्तत्वात्तत्र पुरुषत्वेन निरूपणस्य स्त्रीत्वव्यावृत्त्यर्थत्वेनाप्रियतार्थत्वासम्भवादित्यर्थः, तथात्वे वस्तुतः पक्षिरूपस्य पुरुषाकारत्वे कथं नोपसंहारः? पुरुषे पक्षिधर्माणां कथं नोपसंहार इत्येका शङ्का, अपरञ्चेत्यादिना द्वितीया, उपचितानुपचितौ अनल्पाल्पभावं प्राप्तौ, युगपत् एकस्मिन् धर्मिणि युगपत्, देशभेदेन दक्षिणोत्तररूपदेशभेदयोर्धर्मिणि सत्त्वेन, भिन्नत्वात् अखण्डानन्दब्रह्मणः सकाशात् पक्षिरूपस्य भिन्नत्वात्, तादृग्रूपकथनं पक्षिरूपत्वकथनं, परिहरति उपसंहारेऽनुपपत्तिं परिहरति, तर्कमुखं सूत्रार्थं कुर्वन्ति यदीत्यादि, आथर्वणोपास्यात् नित्यानन्दैकरसब्रह्मणः सकाशात्, प्रियशिरस्त्वादिविशिष्टस्य पक्षिरूपस्य, तदप्राप्तिः प्रियशिरस्त्वविशिष्टप्राप्तिः, उपसंहार्यं सदानन्दैकरसे उपसंहार्यं, इत्थं च पक्षिरूपं नित्यानन्दस्वरूपमेकमेवेतिभावः, ननु न्यूनाधिकभावप्राप्तयोर्मोदप्रमोदयोः पक्षिरूपे सत्त्वात्तयोस्तयोर्नित्यानन्दैकरसासम्भवाद्भेदः सिद्ध इत्यत आहुः चित्तशुद्धीत्यादि, तथा च चित्तशुद्धितरतमभावेन भासमानोप्यानन्दतरतमभावो नानन्दन्यूनतां सम्पादयति वस्तुतस्तस्य पूर्णत्वात्, परोक्षेत्यादि, तथा च परोक्षवादपक्षे भक्तानामलौकिकदेहरक्षायै पक्षिरूपो भूत्वा स्वयमन्नमयादिरूपस्तत्र तत्र कोशेषु प्रविशति जीवे त्वानन्दमय इतिपरोक्षवादपक्ष इत्यर्थः, तत्र पक्षद्वये, भेदाभावात् पक्षिरूपपुरुषोत्तमयोर्भेदाभावात्, न त्वदुक्तरूपत्वं नोपचितानुपचितरूपत्वं किन्तु पूर्णानन्दरूपत्वमेवेत्यर्थः, ब्रह्मधर्मा एव भिन्ना इति, तथा च एवकारेण धर्मिणो भेदो व्यवच्छिद्यते, इत्यत्र पक्षिरूपस्यावयवा भिन्ना एव त उपासनार्थमुपासकैरुपसंहार्या एकान्तभक्तानां तु तेषु धर्मेषु ब्रह्मधर्मभेदज्ञानान्न तैस्त उपसंहार्या इत्यर्थः, तान् पक्षिरूपब्रह्मधर्मान्, तत्रैव 'पुरुषश्चक्रे

---

१. 'श्रद्धापेक्षेत्यादि' कपुस्तके, 'शुद्धापेक्षेत्यादि' कंपुस्तके । २. भेदेनाभिन्नत्वादिति कंपुंपुस्तकयोः । ३. अपिपदं त्रुटं गोपुस्तके । ४. तादृशेत्यादि प्रकाशे पुंपुस्तके च । ५ तदा तदप्राप्तिः स्यादिति त्रुटं कंपुस्तके । ६. त्वदुक्तरूपमिति गोपुस्तके ।

ग्यासार्थसोक्तत्वान्नेयं शङ्का सम्भवति तथापि गुणोपसंहारप्रसङ्गे मिथ्यावादिन आपात-
तः शङ्का सम्भवतीत्याचार्येणोक्त्वा निरस्ता ॥ १२ ॥

ननूपास्यरूपस्याविरुद्धा एव गुणा उपसंहर्तव्या न तु विरुद्धास्तथा च पुरुषरूपे पक्षादि विरुद्धमिति न तदुपसंहार्यमित्याशङ्क्याह,

इतरे त्वर्थसामान्यात् ॥ १३ ॥

इतरे पुरुषरूपे विरुद्धत्वेन ये भासमाना धर्मास्तेप्युपसंहर्तव्याः, तत्र विरोधव्यव-च्छेदज्ञापनाय तुशब्दः, तत्र हेतुरर्थसामान्यादिति, अर्थः पदार्थ आनन्दमयत्वलक्षण-स्तस्य समानत्वादेकत्वादित्यर्थः ॥ १३ ॥

अथानन्दमयाधिकरण उक्तप्रकारेण ये प्रियत्वादिधर्मास्तेषामेवोपसंहारः कार्यो न तु पुरुषरूपे पक्षादीनामपीत्यग्रिमं पठति,

आध्यानाय प्रयोजनाभावात् ॥ १४ ॥

आनन्दस्वरूपस्य यावन्तो धर्मा भक्तिमार्गीयाः परोक्षवादेनोच्यन्ते प्रियत्वप्राधान्या-दयस्तेषां सर्वेषामाध्यानमासमन्ताद्ध्यानं तदर्थं ये धर्माः प्रयुक्तास्त एवोपसंहर्तव्या नान्ये, तत्र हेतुः प्रयोजनाभावादिति, ध्यानपदार्थस्य तावद्भिरेव सिद्धेरधिकोपसंहारे तथात्वा-दित्यर्थः ॥ १४ ॥

अन्येषामनुपसंहारे हेत्वन्तरमप्याह,

आत्मशब्दाच्च ॥ १५ ॥

"प्रियमेव" (तैत्ति. ब्रह्म.) इत्यादिना परोक्षवादेनोक्तानां प्रियप्राधान्यादीनामेव भावना कार्या न तु यथाश्रुतानां शिरःपक्षादीनां, तेषामविवक्षितत्वात्, अत्र हेतुरात्मशब्दा-दिति, "आनन्द आत्मा" (तैत्ति. ब्रह्म.) इत्यनेन पूर्वोक्तानां प्रियप्राधान्यादीनां रसा-त्मकानामात्मा स्वरूपमानन्द इत्युक्तं, अग्रे "रसो वै सः" (तैत्ति. ब्रह्म.) इति वक्ष्यमाण-त्वात् तस्य च स्थायिभावात्मकत्वात् तस्यैवानन्दमयत्वाच्च प्रियविषयकलीलामध्यपातिभक्त-ज्ञानप्रकाराणामपि रसात्मकत्वेनानन्दरूपत्वात् तेषामुपासना तूत्तमाधिकाराभावात् शिरःपक्षादि-रूपेण कार्येतिभाववती श्रुतिस्तथा न्यरूपयत्, एतेन यत्परम्परासम्बन्धेष्वुपास्यत्वं तदस्य

द्विपद' इतिश्रुतिविचार एव, आपाततः शङ्का पक्षिरूपस्य ब्रह्माभिन्नत्वशङ्का ॥ १२ ॥

इतरे त्वर्थसामान्यात् ॥ १३ ॥ पूर्वोक्तार्थोपष्टम्भकतया सूत्रान्तरमवतारयन्ति नन्वित्यादि, अविरुद्धाः पुरुषधर्माः, विरुद्धाः पक्षिधर्माः, तेप्युपसंहर्तव्याः विरुद्धत्वेन भासमाना वस्तुतोविरुद्धा पक्षिधर्माः पुरुष उपसंहर्तव्या इत्यर्थः, विरोधव्यवच्छेदो विरोधाभावः, समानत्वात् पक्षिपुरुषरूपयोर्विद्यमानत्वस्यैकत्वात् ॥१३॥

आध्यानाय प्रयोजनाभावात् ॥ १४ ॥ प्रियत्वादिधर्माः पक्षिनिष्ठा इत्यर्थः, अग्रिमं सूत्रमित्यर्थः, नान्ये पक्षादिरूपा इत्यर्थः, तत्र अनुपसंहारे, तथात्वात् प्रयोजनाभावादित्यर्थः ॥ १४ ॥

आत्मशब्दाच्च ॥ १५ ॥ अन्येषां पक्षादीनां प्रियमेवेत्यादिना 'तस्य प्रियमेव शिर' इत्यादिवेदवाक्येन, अविवक्षितत्वात् आनन्दमयात्मध्याने शिरःपक्षप्रभृतीनामनुपसंयोगादित्यर्थ., अत्र अनुपसंहारे, इत्युक्तं 'आत्मानं स्वयमकुरुते' त्यादिश्रुतिभिरुक्तमित्यर्थः, अग्रे रसमयानन्दमयात्मनिरूपणे, तस्य आत्मस्वरूपस्य, भक्तज्ञानप्रकाराणां एकान्तभक्तज्ञानविषयभगवद्धर्माणां, तेषां उपासकानां, एतेषामुपासनाविषयीभूतं रूपं विभूतिरूपमेव न तु मूलरूपं तस्यैकान्तभक्तिमात्रविषयत्वात्, भाववती भगवत्स्वरूपागाधत्वमाहवती, तथा न्यरूपयत् 'यतो वाचो निवर्तन्ते

---

१. प्रसङ्ग इति प्रथमान्त. पाठ. कंगोपुस्तकयोः । २. भावसामान्या इति गोपुस्तके । ३ ध्यानमिति कवपुपुं-गोषु । ४. चेति कंपुस्तके । ५. उपयुक्ता इति कंवपापुंगोषु । ६. तत्रेति सर्वेष्वादर्शो. । ७. उपास्यमहत्त्वमिति कंपुस्तके ।

महत्त्वं कियदवधि वाच्यमिति ज्ञाप्यते, एवं सत्युपासनामार्गीयोपास्यं विभूतिरूपं न तु मूलरूपं "यन्न योगेन" (श्रीमद्भाग. ११. १२. ९.) इतिवाक्यादिति ज्ञेयम् ॥ १५ ॥ १ ॥

इति तृतीयाध्याये तृतीयपादे प्रथमं सर्ववेदान्तप्रत्ययाधिकरणम् ॥ १ ॥

तैत्तिरीयकेऽन्नमयादिनिरूपणे पुरुषविधत्वं तेषां निरूप्य "तस्यैष एव शारीर आत्मा यः पूर्वस्य" (तैत्ति. ब्रह्म.) इति सर्वत्र निगद्यते, तत्रानन्दमयपर्यन्तं शारीरात्मत्वकथनाद्भवति संशयः शरीराभिमानी जीव एव कश्चिदुत ब्रह्मैव, तत्र शारीरपदाज्जीव एव भवितुमर्हति, तथा सत्यानन्दमयस्यापि ब्रह्मत्वं नोपपद्यते, उच्यते च भार्गव्यां विद्यायां "अन्नं ब्रह्मेति व्यजानात्" (तैत्ति. भृगु.) इत्यारभ्यानन्दमयपर्यन्त"मानन्दो ब्रह्मेति व्यजानात्" (तैत्ति. भृगु.) इत्यन्तया श्रुत्या ब्रह्मत्वमित्युभयतःपाशारज्जुरिति प्राप्त आह,

आत्मगृहीतिरितरवदुत्तरात् ॥ १६ ॥ (३. ३. २.)

इतरवत् जीववत् आत्मगृहीतिः आत्मग्रहणं "तस्यैष एव शारीर आत्मा" (तैत्ति. ब्रह्म.) इति यत् तदुत्तरात्, "यः पूर्वस्य" (तैत्ति. ब्रह्म.) इति सर्वत्रोक्तत्वात् सर्वेभ्य उत्तर आनन्दमयस्तस्माद्धेतोरित्यर्थः, अन्नमयादिषु सर्वेष्वानन्दमयस्यैवोक्तैस्तत्तच्छरीराभिमानित्वात् तथा, एतद्यथा तथानन्दमयाधिकरणे प्रपञ्चितमस्माभिः।

अथवा "अन्योन्तर आत्मा" (तैत्ति. ब्रह्म.) इत्यन्नमयादन्यत्र सर्वत्रोक्तत्वात् पूर्वपूर्वनिरूपितो यः स इतर इत्युच्यते, तथा च "यः पूर्वस्य" इतिश्रुत्येतरवत् पूर्वनिरूपितवत् प्रकृतस्याप्यात्मग्रहणं कथनं यत्तदुत्तरादिति पूर्ववत् ॥ १६ ॥

अप्राप्य मनसा सहे'तिश्रुतिः पूर्णानन्द उपासनाविषयत्वं न्यरूपयदित्यर्थः, परम्परासम्बन्धेपि पक्षादिसम्बन्धविशिष्टरूपेपि, अस्य मूलधर्मिणः ॥ १५ ॥ १ ॥

॥ इति तृतीयतृतीये प्रथमाधिकरणम् ॥ १ ॥

आत्मगृहीतिरितरवदुत्तरात् ॥ १६ ॥ पूर्वाधिकरण एकान्तभक्तानां पुरुषोत्तमे पक्षिधर्माणामनुपसंहारे 'आनन्द आत्मे'त्यानन्दपदप्रयोगहेतुरुक्त इति तत्प्रसङ्गस्मृत्यानन्दमयप्रकरणस्यात्मशब्दयुक्तवाक्यान्तरं सूत्रकारो विचारयतीत्येतदधिकरणवाक्यमाहुः तैत्तिरीय इत्यादि, तेषाम् अन्नमयादीनां, सर्वत्र पञ्चसु, भवति संशयः एतद्वाक्यार्थे भवति संशय इत्यर्थः, पूर्वपक्षमाहुस्तत्रेत्यादिना, तथा च तस्मिन् वाक्ये प्राणमयमारभ्योच्यते 'तस्यैष एव शारीर आत्मा यः पूर्वस्ये'ति, तत्र सर्वापेक्षया पूर्वविचारेऽन्नमयः समायातीति तस्य योऽभिमानी शारीरः स एवानन्दमयस्यापि तदभिमानी च जीव एव लोके प्रसिद्ध इत्यानन्दमयाभिमानिनोपि न ब्रह्मत्वं सेत्स्यति, तत्रेष्टापत्तौ त्वन्नमयमारभ्यानन्दमयपर्यन्तानां ब्रह्मत्वप्रतिपादकश्रुतिविरोध इति पूर्वः पक्षः, आत्मगृहीतिः 'तस्यैष एव शारीर आत्मे'तिश्रुतौ 'शारीर'पदसमभिव्याहाराद्यथा जीव आत्मपदप्रयोगो लोके प्रसिद्धस्तद्वदत्र श्रुतावप्यन्नमयादिमद्ब्रह्मात्मकशरीरसम्बन्धादुत्तरादानन्दमयरूपार्थादप्यात्मशब्दप्रयोगः कृत इत्यर्थः, तदुत्तरात् सर्वोत्तरादानन्दमयाभिप्रायादित्यर्थः, सर्वत्रोक्तत्वात् सर्वत्रैकस्य प्रवेशनसमर्थस्यान्यस्याभावादित्यर्थः, उक्तस्तत्तच्छरीरेत्यादि, तथा चान्नमयाद्याध्यात्मिकतत्तच्छरीराभिमानी आनन्दमय एव, अभिमानश्च 'तदात्मानमेवावैदहं ब्रह्मास्मि' इतिश्रावणेन यथार्थज्ञानरूप एव नत्वध्यासरूप इति न जीवत्वशङ्का, तथा आनन्दमय एव, प्रपञ्चितं 'यः पूर्वस्ये'त्यनेनानन्दमय एव सर्वात्मनोक्त इत्यर्थः, 'तस्यैष एव शारीर आत्मा यः पूर्वस्ये'त्यत्रोक्त 'आत्मा' 'यश्चान्योन्तरात्मे'त्यत्रोक्त 'आत्मा' स उभयत्राप्युक्त आनन्दमय एव आत्मा न तु 'शारीर'पदाज्जीवोपीतीममर्थं स्फुटीकुर्वन्ति अथवेत्यादिना, अन्यत्र प्राणमयादिविज्ञानमयान्तेषु, यः स आनन्दमय इत्यर्थः, फलितमाहुः तथा चेत्यादिना, पूर्वनिरूपितवत् विज्ञानमयान्तेषु निरूपितात्मवत्, प्रकृतस्येत्यादि, आनन्दमयेपि तस्य स्वस्यैवात्मत्वेन ग्रहणमित्यर्थः, उत्तरात् आनन्दमयाभिप्रायात्, पूर्ववदितीतरवदित्यस्यार्थो बोध्य इत्यर्थः ॥ १६ ॥

---

१. पुरुष एवेति कंपुस्तके। २. अन्नमयादिष्विस्यारभ्योक्तपर्यन्तं लुप्तं पापुस्तके। ३. उक्तत्वादि बपुस्तके। ४. तथापदं लुप्तं कंपुस्तके। ५. पूर्वनिरूपित इति बपापुंगोषु। ६. आत्मग्रहणकथनमिति बपागोषु। ७. पूर्ववदिति लुप्तं कपुपुस्तकयोः।

अन्वयादिति चेत् स्यादवधारणात् ॥ १७ ॥

ननु सर्वत्र "अन्योन्तर आत्मा" (तैत्ति. ब्रह्म.) इतिश्रुत्या प्रत्येकमन्नमयादीनां भेदनिरूपणाच्छारीरपदाच भिन्नो भिन्नो जीव एवात्मा शरीराभिमानी सर्वत्रोच्यते, आनन्दमयेपि तथोक्तिर्या सा त्वानन्दमयस्य ब्रह्मत्वेन व्यापकत्वेन सर्वत्रान्वयात् सर्वेषु शरीरेषु सम्बन्धादित्याशङ्क्य तन्निरासायोक्तेर्थ उपपत्तिमाह स्यादित्यादिना, स्यात् आनन्द एवोक्तशरीराभिमानी भवतीत्यर्थः, तत्र हेतुरवधारणादिति, "एष एव" (तैत्ति. ब्रह्म.) इत्येवकारेणेतरनिषेधपूर्वकमानन्दमयस्यैवात्मत्वनिर्धारादित्यर्थः ॥ १७ ॥ २ ॥

इति तृतीयाध्याये तृतीयपादे द्वितीयमात्मगृहीत्यधिकरणम् ॥ २ ॥

तैत्तिरीयके पठ्यते "तस्माद्वा एतस्मादात्मन आकाशः सम्भूत" इत्युपक्रम्य महाभूतसृष्टिमुक्त्वाम्नायते "पृथिव्या ओषधय ओषधीभ्योन्नमन्नात् पुरुषः स वा एष पुरुषोन्नरसमयः" (तैत्ति. ब्रह्म.) इति, एतदग्रेन्नस्योत्पत्तिस्थितिलयहेतुत्वमुक्त्वा "येन्नं ब्रह्मोपासते" (तैत्ति. ब्रह्म.) इत्युच्यते, भृगुवरुणसंवादे च "अन्नं ब्रह्मेति व्यजानात्" (तैत्ति. भृगु.) इत्युच्यते, तत्र "स वा एष पुरुषोन्नरसमयः" (तैत्ति. ब्रह्म.) इत्यनेन पूर्वोक्त एव पुरुष उच्यत उत तद्भिन्न इति भवति संशयः, किमत्र युक्तम्? पूर्वोक्त एवेति, यतः पूर्वोक्तस्यैव "स वा एषः" (तैत्ति. ब्रह्म.) इत्यनेन प्रत्यभिज्ञानं प्रतीयते, तत्र ब्रह्मत्वेनोपासना कार्येत्यभिप्रायेण ब्रह्मत्वेन स्तूयत इति प्राप्त आह कार्याख्यानादपूर्वमिति।

कार्याख्यानादपूर्वम् ॥ १८ ॥ (३. ३. ३.)

पूर्वस्यान्नकार्यस्य पुरुषस्याख्यानात् "स वा एषः" (तैत्ति. ब्रह्म.) इत्यनेनाग्रिमश्रुतिभिर्ब्रह्मत्वेन प्रतिपिपादयिषितमन्नरूपमेवोच्यते न तु पूर्वमित्यर्थः, "स वा एषः" इति प्रत्यभिज्ञानमिति यदुक्तं तन्न, "अन्नात् पुरुषः" (तैत्ति. ब्रह्म.) इत्यनेनाधिभौतिकतन्निरूपणात् "स वा एषः" इत्यनेनाध्यात्मिकतन्निरूपणादुभयोश्च भेदात्, अत एव संशयाभावायाह वै निश्चयेन, एषः वक्ष्यमाणः पुरुषः, सः आध्यात्मिकत्वेन प्रसिद्धोन्नरसमय इति, अन्यथा

अन्वयादिति चेत् स्यादवधारणात् ॥ १७ ॥ भेदनिरूपणात् कोशपञ्चकेपि प्रत्येकमात्मभेदनिरूपणादित्यर्थ, तथोक्तिः आत्मत्वोक्तिः, तन्निरासाय चतुर्षु जीवस्यात्मत्वनिरासायेत्यर्थ., उक्तशरीराभिमानी अन्नमयादीनां शरीरत्वेनोक्तानामभिमानीत्यर्थ., तत्र अन्नमयादीनामात्मनि परब्रह्मत्वे, एवकारेण 'तस्यैष एव शारीर आत्मा यः पूर्वस्ये'तिश्रुत्युपात्तैवकारेण, इतरनिषेधः जीवनिषेधः ॥ १७ ॥ २ ॥

॥ इति तृतीयतृतीये द्वितीयाधिकरणम् ॥ २ ॥

कार्याख्यानादपूर्वम् ॥ १८ ॥ एतदग्रे 'अन्नाद्वै प्रजाः प्रजायन्त'इत्यनुवाके, संशयमाहुस्तत्रेत्यादिना, पूर्वोक्त एव 'अन्नात् पुरुष' इत्यत्रान्नजन्यतयोक्तपुरुष एव, तद्भिन्नः पूर्वोक्तभौतिकपुरुषाद्भिन्न आध्यात्मिक इत्यर्थः, 'स वा एष' इत्यनेन 'स वा एष पुरुषोन्नरसमय'इत्यनेनेत्यर्थः, अन्नरूपमेव कोशात्मकान्नरूपमेव, उच्यते पुरुषो ब्रह्मत्वेनोच्यत इत्यर्थः, न तु पूर्वं न तु भौतिकपुरुषरूपमित्यर्थ', उभयोः आधिभौतिकाध्यात्मिकयोः, संशयाभावाय भौतिकत्वसंशयाभावाय, आह 'अन्नाद्वै प्रजा प्रजायन्त'इत्यत्राहेत्यर्थ, उत्तरसमयः श्रुतिसङ्केतग्राह्य इत्यर्थ, अन्यथा 'स वा एष' इत्यनेनान्नकार्यपुरुषस्योक्ता'वन्नं ब्रह्मे'त्यनेनापि भौतिकान्नस्योक्तावाध्यात्मिक-

---

१. भिन्न इति कपुंपुस्तकयो। २. एवपद लुप्तं कपुपुस्तकयो। ३. तुपदं लुप्तं कपुस्तके। ४. व्यापकत्वेनेति लुप्तं कपुस्तके। ५. आनन्दमय एवेति वपापुंगोपु। ६. उक्तसर्वशरीराभिमानीति सर्वेष्वादर्शः। ७. उक्तयाम इति वपापुस्तकयो। ८. इत्यनेनेति वपापुस्तकयो.। ९. प्रसिद्धोन्नरसमय इति सर्वेष्वादर्शो।

ब्रह्मात्मकतपोलक्षणसाधनेनाधिकारे सम्पन्ने "अन्नं ब्रह्मेति व्यजानात्" (तैत्ति. ब्रह्म.) इति न वदेत्, न च तदपि-तत् तथात्वेन स्तूयत इति-वाच्यं, श्रुतेः प्रतारकत्वापत्तेः, आनन्दमयान्तमेवमेव निरूपणाच, अत एवास्याप्यात्माग्रे निरूपितो "यः पूर्वस्य" इति (तैत्ति. ब्रह्म.), स त्वाधिदैविक आनन्दमयः ।

अथवा वाजसनेयिशाखायाम् "आत्मेत्येवोपासीत" (बृह. ३. ४. ७.) इत्युपक्रम्य "तदेतत् प्रेयः पुत्रात् प्रेयो वित्तात् प्रेयोन्यस्मात् सर्वस्मादन्तरतरं यदयमात्मा" (बृह.३.४.८.) इत्येतदग्रेन्यस्य प्रियत्वं निराकृत्य "ईश्वरो हि तथा स्यादात्मानमेव प्रियमुपासीत"(बृह.३.४.८.) इति पठ्यते, अत्रात्मौपाधिकत्वात् सर्वत्र प्रियत्वस्यात्मपदेन जीवात्मन एव प्रियत्वेनोपासना विधीयत उतेश्वरपदात् परमात्मन इति भवति संशयः, किमत्र युक्तम्? जीवात्मन एवेति, कुतः? यथा पुत्रादेरात्मौपाधिकप्रियत्वोक्त्या जीवात्मन एव प्रियत्वमुच्यतेन्यत्र श्रुतौ तथेहापि "प्रेयः पुत्रात्" (बृह. ३. ४. ८.) इत्यादिकथनाज्जीवात्मैव भवितुमर्हतीति प्राप्त आह कार्याख्यानादपूर्वमिति, इतः पूर्वमाम्नायते "प्राणन्नेव प्राणो नाम भवति वदन् वाक् पश्यंश्चक्षुः शृण्वन् श्रोत्रं मन्वानो मनस्तान्यस्यैतानि कर्मनामान्येव" (बृह. ३.४.७.) इति, तथा च प्राणनवदनादिकार्यैः कृत्वा प्राणवागादित्वेनैकस्यैवात्मन आख्यानात् कथनादपूर्वं, पूर्वं तु पुत्रवित्ताद्यभिमानदशायां "न वा अरे पत्युः कामाय पतिः प्रियो भवति" (बृह. ४. ४. ५.) इत्यादिना यत् प्रियत्वेनोच्यते तस्माद्भिन्नमात्मशब्दवाच्यमत्रेत्यर्थः, लोके हि प्राणवायुवागिन्द्रियादीनामेव तत्तच्छब्दवाच्यता न तु जीवस्य, अत एवाग्रे श्रुतिराह "ईश्वरो हि तथा स्यात्" (बृह.३.४.८.) इति, अत एव "प्रेयोन्यस्मात् सर्वस्मादन्तरतरं यदयमात्मा" (बृह. ३. ४. ८.) इत्याह, अन्तरो जीवात्मा ततोप्यतिशयेनान्तरमन्तरतरं पुरुषोत्तमस्वरूपमेव भवितुमर्हतीति, एतेन विग्रहस्यैवात्मरूपत्वं सिध्यति, तेनाविकृतत्वपरमानन्दत्वादयोपि धर्मा उपसंहर्तव्याः ॥ १८ ॥

कोशरूपान्नस्य पुरुषरूपत्वेनानुक्त्या'न्नं ब्रह्मेति व्यजाना'दित्यनेनानुक्तौ चेत्यर्थः, न वदेदिति 'अन्नाद्वै प्रजाः प्रजायन्त' इत्युक्तत्वाग्रे 'सर्वं वै तेन्नमाप्नुवन्ति येन्नं ब्रह्मोपासत'इति सफलब्रह्मोपासनमात्रमेव वदेत् तावतैव भौतिकान्नस्य ब्रह्मत्वेनोपासनस्य सिद्धेर्न तु तपस उपदेशेनाधिकारसिद्ध्यनन्तर'मन्नं ब्रह्मेति व्यजाना'दिति वदेदित्यर्थः, इत्थं च तपोरूपसाधनं विनैतदन्नस्याज्ञानादेतदन्नं भौतिकान्नादतिरिक्तमाध्यात्मिकं ब्रह्मरूपं भिन्नमेवेत्यर्थः सिद्धः, 'स एष'इतिशब्दयोः प्रत्यभिज्ञाबोधकत्वमपि नास्त्येव, तच्छब्दस्य प्रत्यक्षार्थबोधकत्वादेतच्छब्दस्य च वक्ष्यमाणार्थकत्वात्, तत् भौतिकान्नं, तथात्वेन 'ब्रह्मात्मक' इत्यारभ्य 'व्यजाना'दित्यन्तेन स्तूयत इति तदपि न वाच्यमित्यन्वयो बोध्यः, प्रत्यभिज्ञानेन भौतिकान्नश्रुतिपरतया ज्ञापने भौतिकस्याब्रह्मत्वेन तत्र ब्रह्मत्वबोधकश्रुतेः प्रतारकत्वापत्तिदोषः स्यादित्यर्थः, आनन्दमयान्तमित्यादि, तथा चानन्दमयज्ञानपर्यन्तं 'तपसा ब्रह्म विजिज्ञासस्वे'त्युक्तेरन्यत्र वास्तवं ब्रह्मत्वमन्नमय आरोपितं स्तुत्यर्थं श्रुतिर्वदतीतिविषमव्याख्याने प्रमाणाभाव इत्यर्थः, अत एव एतदन्नमयस्य भौतिकत्वाभावादेव, स तु अन्नमयस्य आत्मा तु, पूर्वनिरूपितार्थस्यानन्दमयाधिकरण एव प्रायशः स्फुटत्वात्सात्यन्तावश्यकतेत्यरुच्या प्रकारान्तरेणाधिकरणरचनामाहुरथवेत्यादिना, विषयवाक्यमाहुः 'आत्मे'त्यादि, अत्र आत्मनः प्रियत्वप्रतिपादकश्रुतिषु, आत्मौपाधिकत्वात् आत्ममात्रोद्देश्यकत्वादित्यर्थः, सर्वत्र अन्नोक्तश्रुता'वात्मनस्तु कामाये'त्यादिश्रुतिषु चेत्यर्थः, जीवात्मन एवेति, जीवस्यैव पुत्राद्यभिमानसम्भवादेवकारेणेश्वरव्यवच्छेदः, अन्यत्र श्रुतौ 'आत्मनस्तु कामाये'त्यादिश्रुतौ, इतः पूर्वं 'आत्मेत्येवे'त्यस्य पूर्वमित्यर्थः, एकस्यैव सर्वकर्तुः सर्वात्मकस्यैकस्येवेत्यर्थः, तस्माद्भिन्नं पुत्राद्यभिमानिभिन्नमपूर्वशब्दयोर्थ्यं, अत्र आत्मशब्दार्थमध्ये बोध्यमित्यर्थः, तत्तच्छब्दः प्राणवागादिशब्दः, अत एव जीवे तत्तच्छब्दवाच्यत्वाभावादेव, पुरुषोत्तमस्वरूपमेवेति एवकारेणाक्षरस्य स्वरूपाभावेनान्तरत्वं व्यवच्छिद्यते, एतेन पुरुषोत्तमस्यान्तरत्वप्रतिपादनेन ॥ १८ ॥

---

१. एतदपीति कपापुपुंपु । २. तत्पदं त्रुटं पापुस्तके । ३. अत इति कपुस्तके । ४. पुत्रात्मौपेत्यादि पुपुस्तके । ५. आत्मोपेत्यादि कपापुगोपु । ६. रूपमित्यधिकं कपागोपु । ७. असंर्वेतानीति पापुस्तके । ८. इत्यप्राणेत्यादि कखपापुस्तकेपु । ९. पूर्वमिति त्रुटं कपुपुस्तकयोः १०. त्विति त्रुटं कपुपुंगोपु । ११. अन्तरमिति त्रुटं पुंपुस्तके । १२. सिध्यतीतीति पुंपुस्तके ।

ननु विग्रहे चक्षुःश्रोत्रादीनां वैलक्षण्यप्रतीतेरात्मनश्चैकरसत्वादुक्तकर्मनामवत्त्वं ब्रह्मण्यनुपपन्नमित्याशङ्कोत्तरं पठति ।

समान एवं चाभेदात् ॥ १९ ॥

चोप्यर्थे, तथा चैवमपि सति श्रोत्रचक्षुरादिवैलक्षण्यप्रतीतावपि सति समान एकरूप एव न तु विषमः, तत्र हेतुरभेदादिति, चक्षुरादीनां ब्रह्मत्वेन परस्परमभेदादित्यर्थः ।

अत्रेदमाकूतम्, "तन्त्वौपनिषदं पुरुषं पृच्छामि" (बृह. ५.९. २६.) इतिश्रुतेरुपनिषद्वेद्यमेव ब्रह्मस्वरूपं, ताश्च "प्राणन्नेव प्राणो भवति वदन् वाक्" (बृह.३.४.७.) इत्यादिरूपाः प्रतिनियतेन्द्रियग्राह्यानर्थान् स्वरूपेणैव गृह्णद्ब्रह्म तत्तच्छब्दवाच्यं भवतीति वदन्ति, तद्वाच्यता च व्यवहार्यत्वे, स च "तदेतत्प्रेयःपुत्रा" दित्यादिवाक्यैकवाक्यतया निरुपधिस्नेहवत्तामेव व्यवहार्यं इति ज्ञाप्यते, स चाविर्भूतेवतारूप एव सम्भवति, एवं सति तत्र भक्तैर्भगवद्विग्रहे तत्तदवयवेषु भेदेन यथा यथा व्यवह्रियते तथा तथैव तदेकमेवाखण्डसच्चिदानन्दरूपं ब्रह्मेत्यर्थः सम्पद्यते, एवंविधो लोके न प्रसिद्ध इत्यसम्भावना स्यात्, तदभावायाग्रे श्रुतिराह "ईश्वरो हि तथा स्यात्" (बृह. ३. ४. ८.) इति, एतेनाविर्भूतरूपे व्यापकत्वैकरसत्वसच्चिदानन्दत्वादयो धर्मा उपसंहर्तव्या अनाविर्भूतेपीति स्थितं, एवं सत्याविर्भावेनाविर्भावेपीश्वरः समानः, न ह्याविर्भावे कांश्चनागन्तुकान् धर्मानादायाविर्भवतीति वक्तुं शक्यं, अनाविर्भूतस्याप्येवमाविर्भूतप्रकारेणैवाभेदादित्यपि सूत्रार्थः सूत्रकाराभिमत इति ज्ञातव्यं, चकारेण विरुद्धसर्वधर्माश्रयत्वं समुचीयते, एवं साक्षादाविर्भूतभगवद्रूपे पूर्णानन्तधर्मास्तदुपासकेनोपसंहर्तव्या इति सिद्धम् ॥ १९ ॥

अथ यत्र कार्यचिकीर्षया जीवे स्वयमाविशति तदावेशात्तद्धर्मा अपि केचित् तस्मिन्नाविर्भवन्ति तत्रोपासकेनाखिलब्रह्मधर्मोपसंहारः कर्तव्यो न वेति शङ्कासमाधानं विकल्पेनाह सूत्राभ्यां, तत्रादौ विधिपक्षमाह ।

सम्बन्धादेवमन्यत्रापि ॥ २० ॥

अन्यत्रापि जीवेप्येवं ब्रह्मणीवोपासना कार्या, तत्र हेतुः सम्बन्धादिति, अयोगोलके वह्नेरिव तस्मिन्नावेशलक्षणः सम्बन्धोस्तीति तत्त्वेन व्यपदेशाच्च तथेत्यर्थः, अत्रैवं ज्ञेयं, अयं तु जीवोत्राविष्टं भगवन्तमहमुपास इति जानाति चेत् तदा न सा जीवगामिन्युपासना किन्तु ब्रह्मगामिन्येव, तत्राखिलधर्मोपसंहारे न किञ्चिद्बाधकं, यत्र ब्रह्मत्वेनैव ज्ञात्वोपास्ते तत्रापि "तं यथा यथोपासते तथैव भवति तद्धैतान् भूत्वावति" (मुद्गलो. ९. ३.) इतिश्रुतेर्गुर्वादौ जीवत्वबुद्धिनिषेधाच्च तथा, तत्र यादृगुपासकस्तदुपासनासिद्ध्यर्थं तत्फलदानार्थं च तादृग्रूपो भगवानाविशतीति च तथा ॥ २० ॥

समान एवं चाभेदात् ॥ १९ ॥ उक्तकर्मनामवत्त्वं प्रणववागादिपदवाच्यत्वं, तत्तच्छब्दवाच्यं प्रणववागादिशब्दवाच्यं, तद्वाच्यता श्रुतिवाच्यता, व्यवहार्यत्वे ब्रह्मणः शब्दात्मकव्यवहारविषयत्वे, स च व्यवहार्यश्च, स च निरुपधिस्नेहवद्व्यवहारश्च, तत्तदवयवेषु भक्तानां स्वस्वानन्दानुभावकतत्तद्भगवदवयवेष्वित्यर्थः, तदुपासकेन पूर्णपुरुषोत्तमोपासकेन ॥ १९ ॥

सम्बन्धादेवमन्यत्रापि ॥ २० ॥ आविर्भूते भगवत्युपसंहारं विचार्यावेश उपसंहारं विचारयतीत्याहुरथेत्यादि, विधिपक्षं संशये विधिकोटिपक्षं, अयं तु आवेशाधिकरणीभूतस्तु, तत्रापि तादृशस्थलीयोपास्ये ब्रह्मव्यपीत्यर्थः, तथा उपसंहारः सर्वधर्माणां कार्यं इत्यर्थः ॥ २० ॥

---

१. चपदं लुप्तं गोपुस्तके । २. यदेतदिति पुंपुस्तके । ३. °नन्दादय इति पुंपुस्तके । ४. सर्वेति लुप्तं गोपुस्तके । ५. सप्तम्यन्तं पृथगेवेदं वपापुंपु । ६. पूर्णानन्दतद्धर्मा इति गोपुस्तके । ७. ज्ञात्वेति लुप्तं पुंपुस्तके । ८. एतानिति पुपुस्तके । ९. जीवबुद्ध्यादि कैपुस्तके । १०. तत्तदुपासकस्येति कपुपुस्तकयोः ।

- यस्त्वन्तरङ्गभगवद्भक्तं हृद्याविर्भूतभगवत्कं ज्ञात्वैतद्भजनेनाहं भगवन्तं प्राप्स्यामीति ज्ञात्वा तमेव भजते स भक्तिमार्गीय इति भक्तहृद्याविर्भूतेपि रूप उपसंहारो धर्माणां तेन न कार्य इत्यग्रिमं पठति ।

न वाविशेषात् ॥ २१ ॥

अनुपसंहारे हेतुरविशेषादिति, अस्य भक्तभक्तत्वेन तद्भजनरसास्वादनेन विस्मृततदाविष्टभगवत्कत्वेन तन्निरपेक्षत्वेन वा तदाविष्टभगवति गुणोपसंहारेनुपसंहारे वा भक्तोपासनायां विशेषाभावादित्यर्थः, अनुपसंहारस्यात्र बाधकत्वाभावज्ञापनाय वाशब्दः, विशेषादिति वा, पूर्वं विहितत्वेन भगवदाकारादिषु भजनं कुर्वन्नप्युक्तरूपभक्तसङ्गेन तद्भजनेन च पूर्वस्माद्विशिष्टं रसमनुभूतवानिति रसास्वादे विशेषाद्गुणोपसंहारं स न करोतीत्यनुवादः, विहितत्वेन गुणोपसंहारपूर्वकोपासनायां नीरसत्वेनानादरज्ञापनाय वाशब्दः, भगवदवताररूपोपि बादरायणः प्रासङ्गिकेपि भक्तिमार्गस्मरणे तदीयरसावेशपरवशस्तद्भावस्वभावमनूक्तवान् ॥ २१ ॥

अपि च, उपसंहारो हि तत्रानुक्तानामन्यत्रोक्तानां गुणानां तत्र सत्त्वेन ज्ञानमात्रं, उक्तरूपभक्ताय तु तद्भजनीये भक्त एवालौकिकाननुभावान् भगवान् प्रत्यक्षं दर्शयतीति न तत्रोपसंहारापेक्षागन्धोपीति यथायोग्यमुत्तरं पठति ।

दर्शयति च ॥ २२ ॥

ननु भक्तभक्तः स्वसेव्येत्यलौकिकं वीर्यं दृष्ट्वा तदाविष्टे भगवति तत्सम्भारकत्वस्येन्द्रादीनामपि तदाज्ञापेक्षित्वं दृष्ट्वा द्युलोकादिव्यापकत्वस्योपसंहारं करिष्यतीत्याशङ्क्याह ।

सम्भृतिद्युव्याप्त्यपि चातः ॥ २३ ॥ (३. ३. ४.)

राणायनीयानां खिलेषु पठ्यते "ब्रह्मज्येष्ठा वीर्या सम्भृतानि ब्रह्माग्रे ज्येष्ठं दिवमाततान ब्रह्म भूतानां प्रथमं तु जज्ञे तेनार्हति ब्रह्मणा स्पर्धितुं कः" (तैत्ति. ब्रा. २.४.६.) इति, अस्यार्थस्तु, अन्यैर्हि पुरुषैः सहायानपेक्ष्य विक्रमाः सम्भ्रियन्ते तेन तत्पराक्रमाणां त एव

न वाविशेषात् ॥ २१ ॥ सूत्रमवतारयन्ति यस्त्वन्तरङ्गेत्यादिना, अस्य भक्तभक्तस्य, तद्भजनेति उपास्यभक्तभजनेत्यादि, तन्निरपेक्षत्वेन आधेयानिरपेक्षत्वेन, भजनं कुर्वन्नपि उपसंहारस्य वैधत्वेनोपसंहारपूर्वकं भजनं कुर्वन्नपीत्यर्थः, अनादरज्ञापनायेति, तथा चैकान्तभक्तानां रसानुभावकस्वरूप एव भजननियमो नतूपसंहारेपीति भावः, अनुवादप्रयोजनमाहुर्भगवदवतारेत्यादिना, तदीयेति भक्तिमार्गीयेत्यादि, तद्भावस्वभावं भगवद्भक्तिभावस्वभावं, अनूक्तवान् स्वस्य भक्तातादशायामेभिः सूत्रैः स्वयं निरूपितवानित्यर्थः ॥ २१ ॥

दर्शयति च ॥ २२ ॥ तत्र निरूप्यप्रकरणे, तद्भजनीये भक्ते भक्तिमार्गीयभजनीयभक्ते, अलौकिकान् रसरूपानित्यर्थः, यथायोग्यमुत्तरं पठति तादृशभक्तस्योपसंहारे प्रयोजनाभाव उत्तरं पठतीत्यर्थः, निराकृतार्थमेतत्सूत्रम् ॥ २२ ॥

सम्भृतिद्युव्याप्त्यपि चातः ॥ २३ ॥ सूत्रान्तरमवतारयन्ति नन्वित्यादि, तत्सम्भारकत्वस्य भगवत्स्वभिप्रवीर्यादिसमूहस्य द्युलोकादिव्यापकत्वस्य चेत्यर्थः, सूत्रार्थमाहुः सम्भृतिश्चेत्यादिना, तथा सम्भृतिद्यु-

---

१. अन्तरङ्गमिति पदाग्रेणेपिभाषु । २. अपिपदं त्रुटं पदागेषु । ३. नपदं त्रुटं पदापुस्तकयोः । ४. भगवत्वेनेति गोपुस्तके । ५. पठ्यन्ते. क्गोपुस्तकयो. । ६. स इतिपदं त्रुटं पुपुस्तके । ७. गास्यन्नं पृथक्पदं गोपुस्तके । ८. न इत्यपिकं कैपुस्तके । ९. ज्ञानमात्रमिति पुपुस्तके । १०. प्रथमान्तमेतद् गोपुस्तके । ११. सम्भृतमिदं पुगोपुस्तकयोः । १२. यथायोग्यमित्यपदं नास्ति पादग्रेषु । १३. द्युलोकेत्यादि सर्वेष्वादर्शः ।

नियतपूर्वभावित्वरूपकारणत्वेन ज्येष्ठाः, ब्रह्मधर्माणां तु ब्रह्मैव ज्येष्ठमनन्यापेक्षं सृष्ट्यादि करोतीत्यर्थः, एवं सति ब्रह्म ज्येष्ठं येषां तानि ब्रह्मज्येष्ठानि वीर्याणि, अत्र छन्दसि बहुवचनस्य डादेशः, किञ्च, अन्येषां वीर्याणां बलवद्भिर्मध्ये भङ्गोपि भवति, तेन ते स्ववीर्याणि न सम्बिभ्रति, ब्रह्मवीर्याणि तु ब्रह्मणा सम्भृतानि निःप्रत्यूहं सम्भृतानीत्यर्थः, तच्च ज्येष्ठं ब्रह्माग्रे इन्द्रादिजन्मनः प्रागेव दिवं स्वर्गमाततान व्याप्नुवन्नित्यमेव विश्वव्यापकमित्यर्थः, देशतोपरिच्छेदमुक्त्वा कालतोपि तमाह ब्रह्मेति, भूतानामाकाशादीनां पूर्वमेव जज्ञे आविर्भूवेत्यर्थः, एतेन वीर्यसम्भृतिद्युव्याप्तिप्रभृतिमाहात्म्यमुक्तं भवति, तथा च सम्भृतिश्च द्युव्याप्तिश्च तयोः समाहारस्तथा, एतावंपि स तत्र नोपसंहरति, तत्र हेतुः "न वाविशेषात्" (ब्र. सू. ३. ३. २१.) इतिसूत्रोक्त एवेत्यतिदिशत्यत एवेति, एतद्यथा तथा तत्रैवोक्तं, विषयवाक्योत्तरार्धोक्तधर्मानुद्देशेनैवं ज्ञायते भक्तस्यैहिकपारलौकिकोपयोगिधर्मोपलक्षणार्थं द्वयोरेवोद्देशः कृत इति, चकारेण दर्शनमप्युक्तं समुच्चीयते, अन्यच्च, स्पर्धाकृतिसम्भावनायां हि तद्योग्यतानिषेधः सम्भवति, सा चाविर्भूत एव भगवति सम्भवतीत्यखिलशक्त्याविर्भावपूर्वकमाविर्भूतस्य तस्यैतया श्रुत्या माहात्म्यमुच्यत इति गम्यते, एवं सत्येतद्वाक्योक्तधर्मयोरेवानुपसंहार्यत्वेन यत् कथनं तत्तु भक्तहृद्याविर्भूतं ब्रह्माप्येवम्भूतमेवेतिज्ञापनायातो युक्त एवानुपसंहारः ॥ २३ ॥ ३ ॥

इति तृतीयाध्याये तृतीयपादे तृतीयं कार्याख्यानादित्यधिकरणम् ॥ ३ ॥

तैत्तिरीयके "सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् स भूमिं विश्वतो वृत्वा अत्यतिष्ठद्दशाङ्गुलं पुरुष एवेदं सर्वं यद्भूतं यच्च भव्यम्" (तैत्ति. सं. ३. १२. १.) इत्यादिना पुरुषविद्या निरूप्यते, तत्रैव "ब्रह्मविदाप्नोति परम्" (तैत्ति. ब्रह्म.) इतिप्रश्ने "स वा एष पुरुषोन्नरसमयः" (तैत्ति. ब्रह्म.) इत्यारभ्य प्राणमयमनोमयविज्ञानमयानन्दमयात्मकं ब्रह्मस्वरूपं निरूप्यते, तत्र सर्वत्र "स वा पुरुषविध एव" (तैत्ति. ब्रह्म.) इति च पठ्यते, अत्रान्नमयादिषु पुरुषसूक्ते च पुरुषपदश्रवणादन्नमयादिषु सहस्रशीर्षवत्त्वाद्युपसंहारः कर्तव्यो न वेति भवति संशयः, किमत्र युक्तम् ? उपसंहर्तव्यमेवेति, कुतः ? सर्वत्र ब्रह्मण एवोपास्यत्वादत्राप्युपासनोक्तेर्ब्रह्मत्वपुरुषत्वयोरविशेषाद्विद्यैक्यादिति प्राप्त उच्यते, पुरुषविद्यायामिवेति ।

पुरुषविद्यायामिव चेतरेषामनाम्नानात् ॥ २४ ॥ (३. ३. ४.)

अन्नमयादिषु सहस्रशीर्षवत्त्वादिकं नोपसंहर्तव्यं, कुतः ? पुरुषविद्यायां यथा

व्याप्तिशब्दवाच्यः, सः भक्तभक्तः, तत्र भक्ते, तत्र अनुपसंहारे, सूत्रोक्त एव उपसहारे विशेषाभावाद्भक्तकृपयैवैहिकामुष्मिकसकलपदार्थानां सिद्धावुपसंहारे विशेषाभावादिति सूत्रोक्तोर्थोवसेय इत्यर्थः, तत्रैवोक्तं पूर्वसूत्र एवोक्तं, उत्तरार्धोक्तधर्मानुद्देशेन सूत्रकारेण विषयवाक्यपूर्वार्धोक्तवीर्यद्युव्याप्त्योरेवोद्देशः कृतो न तूत्तरार्धोक्तभूतादित्वेतरास्पर्ध्यत्वयोस्तेनेत्यर्थः, उपलक्षणार्थं उभयोर्बोधनार्थं, उद्देशः कृतः सूत्रकारेणोद्देशः कृत इत्यर्थः, चकारेण सूत्रोपात्तचकारेण, दर्शनं भक्तभक्तस्य भक्तकारितभगवद्दर्शनं पूर्वमुक्तं, सम्भावनायां हि भगवता स्पर्धितुं योग्यस्यान्यस्य सम्भावनायां हीत्यर्थः, एवम्भूतं अखिलशक्त्याविर्भावपूर्वकं स्वयमाविर्भूतम् ॥ २३ ॥ ३ ॥

॥ इति तृतीयतृतीये तृतीयाधिकरणम् ॥ ३ ॥

पुरुषविद्यायामिव चेतरेषामनाम्नानात् ॥ २४ ॥ एवमनारभ्याधीतवाक्योक्तधर्माणामनुपसंहारमुक्त्वा पूर्णाधिकारिभिरशेषपूर्णगुणं परं ब्रह्मैवोपास्यं न तु विभूतिरूपमिति बोधयितुमुपासनामार्गेपि विशेषतोनुपसंहारं वदतीत्याशयेनाधिकरणविषयवाक्यमाहुस्तैत्तिरीयक इत्यादि, तत्र सर्वत्र अन्नमयादिषु पुरुषसूक्ते चेत्यर्थः, अत्रापि अन्नमयादिष्वपि, अविशेषात् अन्नमयादिषु ब्रह्मत्वस्य पुरुषसूक्ते च पुरुषत्वस्योक्तेरुभयत्रापि ब्रह्मपुरुषत्वस्याविशेषा-

---

१. व्याप्तवदिति कपुंगोषु । २. भृतीति वपुस्तके । ३. एतावत्यपि सति तत्र नोपसंहार इतीति बपागोषु । ४. गन्तव्यमिति गोपुस्तके । ५. अध्याय इति पुंपुस्तके । ६. समस्तमिदं बपापुस्तकयोः । ७. चेति बपापुंगोषु । ८. चेनीति पापुस्तके । ९. विद्यैका स्यादिति गोपुस्तके ।

पुरुषस्वरूपं निरूप्यते न तथेतरेषामन्नमयादीनां विज्ञानमयान्तानां स्वरूपं तत्प्रकरणे निरूप्यते, तत्र हि पुरुषत्वमुच्यते, सहस्रपदमनेकत्वोपलक्षकं, अन्यथाक्ष्णां शिरोभ्यो द्वैगुण्यं वदेत्, तेन साकारव्यापकत्वमुक्तं भवति, तत्र पुरुषविधत्वं, स चाध्यात्मिकरूपः, तच्छरीराभिमान्यात्मा चान्य आधिदैविक उच्यते, न तथात्र, किञ्च, "पुरुष एवेदꣳ सर्वम्" (तैत्ति. सं. ३. १२. १.) इत्यादिना प्रपञ्चात्मकत्वं मुक्तिदातृत्वं चोक्त्वा नैतावन्मात्रमस्य माहात्म्यमितोपि महन्माहात्म्यमस्तीति वक्तुं प्रपञ्चरूपं तद्विभूतिरूपमिति "एतावानस्य महिमा" (तैत्ति. सं. ३. १२. १.) इत्यनेनोक्त्वा तत आधिक्यमाह "अतो ज्यायाꣳश्च पूरुषः" (तैत्ति. सं. ३. १२. १.) इति, एवमतिवैलक्षण्यात् पुरुषपदमात्रसाधर्म्येण नैकविधत्वं वक्तुं शक्यं न चोपसंहार इति, चकारात् "अम्भस्य पारे भुवनस्य मध्ये नाकस्य पृष्ठे महतो महीयान्" (तैत्ति. नारा.) इत्यादिश्रुतयः "सर्वतःपाणिपादं तम्" (भग. १३. १३.) इत्यादिस्मृतयश्च सङ्गृह्यन्ते, एतेन यत्किञ्चिद्धर्मसाम्येपि न मूलभूतब्रह्मरूपमत एव न तत्रोपास्यता तथात्वेनेति ज्ञापितं, अत एव भृगूपाख्याने अन्नमयादिब्रह्मज्ञानेपि जिज्ञासैवोक्ता, भृगोरानन्दरूपपरब्रह्मज्ञाने तु नोक्ता, तेनाशेषगुणपूर्णं ब्रह्मेत्युक्तं भवति, अत उत्तमाधिकारिभिस्तदेवोपासनीयं न विभूतिरूपमिति ज्ञापितम् ॥२४॥४॥

इति तृतीयध्याये तृतीयपादे चतुर्थं पुरुषविद्यायामित्यधिकरणम् ॥ ४ ॥

अथ निर्दोषत्वं ज्ञात्वा भजनीयमिति ज्ञापयितुमधिकरणान्तरमारभते, वाजसनेयिशाखायां "द्वया हं प्राजापत्याः" (बृह. ३. ३. १.) इत्युपक्रम्य तेषां मिथःस्पर्धामुक्त्वोच्यते "ते हं देवानूचुर्हन्तासुरान् यज्ञ उद्गीथेनात्ययामेति ते ह वाचमूचुस्त्वं न उद्गायेति तथेति तेभ्यो वागुदगायद्यो वाचि भोगस्तं देवेभ्य आगायद्यत् कल्याणं वदति तदात्मने ते विदुरनेन वै न उद्गात्रात्येष्यन्तीति तमभिद्रुत्य पाप्मनाविध्यन् स यः स पाप्मा यदेवेदमप्रतिरूपं वदति स एवं पाप्मा" (बृह. ३. ३. १.) इति, एवमेव प्राणचक्षुःश्रोत्रप्रभृतिषु पापवेधमुक्त्वोच्यते "अथैतमासन्यं प्राणमूचुस्त्वं न उद्गायेति तथेति तेभ्य एष प्राण उदगायत्ते विदुरनेन वै न उद्गात्रात्येष्यन्तीति तमभिद्रुत्य पाप्मनाविध्यन् स यथाश्मानमृत्वा लोष्ठो विध्वंसेतैवꣳ हं वै विध्वंसमाना विष्वञ्चो विनेशुः" (बृह. ३. ३. ३.) इति, छान्दोग्येपि प्राणादिष्वेवमेव पाप्मवेधमुक्त्वासन्येन तथेत्युच्यते, एतावान् पर विशेषः, वाजसनेयिनां गानकर्तृत्वं सामगानामुद्गीथत्वेनोपास्यत्वमुच्यते वाक्प्राणादीनामिति, अत्र देहसम्बन्धित्वगानकर्तृत्वयोरुपास्यत्वस्य

दित्यर्थ, सूत्रेण पुरुषेत्यादिना सिद्धान्तमाहुरन्नमयादिष्विति, स्वरूपं निरूप्यते सहस्रशीर्षेत्यादिना पुरुषस्वरूप निरूप्यत इत्यर्थ, तत्र हि पुरुषविद्याया हि, तत्र अन्नमयाद्युपासनाप्रकरणे, स च अन्नमयादिरूप. पुरुषविधश्च, न तथात्र पुरुषोपासनेनाध्यात्मिकोपासनमित्यर्थ, अतिवैलक्षण्यात् अन्नमयाद्यपेक्षयोपास्यपुरुषस्यातिवैलक्षण्यात्, मूलभूतब्रह्म पुरुषोत्तम, न तत्रोपास्यता न विभूतिरूपे तेन रूपेणोपास्यतेत्यर्थ, तेन विभूतिवैलक्षण्येन ॥ २४ ॥ ४ ॥

॥ इति तृतीयतृतीये चतुर्थाधिकरणम् ॥ ४ ॥

---

१ प्रकरण इति पुपुस्तके। २ अत्र हीति पुव्यतिरिक्तेषु सर्वेष्वादर्शेषु। ३. °लक्षणमिति गोपुस्तके। ४ °विषयत्वमिति गोपुस्तके। ५ एव सतीति पुंपुस्तके। ६. नैकविधत्व न चोप° वपापुस्तकयो। ७ °पाद तदिति कपुस्तके। ८ मूलभूतब्रह्मरूपत्वमिति वपागोपु। मूलभूतधर्मरूपत्वमिति पुंपुस्तके। ९ निर्दोषमितीति पापुस्तके। १० द्वया ह प्रजापत्या इति कैवपुंपु। द्वयमाह प्रजेति गोपुस्तके। ह वा इति च पापुस्तके। ११ ह पद लुप्त गोपुस्तके। १२. अगादिति कंपुस्तके। आगादिति वपुस्तके। अगायदिति च पुपुस्तके। १३. °विध्यनिति पुपुंगोपु। १४. एव स इति कंपुस्तके। १५ एनमिति वपापुंगोपु। १६. हैवेति पुपुंपुस्तकयो। १७. वाक्प्राणेन्द्रियादीनामिति गोपुस्तके।

चाविशेषेपि वागादिषु पाप्मवेध आसन्यप्राणे कुतो नेति भवति जिज्ञासा, न चासन्योपासनाया विधेयत्वात् तत्स्तुत्यर्थमन्येषु पाप्मवेध उच्यतेस्मिन्नेति वाच्यं, न हि प्रयोजनायासन्तमप्यर्थं बोधयति श्रुतिरिति वक्तुं शक्यं, प्रमाणत्वव्याहतिप्रसङ्गात्, एकत्र प्रतारकत्वे सर्वत्रापि तच्छङ्कया तदुक्ते कोपि न प्रवर्तेतापि, साक्षात्क्रियार्थत्वाभावेपि नासन्निरूपकत्वमर्थवादानां, वस्तुतस्तु "यदेव विद्यया करोति श्रद्धयोपनिषदा वा तदेव वीर्यवत्तरं भवति" (छान्दो. ३. १. १०.) इतिश्रुतेः, "ज्ञात्वाज्ञात्वा च कर्माणि जनोयमनुतिष्ठति विदुषः कर्मसिद्धिः स्यात् तथा नाविदुषो भवेत्" (श्रीमद्भाग. १०. २१. ६.) इत्यादिवाक्यैः "य एवं वेद" (तैत्ति. ब्रह्म.) इतिवाक्यैश्चार्थवादोक्तस्वरूपं ज्ञात्वा कर्मकरणे पूर्णं फलमन्यथा नेत्यर्थवादानां फलोपकार्यङ्गनिरूपकत्वान्नानर्थक्यमत उक्तेर्थे हेतुं न पश्याम इति प्राप्ते तमेवाह वेधादीति ।

वेधाद्यर्थभेदात् ॥ २५ ॥ (३. ३. ५.)

वाक्प्राणादिषु यः पाप्मवेधः, आदिपदात् दुष्टविषयसम्बन्धश्च, तत्र हेतुरर्थभेदः, अर्थो भगवांस्तस्माद्भेदादित्यर्थः, आसन्यस्तु "य एवायं मुख्यः प्राणस्तमुद्गीथमुपासीत" (छान्दो. १.२.७.) इति छान्दोग्य उपास्यत्वेनोक्तः, "सर्ववेदान्तप्रत्ययम्" (ब्र. सू. ३.३.१.) इतिन्यायाद्वेदान्तेषूपास्यं ब्रह्मातिरिक्तं नोच्यत इत्यासन्योपि ब्रह्माभिन्नोत एव "अपहतपाप्मा ह्येषः" (छान्दो. १. २. ९.) इति सामगैः पठ्यते, अतस्तत्र न पाप्मवेध इतिभावः, ब्रह्मणः स्वतन्त्रपुरुषार्थत्वज्ञापनायार्थपदेनोक्तिः, एतेन विभूतिरूपेपि यत्रैवं तत्र मूलभूतब्रह्मणि निर्दोषत्वे किं वाच्यमिति ज्ञापितम् ।

अथवा अर्थः प्रयोजनं विषय इति यावत्, तद्भेदादित्यर्थः ।

अत्रेदमाकूतं, देवा हि स्वस्यासुरजयाय गानार्थं वागादीनूचुः "त्वं न उद्गाय" (बृह. ३.३.१.) इति, गानानन्तरं "यो वाचि भोगस्तं देवेभ्य आगायत्" (बृह. ३. ३.१.) इत्युच्यते, एवमेव प्राणादिष्वपि स्वस्वभोगं "देवेभ्य आगायत्" इति, एवं सति देवार्थमेवैतद्गानं न तु भगवदर्थं, यद्यप्यासन्येप्येवमुच्यते "तेभ्य एष प्राण उदगायत्" (बृह.३.३.३.) इति तथापि यथा वागादिषु स्वनिष्ठभोगं "देवेभ्य आगायत्" (बृह. ३. ३. १.) इत्युक्तं तथा नासन्ये, तेनोक्तमानैर्ब्रह्मात्मकत्वेनासुरजयहेतुर्भगवत्सम्बन्ध एवेति ज्ञात्वा तथैवागायदासन्य इति ज्ञायते, अत एवान्यत्र वेध उक्तोत्र तत्करणेच्छायामप्यासुराणां नाश उक्तः,

---

वेधाद्यर्थभेदात् ॥ २५ ॥ अधिकरणमवतारयन्त्यथेत्यादि, तेषां देवासुराणां, अत्ययाम जयेम, ते देवाः, ते असुराः, विध्वञ्चो विनेशुः असुराः सर्वतोदिशं विनाशं प्रापुरित्यर्थः, तथेत्युच्यते न पाप्मवेध उच्यत इत्यर्थः, सन्देहमाहुरत्रेत्यादि, अविशेषेपि उक्तधर्मत्रयस्य वागादावासन्ये च तुल्यतायाः सत्वेपीत्यर्थः, भवति जिज्ञासेति, तथा च वागादिषु पाप्मवेधः सत्यो न वेति भवति विचार इत्यर्थः, पाप्मवेधस्य सिद्धत्वेनोक्तिः सन्देहबीजं, अस्मिन्निति आसन्ये पाप्मवेधो नेत्युच्यत इत्यर्थः, प्रयोजनाय आसन्यस्तुतिरूपप्रयोजनायेत्यर्थः, क्रियार्थत्वं यज्ञार्थत्वं, फलोपकार्यङ्गेत्यादि अर्थवादानामर्थः, फलोपकार्यङ्गं तज्ज्ञानसम्पादकत्वेनार्थवादान सार्थक्यमित्यर्थः, उक्तेर्थे अन्यत्र पाप्मवेधो नास्तीत्युक्तेर्थे इत्यर्थः, दुष्टेत्यादि असुराणां सम्बन्ध इत्यर्थः, अर्थपदेनोक्तिः सूत्रे ब्रह्मणोर्थपदेनोक्तिरित्यर्थः, यत्रैवं ब्रह्माभेदान्निर्दोषत्वं, अर्थपदस्य ब्रह्मरूपार्थत्वानङ्गीकारे त्वाहुरथवेत्यादि, तद्भेदात् आसन्यापेक्षया वागादीनां भेदादित्यर्थः, तथा नासन्ये आसन्यः स्वनिष्ठभोगं देवेभ्यो नागायदित्यर्थः, तेन अन्यादृशगानेन, उक्तमानैः आसन्ये वेधासुरसम्बन्धाभावरूपमानैः, ब्रह्मात्मकत्वेन

---

१. अस्मिन्नितीति पापुस्तके । २. उद्गीथमिति त्रुटं पापुस्तके । ३. अर्थपदेनोक्तेरिति गोपुस्तके । ४. निर्दोषत्वमिति कँवपापुगोपु । ५. भोगस्त इति कैंपुस्तके । ६. सर्वत्रैव गोपुस्तकेगायदिति । ७. एष इति त्रुटं ग्रेपुस्तके ।

अग्रे च "भवत्यात्मना परास्य द्विषन् भ्रातृव्यो भवति य एवं वेद" (बृह. ३. ३. ७.) इति पठ्यते, तेन परब्रह्म निर्दोषमिति किमु वाच्यं ? यत्र तद्विभूतिरूपासन्यस्योक्तरूपतां यो वेत्ति सोपि गुणयुक्तो दोषरहितश्च भवतीति कैमुतिकन्यायः सूचितो भवति, एतेन लोके दोषत्वेन ये धर्माः प्रतीयन्ते त एव धर्मा भगवति निरूप्यमाणा न दोषत्वेन ज्ञेयाः किन्तु गुणत्वेनैव वस्तुन[3] एव तथात्वादितिभावो ज्ञाप्यते ॥ २५ ॥

एवं भगवत्सम्बन्धाभावे दोषसम्बन्धमुक्त्वा तथा सति गुणहानिं च वदंस्तत्र विशेषमाह।

हानौ तूपायनशब्दशेषत्वात् कुशाच्छन्दःस्तुत्युपगानवत्तत् तदुक्तम् ॥ २६ ॥

"तदा विद्वान् पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैति" (मुण्ड. ३. ३. १.) इत्याथर्वणिकैः पठ्यते, परमपदेन ब्रह्मोच्यते, तथा च सकार्याविद्यारहितः "परममुपैति" तदनन्तरं "साम्यमुपैती"तियोजना, तत्रेदं विचार्यते, साम्यंहि समानजातीयधर्मवत्त्वं, तच्च कतिपयधर्मैरशेषतन्निष्ठधर्मैर्वा भवति तत्रान्त्यः पक्षो ब्रह्मणा समं न सम्भवति, "न तत्समश्चाभ्यधिकश्च दृश्यते" (श्वेता. ६. ८.) इतिश्रुतिविरोधात्, अत आद्य एव पक्षोनुसर्तव्यः, तत्र कैर्धर्मैः साम्यमिहोच्यत इत्याकाङ्क्षायामाह हानाविति, ब्रह्मणः सकाशाद्विभागो जीवस्य हानिशब्देनोच्यते, तथा च तस्यां सत्यां ये धर्मा जीवनिष्ठा आनन्दांशैश्वर्यादयो भगवदिच्छया तिरोहितास्ते ब्रह्मसम्बन्धे सति पुनराविर्भूता इति तैरेव तथेत्यर्थः, भगवदानन्दादीनां पूर्णत्वाज्जीवानन्दादीनामल्पत्वात् नाम्नैव समैर्धर्मैः कृत्वा ब्रह्मसाम्यं जीव उपचर्यते "साम्यमुपैति"इति, वस्तुतस्तु नैतैरपि धर्मैः साम्यमितिभावः, अत एव "न तत्समः"इति श्रुतिरविरुद्धा, अत एव सूत्रकृता "साम्यमुपैती"ति साम्योपायनशब्दमात्रं न तु साम्यपदार्थः स्वारसिकोत्रास्तीतिभावप्रकटनाय शब्दशब्द उक्तः, ननु तैरेव धर्मैः साम्यं नेतरैरित्यत्र को हेतुरित्याकाङ्क्षायामाह उपायनशब्दशेषत्वादिति, "परममुपैती"ति य उपायनशब्दस्तच्छेषत्वात् साम्योपायनस्येत्यर्थः, ब्रह्मसम्बन्धहेतुकत्वादानन्दांशाद्याविर्भावस्य तदैव साम्योपायनकथनात्तैरेव धर्मैः साम्यमभिप्रेतमितिभावः, नन्वानन्दादीनां ब्रह्मधर्मत्वात् तैस्तत्साम्यकथनं तदभेदमेव गमयतीत्याशङ्क्य तद्धर्मवत्त्वमात्रस्य न तदभेदसाधकत्वमित्यत्र दृष्टान्तमाह कुशेत्यादि, कुशा

गीयमानार्थस्य ब्रह्मात्मकत्वेनेत्यर्थः, तथैव स्वस्मिन् भगवत्सम्बन्धार्थं भगवदुद्देशेनैव, अन्यत्र यागादिषु, अत्र आसन्ये, तत् वेधः, तेन भगवत्सम्बन्धादन्येषां निर्दोषत्वेन, सोपि आसन्योपासकोपि, वस्तुन एव ब्रह्मात्मकवस्तुन एव, तथात्वात् दोषत्वनिराकरणपूर्वकगुणत्वसम्पादकत्वादित्यर्थः, अत एवा'ज्ञत्वं पारवश्यं च विधिभेदादिकं तथा तथा प्राकृतदेहत्व देहत्यागादिकं तथा असुराणां विमोहार्थं दोषा विष्णोर्न हि क्वचि'दिति ब्रह्माण्डवाक्यम् ॥ २५ ॥

हानौ तूपायनशब्दशेषत्वात् कुशाच्छन्दःस्तुत्युपगानवत् तदुक्तम् ॥२६॥ सूत्रमवतारयन्ति एवमित्यादिना, तथा सति दोषसम्बन्धे सति, सूत्रार्थोपयोगित्वाद्भगवत्सम्बन्धे फलविशेषबोधिकां श्रुतिमाहु'स्तदे'त्यादि, एतत्पूर्वार्धं तु 'यदा पश्यः पश्यते रुक्मवर्णं कर्तारमीशं पुरुषं ब्रह्मयोनि'मिति, पठ्यते मुण्डके पठ्यते, सकार्या पुण्यपापरूपस्वकार्यसहिता, आद्यः पक्षः कतिपयधर्मैः साम्यपक्षः, तैरेव तथा आविर्भूतानन्दैश्वर्यांशैरेव साम्यं वाच्यमित्यर्थः, साम्योपायनं साम्यप्राप्तिः, तच्छेषत्वात् तदर्थप्रतिपादकत्वात्, तैरेव धर्मैः व्युच्चरणकालतिरोहितैरेव धर्मैः पुनः प्राप्तैः साम्यमित्यर्थः, कुशेत्यादीति, तथा कुशाभिः कृत्वा छन्दःस्तुत्युपगानसाधनभकारत्वादित्यर्थः,

१. परात्मद्विषन्निति कैपुस्तके परास्यं द्विषन्निति च यपुस्तके। २. दोषत्वेन नेति कैपुस्तके। ३. वस्तुत इति यपुस्तके। ४. कुशाच्छन्द इत्यादि कपुस्तके। ५. धर्मत्वमिति कैपुस्तके। ६. समो धर्म इति कपुस्तके सर्वैर्धर्मैरिति पैपुस्तके। ७. शब्दइति पुपुंगोपु।

औदुम्बर्यः समिधः, ता अग्निष्टोमादियागेषु प्रस्तोत्रा स्थाप्यन्ते[1], तदा तत्सम्बन्धि यच्छन्दःस्तुत्युपगानं तद्वदित्यर्थः, तत्र "अभि त्वा शूर नोनुमो दुग्धा इव धेनवः" (ऋ.सं.५.३.२१.) इत्यृचि ये वर्णास्तेषामच एवोपसंहृत्य भकारेणैव[2] गानं क्रियते, न हि तदार्चिकवर्णधर्माणामचामुपसंहारोस्तीति तद्दात्मकत्वं भकारस्य सम्भवति, एवं प्रकृतेपि ब्रह्मधर्मप्राकट्येन[3] न तदात्मकत्वं जीवस्य सम्भवति, ननु "तत्त्वमसि" (छान्दो.८.८.७.) आदिवाक्यैरत्राभेदबोधनादस्तु तथेति चेत् तत्राह तदुक्तमिति[4], जीवब्रह्माभेदबोधनतात्पर्यमुक्तमित्यर्थः, "तद्गुणसारत्वात्तु तद्व्यपदेशः प्राज्ञवत्" (ब्र. सू. २. ३. २९.) इतिसूत्रेणेतिशेषः, अपि च श्रुतौ ब्रह्मोपायनस्य साम्योपायनहेतुत्वोक्त्या तदनुपायनस्य साम्यानुपायन हेतुत्वमिति ज्ञाप्यते, तथा च "पराभिध्यानात् तु तिरोहितं ततो ह्यस्य बन्धविपर्ययौ" (ब्र. सू. ३. २. ५.) इतिसूत्रे जीवस्य ब्रह्मांशत्वेनानन्दैश्वर्यादिब्रह्मधर्मवत्त्वाद्ब्रह्मणः सकाशाद्विभागे सति तदिच्छया तद्धर्मतिरोधानस्य संसारित्वे[5] हेतुत्वमुक्तं यत्तदपि तदुक्तमित्यनेन स्मार्यत इति न विस्मर्तव्यं, यथान्यशाखोक्तधर्मा अप्येकस्यां विद्यायामुपसंह्रियन्त एवं ब्रह्मनिष्ठा धर्मा जीवेप्येतया श्रुत्या बोध्यन्त इत्येतावत्साम्यमस्तीत्युपसंहारप्रकरण एतस्य निरूपणं कृतम् ॥ २६ ॥ ५ ॥

इति तृतीयाध्याये तृतीयपादे पञ्चमं वेधाद्यधिकरणम् ॥ ५ ॥

वाजसनेयिशाखायां "स एष नेति नेतीत्यात्मा" (बृह.५.९.२६.) इत्युपक्रम्य "न व्यथते" (बृह.५.९.२६.) इत्यन्तेन ब्रह्मस्वरूपमुक्त्वा[6] एतादृग्ब्रह्मज्ञातस्तद्विदपि विवक्षितरूप इत्यभिप्रायेणाग्रे पठ्यते "अतः पापमकरवमतः कल्याणमकरवमित्युभे ह्येष एते तरत्यमृतः" (बृह.६.४.२२.) इत्यादिनाग्रिमया "एष नित्यो महिमा ब्राह्मणस्य" (तै.ब्रा.३.१२.९.७.) इत्यृचा[10] च ब्रह्मविदो माहात्म्यमुक्त्वा पठ्यते "तस्मादेवंविच्छान्तो दान्त उपरतस्तितिक्षुः श्रद्धावित्तो भूत्वात्मन्येवात्मानं पश्येत् सर्वमेनं पश्यति सर्वोस्यात्मा भवति सर्वस्यात्मा भवति सर्वं पाप्मानं तरति नैनं पाप्मा तरति" (बृह.६.४.२३.) इत्याद्युक्त्वान्ते पठ्यते "य एवं वेद" (बृह.६.४.२५.) इति, अत्र हि पाप्मतरणादिरूपं ब्रह्मज्ञानमाहात्म्यमुच्यते ज्ञानस्य संसारमुक्तिहेतुत्वात्, आथर्वणोपनि-

इत्थं च भकारेण गानकरणेपि न भकारस्य ऋगन्तःपातित्वं तद्वज्जीवेपि ब्रह्मसाम्यमुक्तमिति न जीवे ब्रह्माभेद इत्यर्थः सूत्रस्य, तेषामच इत्यादि, तथा च ऋग्वर्णाचां मकार उपसंहारं कृत्वा 'नमि' इत्यादिरीत्या भकारेण गाने क्रियमाणेपीत्यर्थः, एवं प्रकृतेपि जीवब्रह्मस्थलेपीत्यर्थः, अस्तु तथा जीवब्रह्मणोरभेदोस्त्वित्यर्थः, जीवेत्यादि जीवधर्मो मुक्तिदशायामाविर्भूतं निर्दोषत्वं ब्रह्मणि च तत् सार्वदिकं तयोरभेद इत्यत्र तात्पर्यं श्रुतेरित्यर्थः, एतदर्थस्य सूत्रकारसम्मतत्वमाहु'स्तद्गुणसार' इत्यादिना, ब्रह्मोपायनं ब्रह्मप्राप्तिः, साम्योपायनं साम्यप्राप्तिः, तदनुपायनस्य ब्रह्माप्राप्तेर्युचरणस्येत्यर्थः, साम्यानुपायनं साम्याभावः, एतया श्रुत्या 'विद्वान् पुण्यपापे विधूये'तिश्रुत्या ॥ २६ ॥ ५ ॥

इति तृतीयतृतीये पञ्चमाधिकरणम् ॥ ५ ॥

सम्पराये तर्तव्याभावात् तथा ह्यन्ये ॥२७॥ जीवस्य भगवत्सम्बन्धसाधनयोर्ज्ञानभक्त्योर्मध्ये किं ज्याय इति विचारयितुमधिकरणारम्भ इति तत्र विषयवाक्यमाहुर्वाजसनेत्यादि आथर्वणेत्यादि च, एतद्विषयवाक्यात् पूर्वं शारीरब्राह्मणे 'मनसैवानुद्रष्टव्य'मितिज्ञानसाधनमुक्तं तदनन्तरं 'विरजः पर आकाशा'दित्यादिना विरजस्त्वादिधर्मान् ब्रह्मणि प्रतिपाद्य तदनन्तरं तावन्मात्रत्वं ब्रह्मणो 'नेति नेती'त्यनेन निषेधयित्वा 'गृह्यो न हि गृह्यते न व्यथत' इत्यादिना लौकिकप्रमाणागोचरत्वं सर्वविलक्षणत्वं च बोधयित्वा ब्रह्मस्वरूपबोधनानन्तरं, तद्विदपि ब्रह्मस्वरूपविदपि, विवक्षितरूपः पुण्यपापरहितः, एते पुण्यपापे, अत्र उक्तवाक्ये, ब्रह्मज्ञानमाहात्म्यं

१. स्थाप्यत इति कैंपुस्तके । २. मकारो वाच्यते सर्वत्र कैंपुस्तके । ३. °धर्माप्राकट्येनेति कैंपुस्तके । ४. तदुक्तमपीतिगोपुस्तके । ५. °सनस्येति कैंगोपुस्तकयोः । ६. समस्तमिदं कैंपुस्तके । ७. यत इत्यधिकं चपापुंगोषु । ८. अम इति लुप्तं कैंगोपुस्तकयोः । ९. उभे इति द्विरुक्तं कपुपुस्तकयोः । १०. ऋक्संहितायामियं सम्प्रति नोपलभ्यतेपि तु तैत्तिरीयशतपथब्राह्मणबृहदारण्यकोपनिषद्बोधायनधर्मसूत्रेषु ।

पदादिषु तु भगवद्भक्तेर्मुक्तिहेतुत्वमुच्यते "परं ब्रह्मैतद्यो धारयति" (गो. पू. १.) इत्युपक्रम्य "भजति सोऽमृतो भवति" (गो. पू. १.) इति, अग्रेपि "मुक्तो भवति संसृतेः" (गो. पू. १.) इति, एतद्विषयव्यवस्था तु पुरैवोक्तेति नात्रोच्यते, एतावान् परं सन्देहो "य एवं वेद स पाप्मानं तरति" (बृह. ६. ४. २३.) इतिवचनाज्ज्ञानदशायामपि पापसत्त्वं वाच्यं, अन्यथा तरणासम्भवापत्तेः, एवं सति भक्तिदशायामप्येवमेव न वेति भवति संशयः, तत्र श्रुताविशेषेण पापनाशश्रवणात् मुक्तिपूर्वकाले पापनाशावश्यम्भावात् 'एकत्र निर्णीतः शास्त्रार्थोऽपरत्रापि तथा' इतिन्यायेन भक्त्या पापनाशादत्रापि तथैवेति प्राप्त आह सम्पराय इत्यादि,

सम्परायें तर्तव्याभावात् तथा ह्यन्ये ॥ २७ ॥ (३. ३. ६.)

सम्परायः परलोकस्तस्मिन् प्राप्तव्ये सतीत्यर्थः, अथवा परः पुरुषोत्तमस्तस्यायो ज्ञानं, तथा च सम्यग्भूतं पुरुषोत्तमज्ञानं येन स सम्परायो भक्तिमार्ग इतियावत्, अथवा परे पुरुषोत्तमे अयनमयो गमनं प्रवेश इतियावत्, तथा च सम्यक् परायो येन स तथा भक्तिमार्ग इत्यर्थः, ज्ञानमार्गेक्षरप्राप्त्या भक्तिमार्गे पुरुषोत्तमप्राप्त्या तस्माद्विशेषमत्र ज्ञापयितुमेवंकथनमतो भक्तेः पूर्वमेव पापनाशो युक्त इतिभावः, ब्रह्मभूतस्य भक्तिलाभानन्तरं "भक्त्या मामभिजानाति" (भग. १८. ५५.) इति भगवद्वाक्यात् पुरुषोत्तमस्वरूपज्ञानस्य भक्त्यैकसाध्यत्वात् तथा, एवं सति "मुक्तानामपि सिद्धानां नारायणपरायणः सुदुर्लभः प्रशान्तात्माकोटिष्वपि महामुने" (श्रीमद्भाग. ६.१४.५.) "मुक्तोपसृप्यव्यपदेशात्" (ब्र. सू.१.३.२.) "जन्मान्तरसहस्रेषु तपोध्यानसमाधिभिः नराणां क्षीणपापानां कृष्णे भक्तिः प्रजायते" (पा. गी. ४०.) "जन्मान्तरसहस्रेषु समाराध्य वृषध्वजं वैष्णवत्वं लभेत् कश्चित् सर्वपापक्षयादिह" (वारा. पु. प्र. मा.) इत्यादिवाक्यैः पापनाशानन्तरमेव भक्तिसम्भवाद्भक्तस्य तर्तव्यपापादेरभावान्न ज्ञानमार्गीयतुल्यतेत्यर्थः, ननु "य एवं वेद" (बृह. ६.४.२३.) इतिसामान्यवचनात् पुरुषोत्तमविदोप्येवमेवेति चेत् तत्राह तथा ह्यन्ये, तथा ज्ञानानन्तरमपि पापवन्तोन्ये भक्तिमार्गीयेभ्योन्य इत्यर्थः, उक्तवचनरूपोपपत्तिर्हिशब्देन ज्ञाप्यते ॥ २७ ॥

अक्षरब्रह्मज्ञानमाहात्म्यं, ब्रह्मैतत् पुरुषोत्तमरूपं, अग्रेपि पुरुषोत्तमस्वरूपत्वात् पूर्वमपि, एतद्विषयव्यवस्था उक्तश्रुत्योर्विषयीभूते ये ज्ञानभक्ती तयोर्व्यवस्थाधिकारिभेदेन रूपभेदनिरूपणाज्ज्ञानिमिर्धर्मोपसंहारः कार्यो न भक्तैरित्येवंरूपा पूर्वोक्ता 'न वा प्रकरणभेदा'दितिसूत्रविवरण एवोक्ता, संशयबीजमाहुरेतावानित्यादिना, एवं सति ज्ञानभक्त्योः समानतया मुक्तिसाधनत्वावगमे सति भक्तिदशायां भक्त्या मुक्तिरितिकल्पे, एवमेव भक्तिकालेपि पापसत्त्वमेव, तत्र तादृशविषये, अविशेषेण ज्ञानभक्तिमार्गसाधारण्येन, पापनाशः पुण्यपापतरणं, सम्परायशब्दस्य मुक्त्यर्थत्वे 'भक्त्ये'त्यध्याहारापत्तेः पक्षान्तरमाहुरथवेत्यादिना, तथा च सम्पराय इत्यत्र सम्परायो लीलाप्रवेशः, एवंकथनं व्यासचरणानामेवमर्थकसम्परायशब्दकथनमित्यर्थः, पूर्वमेव ब्रह्मभावदशायामेव, एवं सति 'जन्मान्तरसहस्रेषु समाराध्य वृषध्वजं वैष्णवत्वं लभेत् कश्चित् सर्वपापक्षयादिहे'त्यादिवाक्यैर्ब्रह्मभावानन्तरमेव भक्तिलाभेन तेन पापनाशाद्भक्तिकाले पापाभावे सति 'नराणां क्षीणपापानां कृष्णे भक्तिः प्रजायत' इत्युपष्टम्भकं, सूत्रशेषं व्याख्यातुमवतारयन्ति नन्वित्यादि, अन्ये भक्तिमार्गीयभिन्नाः ॥ २७ ॥

---

१. योमृत इति कपुपुस्तकयोः । २. भवतीति लुप्तं गोपुस्तके । ३. साम्पराय इति गोपुस्तके । ४. साम्पराय इति कपुपुस्तकयोः । ५. तथेति लुप्तं पुंपुस्तके । ६. इति यावदिति गोपुस्तके । ७. भक्त्येक॰ पुंगोपुस्तकयोः । ८. अभावत्वादिति कपुस्तके । असम्भवादिति च पुंपुस्तके । ९. ॰वचनोपपत्तिरिति पुंपुस्तके ।

ननु भक्तिमार्गीयाणामपि गोपस्त्रीणां "दुःसहप्रेष्ठविरहतीव्रतापधुताशुभाः ध्यानप्राप्ता-च्युताश्लेषनिर्वृत्या क्षीणमङ्गलाः" (श्रीमद्भाग. १०.२६.१०.) इतिवचनेन दुष्कृतसुकृतयोरपि हानिश्रवणात् पूर्वोक्तवचनैर्विरोध इत्याशङ्कायामुत्तरं पठति ।

छन्दत उभयाविरोधात् ॥ २८ ॥

छन्द इच्छा, तथा च भक्तिमार्गीयाणामपि पूर्वं पापनाशो यः स भगवदिच्छाविशेषतोतो[1] भक्तेः पूर्वमेव पापनाशनिरूपकात्तन्नाशनिरूपकवचनयोरविरोधाद्धेतोर्भक्तेः पूर्वमेव पापनाश आवश्यक इत्यर्थः, एवं सति भक्तेः पूर्वमेव तन्नाश औत्सर्गिकः, स क्वचिद्विशेषेच्छयापनोद्यत इतिभावो ज्ञापितो भवति, अत्रेच्छाविशेषे[2] वक्तव्यबहुत्वेपि किञ्चिदुच्यते[3], चिकीर्षितलीलामध्यपातिभक्ता न सोपधिस्नेहवत्यो न सगुणविग्रहा न वा सुकृतादियुक्ता इति ज्ञापयितुं कतिपयगोपीस्तद्विपरीतधर्मयुक्ताः कृत्वा तस्यां दशायां[4] स्वमाप्तौ प्रतिबन्धं कारयित्वा स्वयमेव तादृशान् नाशयित्वा स्वलीलामध्यपातिनीः कृतवानिति, न ह्येतावता सार्वदिक एवायं भावो भवति, न हि मन्त्रप्रतिबद्धशक्तिरग्निरदाहक इति तत्स्वभावत्वमेव तस्य सार्वदिकमिति वक्तुं शक्यं, एतच्च श्रीभागवतदशमस्कन्धविवृतौ प्रपञ्चितमस्माभिः ॥ २८ ॥ ६ ॥

इति तृतीयाध्याये तृतीयपादे षष्ठं सम्परायाधिकरणम् ॥ ६ ॥

ननु "सत्यं ज्ञानमनन्तं ब्रह्म यो वेद निहितं गुहायां परमे व्योमन्" (तै. ब्र.) इति "तमेवं[5] विद्वानमृत इह भवति नान्यः पन्था विद्यतेयनाय" (तै.आ.३.१२.७.) इत्यादिश्रुतिभिरुक्तरूपब्रह्मज्ञाने सत्येव मोक्ष इत्युच्यते, "यमेवैष वृणुते तेन लभ्यः" (कठो. २. २२.) इतिश्रुत्यात्मीयत्वेनाङ्गीकारात्मकवरणस्य भक्तिमार्गीयत्वात् तस्मिन् सति भक्तिमार्गे प्रवेशाद्भक्त्यैव स इत्युच्यते, किञ्च "भक्त्या मामभिजानाति" (भग. १८. ५५.) इत्युक्त्वा "ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरम्" (भग.१८.५५.) इति भगवतोक्तमिति भक्तिमार्गेपि पुरुषोत्तमज्ञानेनैव मोक्ष उच्यते ज्ञानमार्गे त्वक्षरज्ञानेनेतिविशेषः, "तस्मान्मद्भक्तियुक्तस्य योगिनो वै मदात्मनः न ज्ञानं न च वैराग्यं प्रायः श्रेयो भवेदिह" (श्रीमद्भाग. ११.२०.३१.) इतिवचनेन भक्तिमार्गीयस्य ज्ञानैनैरपेक्ष्यमप्युच्यते[6], तथा चैवं मिथःश्रुत्योः स्मृत्योश्च[7] विरोधान्नैकतरनिर्धारः

छन्दत उभयाविरोधात् ॥ २८ ॥ सूत्रमवतारयन्ति ननु भक्तीत्यादि, सूत्रार्थमाहुश्छन्द इच्छेत्यादिना, एवं सति भक्तेः पूर्वं पापनाशस्य 'नराणां क्षीणपापाना'मितिबहुवचनसिद्धत्वे सति, औत्सर्गिकः अनियतः, सः नियमाभावः, अपनोद्यते नियमाभावापनोदनेन नियमः स्थाप्यत इत्यर्थः, सोपधिस्नेहः किञ्चित्प्रयोजनाय स्वयं साधनैः सम्पादितः स्नेहः, सगुणेत्यादि, सगुणाः प्रकृतिगुणसहिताः, प्राकृताः, सुकृतेत्यादि, तद्विपरीतेत्यादि, तथा चेच्छिकं भगवत्प्राप्तिप्रतिबन्धकं यल्लौकिकं प्राकृतगुणसुकृतादि तत्सदृशं यद्गुणसुकृतादि केवलं 'लोकवत्तु लीलाकैवल्य'मितिवाक्यात्तद्विशेषान् कृत्वेत्यर्थः, तादृशान् लौकिकसदृशगुणसुकृतादीन्, सार्वदिकः इच्छाविशेषेण सम्पादितः, न हि मन्त्रेत्यादि, तथा च भगवदिच्छासम्पादितभगवत्प्राप्तिप्रतिबन्धकीभूततादृशगुणकृतादिविशिष्टा अपि गोप्यो भगवत्प्राप्तियोग्या नेति नेत्यर्थः ॥ २८ ॥ ६ ॥

इति तृतीयतृतीये षष्ठाधिकरणम् ॥ ६ ॥

गतेरर्थवत्त्वमुभयथान्यथा हि विरोधः ॥ २९ ॥ पूर्वाधिकरणे ज्ञानिज्ञानाभ्यां भक्तिभक्तयोरुत्कर्षप्रतिपादितः स एव पुनरधिकरणान्तरेण दृढीकरोतीति प्रतिपादयन्ति नन्वित्यादिना, भक्त्यैव स मोक्षः, श्रुत्योर्विरोधमुक्त्वा स्मृत्योर्विरोधमाहुः किञ्चेत्यादिना, नैकतरनिर्धार इति, तथा च ज्ञानेन मोक्षो भक्त्या वेतिसंशयः,

---

१. अत इति लुप्तं कंपुस्तके । २. °विशेष° पुपुस्तके । °च्ये कंगोपुस्तकयोः । ३. किंचिदिति लुप्तं कंपुस्तके । ४. तां दशामिति प्रायः सर्वत्र । ५. तमेवेति पुपुस्तके । ६. ज्ञानेन नैरपेक्ष्यमिति पुंपुस्तके । ७. स्मृत्योरिति लुप्तं कपुस्तके ।

सम्भवति, न च ज्ञानेनैव मोक्षः, उभयत्रापि तथोक्तेः ज्ञाननैरपेक्ष्योक्तिस्तु भक्तिस्तुत्यभिप्रायेति वाच्यं, विषयभेदेन ज्ञानभेदान्मुक्तिसाधनं कतमज्ज्ञानमित्यनिश्चयात्, न च श्रौतत्वाविशेषात् समुच्चय इति वाच्यं, ज्ञानिनोऽक्षरे भक्तस्य पुरुषोत्तमे लयात् समुच्चयासम्भवात्, तर्ह्येवं विरोधाभावादुपपन्नं सर्वमिति चेन्न, पूर्वं ज्ञानमार्गीयज्ञानवतः पश्चाद्भक्तिमार्गीयज्ञानवतो लयस्थाननिर्धाराभावात्, अपरञ्च "ततो मां तत्त्वतो ज्ञात्वा" (भग. १८. ५५.) इति वचनाद्भक्तिमार्गे तत्त्वतो भगवज्ज्ञानमेव प्रवेशसाधनमिति मन्तव्यं, तथा च "मत्कामा रमणं जारं मत्स्वरूपाविदोऽबलाः ब्रह्म मां परमं प्रापुः सङ्गाच्छतसहस्रशः" (श्रीमद्भाग. ११.१२.१३.) इतिवाक्यात् ज्ञानमार्गीयभक्तिमार्गीयज्ञानरहितानामपि भगवत्प्राप्तेस्तत्साधनत्वनिरूपकश्रुतिविरोधः, तथा च क्वचिज्ज्ञानं मुक्तिसाधनत्वेनोच्यते क्वचिद्भक्तिः क्वचिन्नोभयमपीत्येकतरसाधनानिश्चयान्मुक्तिसाधने मुमुक्षोः प्रवृत्त्यसम्भव इति प्राप्त आह गतेरर्थवत्त्वमित्यादि,

गतेरर्थवत्त्वमुभयथान्यथा हि विरोधः ॥ २९ ॥ (३. ३. ७.)

गतेर्ज्ञानस्यार्थवत्त्वं फलजनकत्वमुभयथा मर्यादापुष्टिभेदेनेत्यर्थः, अत्रायमाशयः, "एष उ एव साधु कर्म कारयति तं यमेभ्यो लोकेभ्य उन्निनीषति" (कौ. ३. ९.) इत्यादिश्रुतिभ्यो भगवान् सृष्टिपूर्वकाल एवैतस्मै जीवायैतत् कर्म कारयित्वैतत् फलं दास्य इति विचारितवानिति तथैव भवति, तत्रोक्तरीत्या मुक्तिसाधनानुगमे[३] हेतुरवश्यं वाच्यः, एवं सति कृतिसाध्यं साधनं ज्ञानभक्तिरूपं शास्त्रेण बोध्यते ताभ्यां विहिताभ्यां[४] मुक्तिर्मर्यादा, तद्रहितानामपि स्वस्वरूपबलेन[५] स्वप्रापणं पुष्टिरित्युच्यते, तथा च यं जीवं यस्मिन् मार्गेऽङ्गीकृतवांस्तं जीवं तत्र प्रवर्तयित्वा तत् फलं ददातीति सर्वं सुस्थं[६], अत एव पुष्टिमार्गेऽङ्गीकृतस्य ज्ञानादिनैरपेक्ष्यं मर्यादायामङ्गीकृतस्य तदपेक्षित्वं च युक्तमेवेतिभावः, अत्र साधकत्वेन विपक्षे बाधकं[७] माह अन्यथा हि विरोध इति, अन्यथा मर्यादापुष्टिभेदेन व्यवस्थाया अकथने विरोधाद्धेतोस्तथेत्यर्थः, विरोधस्तु पूर्वपक्षग्रन्थ उपपादितः, एतेनैव—ननु श्रवणादिरूपा प्रेमरूपा च

उभयत्राप्यक्षरपुरुषोत्तमोभयमोक्षौ प्रति, तथोक्तेर्ज्ञानस्य साधनत्वोक्तेः, विषयभेदेन पुरुषोत्तमाक्षररूपज्ञानविषयभेदेनेत्यर्थं, कतमज्ज्ञानं पुरुषोत्तमस्याक्षरस्य वेतिसंशयादित्यर्थं, श्रौतत्वाविशेषादिति, तथा च 'ब्रह्मविदाप्नोति पर'मित्यादिश्रुत्याक्षरज्ञानस्य 'तमेव विदित्वातिमृत्युमेती'तिश्रुत्या च पुरुषोत्तमज्ञानस्य मुक्तिसाधकत्वोक्तेरित्यर्थं, समुच्चयासम्भवादिति, तथा 'चाक्षरात्परत पर'इतिश्रुते 'अव्यक्तोऽक्षर इत्युक्त' इत्यनेन च ज्ञानद्वयस्यापि प्राप्यफलभेदोक्तेरेकत्र फले समुच्चयासम्भवादित्यर्थं, तर्हि समुच्चयासम्भवे, एवमक्षरपुरुषोत्तमयोः प्रत्येकज्ञानस्य प्रत्येकप्राप्तिरूपफलसाधकत्वे, विरोधाभावात् किंज्ञानात् किंफलमितिविनिगमनाभावरूपविरोधाभावात् संशयाभावाद्वा, उपपन्नं सर्वं संशयाभावादधिकरणं व्यर्थमित्यर्थं, निर्धाराभावादिति, तथा च पूर्वज्ञानस्य वैयर्थ्यनिरासायाधिकरणसार्थक्यमितिभाव, ज्ञानमार्गीयेत्यादि, तथा च भक्तिमार्गीयस्य मत्कामनाहेतुभूतस्य रमणत्वादिप्रकारज्ञानस्य च सत्त्वाद् ब्रह्मत्वेनाज्ञानेपि न व्यभिचार, तादृशकामादिप्रत्येकस्यापि पुरुषोत्तमप्रापकत्वाज्ज्ञानमार्गीयेत्युक्त, तत्साधनत्वं ब्रह्मत्वेन ज्ञानस्य मुक्तिसाधनत्व, इति प्राप्ते मुक्तिसाधनानामनिश्चयात् स्वर्गार्थयज्ञ कार्यो न मुक्त्यर्थं इतिपक्षे प्राप्त इत्यर्थं, मर्यादापुष्टीत्यादि, तथा च मार्यादिकज्ञानस्य भक्तेश्च मार्यादिकमोक्षं प्रति पुष्टिमार्गीयभक्तेर्ज्ञानस्य च पुष्टिमार्गीयमोक्षं प्रति हेतुत्वान्न विनिगमनाभावो व्यभिचारो वेत्यर्थं सिद्ध, तत्र भगवद्विचारितमध्ये, उक्तरीत्या पुष्टिमर्यादाभेदमादाय, साधनानुगम एतत्फलस्येदमेव साधनमितिनिश्चये हेतु., एवं सति इच्छाया कार्यकारणभावनियामकत्वे सति, तद्रहितानामनुग्रहमात्रेणाङ्गीकृतानामित्यर्थं, सर्वं सुस्थं सर्वोपि पूर्वोक्त पूर्व पक्ष समाहित इत्यर्थं, अत्र मार्गभेदेन व्यवस्थापक्षे, एतेनैव पुष्टिमर्यादाभेदेन साधनानां

१ अक्षर इति लुप्त गोपुस्तके। २ निर्धारासम्भवादिति कखप्रभापासु। ३ मुक्तिसाधनाननुगम इति कप्रभापुपेषु। ४ विहिताभ्यामिति लुप्त केपुस्तके। ५ स्वरूपबलेनेति खपापुस्तकयो। ६. स्वस्थमिति पेपुस्तके। ७ बाधमिति कपुस्तके।

भक्तिरविशेषेण पापक्षय एवोदेत्युत कश्चिद्विशेषोस्ति? तत्राधुनिकानामपि भक्तानां दुःखदर्शना-च्छ्रवणादेः पापनाशकत्वश्रवणाच्चाविशेषपक्षस्त्वसङ्गतः, अथ श्रवणादिरूपा पापे सत्यपि भवति प्रेमरूपा तु तन्नाश एवेतिविशेषो वाच्यः सोपि प्रेमवतामप्यक्रूरादीनां मणिप्रसङ्गे भगवता समं कापट्यकृतिश्रवणान्न साधीयान्—इत्यपि शङ्का निरस्ता वेदितव्या, तथा हि मर्यादापुष्टिभेदेनाङ्गीकारे वैलक्षण्यादाद्यायामङ्गीकृतानां मुमुक्षयैव श्रवणादौ प्रवृत्तिस्तदावृत्त्वेनैव भगवति प्रेमापि न तु निरुपधिः, कदाचिद्वस्तुस्वभावेन मुक्तीच्छानिवृत्तावपि तद्भक्तेः साधन-मार्गीयत्वाद् "निच्छतो मे गतिमण्वीं प्रयुङ्क्ते" (श्रीमद्भाग. ३. २५. ३६.) इतिवाक्यादन्ते मुक्तिरेव भवित्री, अस्मिन् मार्गे श्रवणादिभिः पापक्षये प्रेमोत्पत्तिस्ततो मुक्तिः, पुष्टिमार्गेङ्गीकृते-स्त्वत्यनुग्रहसाध्यत्वात् तत्र च पापादेरप्रतिबन्धकत्वात् श्रवणादिरूपा प्रेमरूपा च युगपत् पौर्वापर्येण वा वैपरीत्येन वा भवत्येव, अत्र श्रवणादिकमपि फलरूपमेव, स्नेहेनैव क्रियमाण-त्वात् न विधिविषयः, न ह्यविद्यादिमुक्त्यन्तरूपभजनानन्दात्यन्तरायरूपाग्रहावरिलवि-विधमहातरुगहनानां दहने लोलुपस्यानुग्रहानलस्य तदान्तरालिकपापतूलं प्रतिबन्धकमिति वक्तुं शक्यं, तदुक्तं श्रीभागवते "स्वपादमूलं भजतः प्रियस्य त्यक्तान्यभावस्य हरिः परेशः विकर्म यच्चोत्पतितं कथञ्चिद्धुनोति सर्वं हृदि सन्निविष्टः" (श्रीमद्भाग. ११.५.४२.) इति, 'विकर्म' प्राक्तनं तद्दुःखमिति स्वयञ्च "हरि"त्वेन दुःखहर्तेति "धुनोति", उक्तविशेषणविशिष्टस्य सतो विकर्मोत्पत्त्यसम्भवात् सांसर्गिकं मत्तो भूतं न तु मया कृतमितिवद्वा यत् कृतं 'विकर्म' तत् "कथञ्चिदुत्पतित"मित्युच्यते, "त्यक्तान्यभाव"त्वेन भगवत्सेवाव्यासङ्गेनेन्द्रद्युम्नाख्यपाण्ड्य-राजवन्महदागमनाद्यज्ञानं वा, वक्तोक्तरूपे भक्ते विकर्मोक्तावरुचिज्ञापनाय वा "कथञ्चिदि"त्यु-क्तवान्, तेन तर्कितं विकर्मात्राप्यभिप्रेतमिति ज्ञायते, एतादृशस्यापि यदि 'विकर्म' भवेत् तदा तन्निवृत्त्यर्थं न तेनान्यत् कर्तव्यं, भगवानेव "हृदि निविष्ट"स्त"द्धुनोति" यत इति, कदाचित् स्वभक्तिबलस्फूर्त्या सदोषमपि जनं कृतार्थीकरिष्यामीत्यङ्गीकुर्याच्चेद्भक्तस्तदैव तद्धृदिस्थ एव तत्सं-सर्गजं दोषमस्यैतदङ्गीकारेण तद्दोषमपि धुनोतीति "सर्व"पदेनोच्यते, चिरकालभोग्यमपि तत्क्षणे-नैव नाशयति, तन्नाशने कालादेरप्रतिबन्धकत्वमित्यपि ज्ञापयितुं "पर"स्य कालादे"रीश"त्व-मुक्तं, अत्र भजनादिहृन्निवेशान्तानां स्पष्ट एव विकर्मणि सत्यपि सम्भव इति ॥ २९ ॥ ७ ॥

इति तृतीयाध्याये तृतीयपादे सप्तमं गतेरर्थवत्त्वमित्यधिकरणम् ॥ ७ ॥

व्यवस्थापनेनेत्यर्थं, एतस्येत्यपि शङ्का निरस्ते'त्यमेतनेनान्वयः, कश्चिद्विशेषः प्रेमलक्षणाया पापनाशोत्तर-कालीनस्वरूप, कापट्येति पाप विना कापट्यासम्भवादित्यर्थं, शङ्कानिरसनमेवोपपादयन्ति तथा हीत्यादिना, आद्याया मर्यादामार्गीयभक्तौ, तत् मुक्ति, वस्तुस्वभावेन वस्तुमाहात्म्यजातप्रेमस्वभावेनेत्यर्थं, अपर्वी मुक्तिरूपा, अस्मिन् मर्यादाभक्तिमार्गे, न विधिविषयः पुष्टिमार्गीयश्रवणादि न विधिविषय, तद्दुःखं कथञ्चि-दुत्पन्नमपि विकर्म तु स्वरूपमित्यर्थं, उक्तविशेषणमनुग्रहरूप, मत्तो भूतमित्यादि नान्तरीयकमित्यर्थ, अरुचि-ज्ञापनाय 'त्यक्तान्यभावे'नुगृहीते भक्ते पापानुत्पत्तिज्ञापनायेत्यर्थं, तर्कितमित्यादि, तथा च 'कृत्वा चिन्तामि'त्यादि-न्यायेन तादृशविकर्मोत्पत्तिरितिभाव, तद्धृदिस्थ एव कृतार्थीकरिष्यामीतिभगवदिच्छाविषयीभूतः, तत्संसर्गज-मज्ञात कथञ्चित्संसर्गेणोत्पन्न, अस्य भगवतः, एतदङ्गीकारेण 'एव'मित्यादिनोक्ताङ्गीकारेण, तद्दोषं धुनोति भक्तोपि धुनोतीत्यर्थं, तत्क्षणेनैवेत्यस्योदाहरण 'दु सहप्रेष्ठविरहे'त्यादौ बोध्य, फलितमाहुरत्रेत्यादि, तथा च मर्यादा-भक्तिमार्गे तत्वंव्याभावाज्ज्ञानमार्गात उत्कर्षः सिद्ध पुष्टिभक्तिमार्गे तु 'स्वपादमूलमि'त्यादिवाक्यानुरोधात् सत्यपि विक-र्मणि भजनादिहृन्निवेशितानां सम्भवो भगवत्कृपयैव विकर्मनाशश्चेति ततोप्युत्कर्षः सिद्ध इति फलितम् ॥२९॥७॥

इति तृतीयतृतीये सप्तमाधिकरणम् ॥ ७ ॥

---

१ निरुपाधिक इति गोपुस्तके। २ आण्वीमिति चपुपुस्तकयोः। ३. दुःखदमिति प्राय सर्वत्र। ४. °कृत्यसम्भवा-दिति चपापुंगोपु। ५. अपीति लुप्त कैंपुस्तके। ६ हृदिस्थ इति चपागोपु। ७. एवपद लुप्त केपुस्तके। ८. भजने हीति पुंपुस्तके।

ननु मुक्तेरेव सर्वत्र फलत्वमुच्यते, युक्तश्चैतत्, संसृतेर्दुःखात्मकत्वात् तन्निवृत्तेः सर्वेषामिष्टत्वात्, पुष्टिमार्गीयभक्तानां तु तदनपेक्षित्वमुच्यते, तदुक्तमाथर्वणोपनिषत्स्वथ दशार्णमन्त्रस्वरूपमुक्त्वा पठ्यते "परंब्रह्मैतद्यो धारयति" (गो. पू. १.) इत्यादेरन्ते "सोमृतो भवति" (गो. पू. १.) इत्यादि, एतदग्रे "किं तद्रूपं किं रसनं कथं हैतद्भजनम्" (गो. पू. १.) इत्यादि प्रश्नोत्तरं पठ्यते, "भक्तिरहस्यभजनं तदिहामुत्रोपाधिनैराश्येनैवामुष्यात्मनः कल्पनमेतदेव नैष्कर्म्यम्" (गो. पू. १) इति, एतदत्र विचार्यते, मन्त्रावृत्तितदधिष्ठातृरूपध्यानादेरमृतत्वं फलमुच्यते, भजनस्वरूपं च यावत्फलनैराश्येन भगवत्यात्मनः कल्पनमित्युच्यते, न च फलनैराश्येन भजनेप्यन्ते मुक्तिरेव भवित्रीति वाच्यं, "तं यथा यथोपासते तथैव भवति तद्धैतान् भूत्वावति" (मुद्गल. ३. ९.) इतिश्रुतेर्मुक्तिसाधनत्वेन ज्ञात्वा भजतः सैव फलं स्वरूपस्यैव स्वतन्त्रपुरुषार्थत्वमनुभवन् यो भजते तस्य तदेव फलमिति यतो निर्णयः सम्पद्यते, "ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम्" (श्रीमद्भग. ४. ११.) इति भगवद्वाक्याच, अत एव "रहस्यभजनं" लक्ष्यमुक्तं, तथा च श्रौतत्वभगवत्सम्बन्धित्वयोरविशेषात् कतमो गरीयानिति संशये गूढाभिसन्धिः पठति,

उपपन्नस्तल्लक्षणार्थोपलब्धेर्लोकवत् ॥ ३० ॥ (३. ३. ८.)

मुमुक्षोः सकाशाद्रहस्यभजनकर्तैवोपपन्नः उपपत्तियुक्तः, तमेवोद्घाटयति, तल्लक्षणार्थोपलब्धेरिति, तल्लक्षणो भगवत्स्वरूपात्मको योर्थः स्वतन्त्रपुरुषार्थरूपस्तदुपलब्धेः स्वाधीनत्वेन तत्प्राप्तेरित्यर्थः, यद्यपि पुरुषोत्तमे प्रवेशे तदानन्दानुभवो भवति, तथापि न प्रभोस्तदधीनत्वं भक्तितिरोभावात्, प्रत्युत वैपरीत्यं, भजनानन्दस्य तत आधिक्यं तु "मुक्तिं ददाति कर्हिचित् स्म न भक्तियोगम्" (श्रीमद्भाग. ५. ६. १८.) "दीयमानं न गृह्णन्ति विना मत्सेवनं जनाः" (श्रीमद्भाग. ३. २९. १३.) "नारायणपराः" (श्रीमद्भाग. ६. १७. २८.) इत्युपक्रम्य "स्वर्गापवर्गनरकेष्वपि तुल्यार्थदर्शिनः" (श्रीमद्भाग. ६. १७. २८.) इत्यादिवाक्यैरध्यवसीयते, अत एव सामीप्यवाच्युपसर्ग उक्तः, तेन दासीत्वेन दासत्वेन लीलायां सुहृत्त्वेन प्रभुनिकटे स्थितिरुक्ता

उपपन्नस्तल्लक्षणार्थोपलब्धेर्लोकवत् ॥ ३० ॥ मर्यादापुष्टिभक्तयोस्तारतम्यं विवरीषव सूत्रमवतारयन्ति ननु मुक्तेरित्यादि, एतन्मुक्तेः फलत्वं, तदनपेक्षित्वं मुक्त्यनपेक्षित्वमित्यर्थं, तदुक्तं मुक्त्यनपेक्षित्वमुक्तं, एतदग्रे मोक्षनिरूपणोत्तरे भजननिरूपणे, पठ्यते गोपालपूर्वतापनीये पठ्यते भक्तिलक्षणमुच्यत इत्यर्थं, तदेवाह भक्तिरहस्यभजनमिति, अत्र भक्तिशब्दाच्छान्दस सोलुंक्, रहस्यभजनमित्यस्य विवरण तदिहेत्यादि, तद्रहस्यभजन, इहामुत्रोपाधिनैराश्येनैहिकामुष्मिकफलकामनाराहित्येन, अमुष्यात्मनो भगवदीयजीवस्य, कल्पनमनन्यतया भगवदीयत्वसम्पादन, एतदेव नि कामतया भगवदीयत्वसम्पादनमेव, बाह्याभ्यन्तरसेवाभ्यां भगवदीयत्वदृढीकरणत्वमिति फलित, नैष्कर्म्यं सन्यास इत्यर्थं, तत्र पारलौकिकफलसामान्यमध्ये मुक्तेरपि प्रविष्टत्वात्तन्निरासोप्युक्त इति बोध्य, एतदत्र विचार्यत इति पूर्वोक्तानि तापनीयवाक्यान्यत्र विचार्यन्त इत्यथ, संशयमुपपादयितुमाहुर्मन्त्रेत्यादि, 'अमु पञ्चपद मन्त्रमावर्तयेद्य स यात्यनायासत केवल तदि'तिमन्त्रोक्ता या पञ्चपदस्याष्टादशमन्त्रस्यावृत्ति पुन पुन कथन तस्मात् 'कृष्ण एव परो देवस्त ध्यायेत् त रसेत् त भजेदि'तिमन्त्रणोक्त यत्तदधिष्ठातृध्यानादि तस्य सर्वस्यामृतत्वं फलमुच्यत इत्यथ, वक्ष्यमाणसंशये मुक्तिकोटिगरीयस्त्वमुपपादयन्ति न चेत्यादिना, अत एव स्वरूपस्य फलत्वादेव, कतमो गरीयान् मुक्तिस्वरूपफलयोर्मध्ये क पदार्थो गरिष्ठ इत्यर्थं, प्रत्युत वैपरीत्यं मुक्तिपूर्वदशातोपि वैपरीत्य मुक्तिदशायां, अत एव मुक्त्यपेक्षया भजनानन्दाधिक्यस्य व्यासाभिप्रेतत्वादेव, उपसर्ग उक्त उपलब्धेरितिसूत्र उपसर्ग उक्त, अन्यथा तल्लक्षणार्थलब्धेरित्येव सूत्रयेन्मुक्त्याधिक्यस्याभिप्रेतत्वे,

---

१. परमिति कपुस्तके। २. मुक्तिसाधनत्वमिति कंपुस्तके। ३. सर्वेष्वप्यादर्शेष्वेवमेव पाठोपलब्धेरत्र बहुव्रीहिर्मान्यो न तु कर्मधारय । ४. वेत्यधिक पुंपुस्तके।

भवति, न च महत्पदार्थस्वरूपाज्ञानादल्प एवानन्दे यथा सर्वाधिक्यं मन्वानः पूर्वोक्तं न वाञ्छति तथात्रापीति वाच्यं, दीयमानानामर्थानां स्वरूपाज्ञानासम्भवात्, अनुभवविषयीक्रियमाणत्व-स्यैवात्र दीयमानपदार्थत्वात्, तदज्ञाने स्वर्गादित्रये तुल्यदर्शित्वासम्भवश्च, "मुक्तिं ददाति कर्हिचित् स न भक्तियोग"मितिवाक्ये भक्तेराधिक्यं स्पष्टमेवोच्यते, तस्मान्न्यूनार्थजिघृक्षोः सकाशात् पूर्णार्थवान् महानितियुक्तमेवास्योपपन्नं, इममेवार्थं दृष्टान्तेनाह लोकवदिति, यथा स्वाधीनभर्तृका नायिका तदवस्थाननुगुणगृहवित्तादिकं दीयमानमपि नोरीकरोति तथेत्यर्थः।

अथवा स भगवानेव लक्षणमसाधारणो धर्मो यस्य स तल्लक्षण उद्भटभक्तिभावः स एवार्थः स्वतन्त्रपुरुषार्थरूप इत्यग्रे पूर्ववत्, भगवत्प्राकट्यवानेव हि भक्तो भक्तत्वेन ज्ञायत इति तथा, एतेन ज्ञाप्यं हि ज्ञापकादधिकं भवति, एवं सति यज्ज्ञापकं परमकाष्ठापन्नं वस्तु पुरुषोत्तमस्वरूपं सर्वफलरूपं तन्महत्त्वं कथं वक्तुं शक्यमिति सूच्यते ॥ ३० ॥ ८ ॥

इति तृतीयाध्याये तृतीयपादेष्टमसुपपन्नाधिकरणम् ॥ ८ ॥

आथर्वणोपनिषत्सु पठ्यते "परब्रह्मैतद्यो धारयति रसति भजति ध्यायते प्रेमति शृणोति श्रावयत्युपदिशत्याचरति सोमृतो भवति" (गो. पू. १.) इति, तत्र धारणादीनां समुदितानामे-वामृतसाधकत्वमुत प्रत्येकमपीति भवति संशयः, अत्र धारणादिसाधनकलापमुक्त्वा फलमुच्यत इति समुदितानामेव मुक्तिसाधकत्वं, उपलक्षणं चैतत्, श्रवणादिनवविधभक्तीनामप्येवमेव तथात्वमितिपूर्वपक्षे सिद्धान्तमाह अनियम इति,

अनियमः सर्वासामविरोधः शब्दानुमानाभ्याम् ॥ ३१ ॥ (३. ३. ९.)

समुदितानामेव तेषां फलसाधकत्वमितिनियमो नास्तीत्यर्थः, अत्रोपपत्तिमाह सर्वा-सामविरोध इति, "चिन्तयंश्चेतसा कृष्णं मुक्तो भवति संसृतेः" (गो. पू. १.) इति-

---

तेन सामीप्यबोधकोपोपसर्गप्रयोगेण, महत्पदार्थो ब्रह्मलोकमुक्त्यादिरूपः, अल्प एवानन्दे राज्यादिलौकिकानन्दे, पूर्वोक्तं मोक्षसुखं, तथात्रापीति मुक्त्यपेक्षया न्यूने स्वरूपानन्दे भजनानन्दे भक्तो महत्त्वं जानातीत्यर्थः, तदज्ञाने दीयमानभक्तग्राह्यपदार्थानां भक्तानामज्ञाने, तस्मात् पूर्ववाक्ये तु मुक्त्यपेक्षया भक्तेराधिक्यप्रदर्शनात्, न्यूनार्थजिघृक्षोर्मुक्तिग्रहणेच्छोः पुरुषात्, पूर्णार्थवान् भक्तिमान्, अस्य भक्तस्य, उपपन्नं महत्त्वमुपपन्न-मित्यर्थः, तदवस्थारसिको नोरीकरोति 'भर्तुः स्वमात्राधीनीकरणं त्यजान्यद्वाञ्छितं गृहाणे'त्युक्ताप्यन्यन्नाङ्गीकरोति यथा तथेत्यर्थः, पूर्वोक्तपक्षापेक्षयाप्याधिक्यमुपवर्णयन्ति अथवेत्यादिना, असाधारणः उद्भटभक्तिभाववदतिरिक्ते विद्यमानाभावप्रतियोगिरूपः, स्वतन्त्रेत्यादि, तथा च फलरूपभक्तेर्न मुक्तौ साम्यसम्भावनापीतिभावः, इति तथा उक्तहेतोर्भक्तस्य महत्त्वं, एतेन पूर्वोपपादनेन, ज्ञाप्यं भक्तमहत्त्वं, ज्ञापकात् प्रकटमानाद्भगवतः, यज्ज्ञापकं भक्तमहत्त्वज्ञापकं, तन्महत्त्वं भक्तमहत्त्वं, कथं वक्तुं शक्यं न कथमपि वक्तुं शक्यमित्यर्थः ॥ ३० ॥ ८ ॥

इति तृतीयतृतीयेष्टमाधिकरणम् ॥ ८ ॥

अनियमः सर्वासामविरोधः शब्दानुमानाभ्याम् ॥३१॥ एव पुष्टिभक्तेः फलत्वं पुष्टिभक्तस्वरूपं च निरूप्य मर्यादाभक्तिसाध्यमुक्तौ सर्वासां भक्तीनां समुदितानां कारणत्वमुतेतरनैरपेक्ष्येणैकैकस्याः कारणत्वमितिविचारयितुमधि-करणारम्भ इति विषयादिकमाहुराथर्वणेत्यादि, अत्र धारयतिपदार्थः सर्वाङ्गध्यानं, रसतिपदार्थो जपात्मकं कीर्तनं, भजतिपदार्थः शारीरी सेवा, ध्यायतेपदार्थं एकाङ्गस्य लीलाया वा चिन्तनं, प्रेमति भगवद्विषयकप्रेमयुक्तो भवति, उपदिशति मन्त्रद्वारा भगवन्तं बोधयति, आचरति भगवन्माहात्म्यनुकूलधर्मानितिशेषः, समुदितानां पूर्वो-क्तानां नवानामित्यर्थः, अमृतसाधकत्वं मर्यादाभक्तिजन्यमुक्तिसाधकत्वं, पूर्वपक्षमाहुरत्रेत्यादि, एवमेव समुदितानामेव कारणमिति तथात्वंपदार्थः, अत्रेतरनैरपेक्ष्येणैकैकस्याः कारणतायां, श्रुतीनामविरोधमेवोपपादयन्ति

---

१. उपपन्नत्वमिति सर्वत्र। २. तन्महित्वमिति कपुपुंपु। ३. सोमृतो भवतीतिवीप्सा मपापुंपु। ४. तत्रेति कपुपुस्तकयोः।

श्रुत्या चिन्तनमात्रस्य तथात्वमुच्यते, "पञ्चपदीं जपन्"इत्याद्युक्त्वा "ब्रह्म सम्पद्यते ब्रह्म सम्पद्यते" (गो. पू. १.) इतिश्रुत्या कीर्तनमात्रस्य तथात्वमुच्यते, तथा च प्रत्येकपक्ष एव सर्वासां श्रुतीनामविरोधः स्यात्, एवं सति "परब्रह्मैतद्यो धारयति" (गो. पू. १.) इत्यादिषु "सोमृतो भवति" (गो. पू. १.) इतिपदं प्रत्येकं सम्बध्यत इति ज्ञेयं, ननु यथा दण्डादीनां प्रत्येकं घटहेतुत्वोक्तावपि नैकस्यैव तज्जनकत्वमेवमत्राप्येकैकस्य चिन्तनादेस्तथात्वोक्तावपि फलसाधकत्वं समुदितानामेव तेषामिति चेत्, मैवं, योर्थो यत्प्रमाणैकसमधिगम्यः स तेन प्रमाणेन यथा सिध्यति तथा मन्तव्यः, दण्डादेस्तथात्वं प्रत्यक्षेण गृह्यत इति तत्र तथास्तु, प्रकृते तु तेषां तथात्वमलौकिकशब्दैकसमधिगम्यं, श्रुतिस्तूक्तैव, न चोक्तन्यायः श्रुतिष्वपि तात्पर्यनिर्णायको भवतीति वाच्यं, अलौकिकेर्थे लौकिकस्यासामर्थ्यात्, अन्यथा ब्रह्मणा मनसैव प्रजाजनने निषेकादिकमपि कल्प्येत, स्मृतिरपि "केवलेन हि भावेन गोप्यो गावः खगा मृगाः येन्ये मूढधियो नागाः सिद्धा मामीयुरञ्जसा (श्रीमद्भाग. ११. १२. ८.) "एतावान् साङ्ख्ययोगाभ्याम्" (श्रीमद्भाग. २. १. ६.) इत्युपक्रम्या"न्ते नारायणस्मृतिः" (श्रीमद्भाग. २. १. ६.) इत्यादिरूपैवमेवाह, इममेवार्थं हृदि कृत्वाह सूत्रकारः शब्दानुमानाभ्यामिति श्रुतिस्मृतिभ्यामित्यर्थः, ते चोक्ते ।

एतेन सूत्रकारस्यान्योप्यनुशयोस्तीति भाति, यत्रोक्तसाधनस्तोमसम्पत्तिरेकस्मिन् भक्तेस्ति तत्रैकेनैव मुक्तावितरसाधनत्वबोधकश्रुतिविरोधाच्छ्रवणकीर्तनस्मरणानां मुक्त्यव्यवहितपूर्वक्षणे युगपदपि सम्भवादन्यथासिद्धिसम्भवे विनिगमकाभावादेकेनैव मुक्तिरिति न नियमोतः प्रत्येकसाधकत्वबोधिकानां सर्वासां श्रुतीनां मिथोविरोधः, तर्ह्येकत्र तथात्वे सर्वत्रैव तथास्त्वित्याशङ्क्य तत्र बाधकमाह शब्दानुमानाभ्यामिति पूर्ववत्, तत्र प्रत्येकमपि मुक्तिहेतुत्वमुच्यत इति न तथेत्यर्थः, यत्र प्रत्येकमपि तथात्वं तत्र किमु वक्तव्यं समुदितानां तथात्व इतिभावः, तेन श्लिष्टः प्रयोगोयमिति ज्ञेयम् ॥ ३१ ॥ ९ ॥

इति तृतीयाध्याये तृतीयपादे नवममनियमाधिकरणम् ॥ ९ ॥

'चिन्तय'न्नित्यादिना, प्रत्येकं सम्बध्यते नवकारणेषु 'सोमृतो भवती'ति प्रत्येकं सम्बध्यत इत्यर्थः, अत्रापि मुक्तिसाधनविचारेपि, तथात्वोक्तावेकैकस्य कारणत्वोक्तौ, समुदितानामेव तथात्वं फलोपधायकत्वं, उक्तन्यायः दण्डचक्रादिस्थलीयो न्याय, केवलेन स्वातिरिक्तसाधननैरपेक्ष्येण, ते श्रुतिस्मृती, एतेन सूत्रे शब्दानुमानाभ्यामित्युक्तेन, पूर्ववत् श्रुतिस्मृतिभ्यां प्रत्येककारणताया एव व्यवस्थापनेन मिलितानामेकत्र कारणत्वे मानाभावेन सकलोक्तकारणानामेककार्यं प्रत्यनियमः पूर्वमुक्तस्तथात्रापि समाधेयमित्यर्थः, तत्रानियम इतिसूत्रभागे, न तथा कारणसमुदायस्थलेपि प्रत्येककारणेनैव कार्यसिद्धौ चक्रयोजितद्वित्रादिदण्डजनितैकघटस्थले त्रयाणां कारणत्वेपि न हि सर्वत्र द्वित्रादिदण्डानामेव कारणता वक्तुं शक्या, एकदण्डजन्यघटस्थले व्यभिचारात्र समुदायकारणतानियमः सर्वत्रेतिभावः, प्रत्येकमपीतिस्वोक्तमपिशब्दं विवृण्वन्ति यत्रेत्यादिना, तथात्वं कार्यजनकत्वं, तथात्वे कार्योपधाने, तथा च 'सम्भेदेनान्यतरवैयर्थ्यं'मितिन्यायो द्योतितः, श्लिष्टः प्रयोग इति, तथा च सूत्रेनियम इतिश्लिष्टः प्रयोगः, तेन क्वचित्कारणद्वयेन क्वचित्कारणत्रयेण कार्यजननेपि न सर्वत्र नियम इति श्लेषबोधितोर्थः फलितः ॥ ३१ ॥ ९ ॥

इति तृतीयतृतीये नवमाधिकरणम् ॥ ९ ॥

---

१. नास्ति वीप्सा पुपुस्तके । २. यथेति लुप्तं कंपुस्तके । ३. एकेतिलुप्त पापुस्तके । ४. तात्पर्य° गोपुस्तके । ५. प्रजनन इति कंपुस्तके । ६. °साधन° पुपुस्तके । ७. भक्तिहेतुत्वमिति पुपुस्तके ।

पूर्वं मुमुक्षुभिः साधनत्वेन क्रियमाणानां भगवद्धर्माणां मुक्तिसाधनप्रकारो विचारितः, अधुना तु भगवान् स्वविचारितकार्यं लौकिकैश्वर्याद्यशक्यं ज्ञात्वा स्वैश्वर्यादिकं दत्त्वा येन जीवेन तत् कारयति स जीवस्तैर्धर्मैर्मुक्तो भवति न वेति विचार्यते, तत्र जीवकृतभगवद्विषयकधर्माणां यत्र तत्साधकत्वं तत्र भगवदीयानां धर्माणां तत्साधकत्वं सुतरामेव तेषां स्वकृत्यसाध्यत्वेनाविधेयत्वात् तत्साधनेष्वप्रवेशोपीतिसन्देहे निर्णयमाह यावदित्यादि ।

यावदधिकारमवस्थितिराधिकारिकाणाम् ॥ ३२ ॥ (३. ३. १०.)

यस्मिन् जीवे यत्कार्यसाधनार्थमधिकारो भगवता दत्तस्तत्कार्यसाधनक्षमास्तस्मिन् ये स्वधर्मा भगवता स्थापितास्त आधिकारिका इत्युच्यन्ते, तत्कार्यसम्पत्तिरेव तदधिकारप्रयोजनमिति तावदेव तेषां तस्मिन् स्थितिरित्यर्थः, एवं सति तत्सम्पत्तौ सोपि निवर्तत इति तत्सम्बन्धिनो धर्मा अपि निवर्तन्त इति मुक्तिपर्यन्तं न तेषां व्यापारसम्भवः, भगवता तथैव विचारितत्वात्, मुक्तिस्तु भक्त्यैवेतिभावः, यच्च "ब्रह्मणा सह ते सर्वे सम्प्राप्ते प्रतिसञ्चरे परस्यान्ते कृतात्मानः प्रविशन्ति परं पदम्" (कूर्म. पू. १२. २६९.) इतिवाक्यं तच्चाकल्पान्तं येषामधिकारः सप्तर्षिप्रभृतीनां तद्विषयकमिति ज्ञेयं, अन्यथा भगवद्दत्ताधिकारसामर्थ्यस्य भरतस्य स्वाधिकारसमाप्तौ मुक्तिं न वदेत्, 'कृतात्मानः' इतिपदात् तेषामपि भगवति कृतान्तःकरणानामेव 'परस्य' भगवतः 'परम्पदं' व्यापिवैकुण्ठे[1] प्रवेश उच्यते न स्वाधिकारिकगुणैः ॥ ३२ ॥ १० ॥

इति तृतीयाध्याये तृतीयपादे दशममाधिकारिकाधिकरणम् ॥ १० ॥

ननूक्ताथर्वणोपनिषद्वाक्यैर्भगवद्धर्माणां मुक्तिसाधनत्वमुच्यते, श्रुत्यन्तरेषु "तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेयनाय" (तै. आ. ३. १२. ७.) "ज्ञानादेव तु कैवल्यम्" (ग. पु. सा. १६. ८७.) "तरति शोकमात्मवित्" (छान्दो ९. १. ३.) "ब्रह्म वेद ब्रह्मैव भवति" (मु.३.२.९.) इत्यादिषु ज्ञानस्यैव मुक्तिसाधनत्वमुच्यते । श्रुतित्वाविशेषादुभयोस्तथात्वे

यावदधिकारमवस्थितिराधिकारिकाणाम् ॥३२॥ पूर्वाधिकरणेन सहैतदधिकरणस्यैव निर्वाहकत्वसङ्गतिं प्रदर्शयन्तोधिकरणमवतारयन्ति पूर्वमित्यादिना, भगवद्धर्माणां भजनरूपभगवद्धर्माणां, स्वविचारितकार्यं सूर्यस्य प्रकाशकत्वमग्नेः पाचकत्वं प्रियव्रतादेस्तथा राज्यादिकरणमेवमादि, तत् स्वविचारितं, स जीवोधिकारिजीवः, तैरधिकारकार्यार्थं भगवद्दत्तैः, मुक्तो भवति न वेतिकोटिद्वयमध्ये प्रथमपक्षे भक्तेर्मुक्तिजनकतायां व्यभिचार आधिकारिकधर्माणां भक्तित्वाभावाद्, द्वितीय आधिकारिकधर्माणां भागवतानां मुक्तिप्रतिबन्धकत्वापत्तितो विचारविषयतेत्यर्थः, इत्थं च भगवद्धर्मा विषयः, ते मुक्तिहेतवो न वेतिसंशयः, पूर्वपक्षमाहुस्तत्रेत्यादि, भगवदीयानामाधिकारिकाणामित्यर्थः, धर्माणां 'धारयति रसति भजती'त्यादिपूर्वश्रुत्युक्तभगवद्धर्माणामित्यर्थः, तेषामाधिकारिकाणामविधेयत्वान्मुक्तिसाधनत्वेन विधातुमशक्यत्वादित्यर्थः, तन्न मुक्तिः, धर्माणामधिकारार्थत्वेनैव ॥ ३२ ॥ १० ॥

इति तृतीयतृतीये दशमाधिकरणम् ॥ १० ॥

अक्षरधियां त्ववरोधः सामान्यतद्भावाभ्यामौपसदवत् तदुक्तम् ॥ ३३ ॥ पूर्वाधिकरणे भक्तेरेव मुक्तिरिति निरूप्याक्षरज्ञानस्य मुक्तिकारणताप्रकारं वक्तुं सूत्रमवतारयन्ति नन्वित्यादि, भगवद्धर्माणां पूर्वश्रुत्युक्तभजनादिरूपाणां, अत्र भक्तेर्मुक्तिसाधनत्वं विषयो भक्तेर्मुक्तिसाधनं ज्ञानस्य वेतिसंशयः, श्रुतिद्वैधं संशयबीजं, श्रुतीत्यादिना पूर्वपक्ष उच्यते, श्रुतित्वाविशेषाद् भक्तिज्ञानयोर्मुक्तिं प्रति कारणत्वप्रतिपादकश्रुतीनां श्रुतित्वा-

---

१. परपदे व्यापीत्यादि वपापुपु । परपदेनापि वैकुण्ठ इति कपुस्तके ।

कारणवैजात्ये कार्यवैजात्यस्यावश्यकत्वान्मुक्तौ च तदसम्भवाद् "भक्त्या मामभिजानाति" (गीता. १८. १५.) इतिवाक्याद्भक्तौ ज्ञानस्यापि सम्भवाज्ज्ञानेनैव मुक्तिरितिपूर्वपक्षे ज्ञानसाधनत्वनिरूपकश्रुतितात्पर्यं निरूपयन् पुरुषोत्तमप्राप्तेरेव मुक्तिपदवाच्यत्वात् तद्भजनस्यैव तत्प्रापकत्वमिति हृदि कृत्वाहाक्षरधियामित्यादि ।

अक्षरधियां त्ववरोधः सामान्यतद्भावाभ्यामौपसदंवत् तदुक्तम् ॥ (३.३.३३.)

तुशब्दः पूर्वपक्षनिरासे, वाजसनेयके श्रूयत "एतद्वै तदक्षरं गार्गि ब्राह्मणा अभिवदन्त्यस्थूल" (बृ. ५. ८. ८.) मित्यादि, तथाथर्वणे "अथ परा यया तदक्षरमधिगम्यते" (मुण्ड. १. १. ५.) इति, तेन ज्ञानमार्गेक्षरविषयकाण्येव ज्ञानानि निरूप्यन्ते पुरुषोत्तमविषयकाणि नेति निश्चीयते, "ब्रह्मविदाप्नोति परम्" (तै. व.) इति श्रुतावक्षरब्रह्मविदोक्षरात् परस्य प्राप्तिरुच्यते, "अक्षरादपि चोत्तमः" (गीता. १८. ५५.) इतिभगवद्वाक्याच्चाक्षरातीतः पुरुषोत्तमः, "भक्त्या मामभिजानाति" इतिवाक्ये "मामि"तिपदात् पुरुषोत्तमविषयकं ज्ञानमुच्यते न त्वक्षरविषयकं, किञ्च "ब्रह्मभूत"स्य भक्तिलाभोक्तेस्तस्य चानन्दांशाविर्भावात्मकत्वात् तस्य चाविद्यानाशजन्यत्वात् तस्य चाक्षरज्ञानजन्यत्वात् पूर्वकक्षा[1]विश्रान्तमेवाक्षरज्ञानं, एवं सत्यक्षरविषयिणीनां धियां श्रुतौ मुक्तिसाधनेषु योवरोधः प्रवेशनं गणनेतियावत् स सामान्यतद्भावाभ्यां हेतुभ्यां, पुरुषोत्तमसम्बन्धिसम्बन्धे मुक्तिरिति सामान्यं, मर्यादामार्गेङ्गीकृतानां "ब्रह्मभूतः प्रसन्नात्मा न शोचति न काङ्क्षति समः सर्वेषु भूतेषु मद्भक्तिं लभते पराम्" (गीता. १८. ५४.) इतिवाक्याद् ब्रह्मभावानन्तरमेव भगवद्भावसम्भवात् तेन पुरुषोत्तमे प्रवेशात् तत्र परम्परोपयोगो ब्रह्मभावस्येत्युभाभ्यां हेतुभ्यां तथेत्यर्थः, वस्तुतस्तु पुरुषोत्तमप्राप्तिरेव मुक्तिरितिभावः ।

नन्वक्षरस्याविशिष्टत्वेन तदुपासकानामपि तथात्वात् केषाञ्चित्तत्रैव लयः केषाञ्चिद्भक्तिलाभ इति कथमुपपद्यत इत्याशङ्क्य तत्र हेतुं दृष्टान्तेनाहौपसदवदिति, उपसदाख्ये[2] कर्मणि तानूनप्त्रस्पर्शाख्यमौपसदं कर्मास्ति, तत्रातिथ्यायां ध्रौवात् स्रुचि चमसे वा यदाज्यं चतुरवत्तं पञ्चाव[3]त्तं वा समवद्यति तत् तानूनप्त्रमित्युच्यते, "अनाधृष्टमसि" (तै. सं. १. २. १०.)

विशेषादित्यर्थः, उभयोर्भक्तिज्ञानयोः, तथात्वे स्वातन्त्र्येण मुक्तिकारणत्वे, तदसम्भवाद् वैजात्यासम्भवात्, भक्ताविति सतिसप्तमी, तत्प्रापकत्वं मुक्तिप्रापकत्वं, पूर्वपक्षनिरासेक्षरज्ञानस्यैव साक्षान्मुक्तिहेतुत्वमितिपूर्वपक्षनिरासे, भक्तिलाभोक्ते'र्ब्रह्मभूतः प्रसन्नात्मा न शोचति न काङ्क्षति समः सर्वेषु भूतेषु मद्भक्तिं लभते परा'मितिवाक्येन भक्तिलाभोक्तेरित्यर्थः, तस्य भक्तिलाभस्य, तस्यानन्दांशाविर्भावस्य, तस्याविद्यानाशस्य, पूर्वकक्षाविद्यानाशरूपा, एवं सत्यक्षरज्ञानस्याविद्यानाशकत्वेन भगवत्सम्बन्धिसरसम्बन्धकार्यसम्पादकत्वे सतीत्यर्थः, स प्रवेशः, सामान्यतद्भावाभ्यामितिहेतुं विवृण्वन्ति पुरुषोत्तमेत्यादिना, मुक्तिरितीति साधनसम्पत्तिसम्भवान्मुक्तिरित्यर्थः, सामान्यं सामान्यपदार्थरूपः प्रथमो हेतुरित्यर्थः, तद्भावरूपं द्वितीयं हेतुं विवृण्वन्ति मर्यादेत्यादिना, ब्रह्मभावस्य सर्वत्राक्षरात्मत्वेन ज्ञानस्य, तथाक्षरज्ञानस्य परममुक्तिसाधकत्वं, अक्षरस्य परमापरममुक्तिसाधकाक्षरज्ञानस्य, अविशिष्टत्वेनोभयोः सत्वेन, तदुपासकानामक्षरोपासकानामविशिष्टत्वात् परापरमुक्तिं प्रत्यधिकारित्वात्, तत्रैवाक्षर एव, भक्तिलाभः परममुक्तिलाभ इत्यर्थः, कथमुपपद्यते कारणवैजात्याभावात् कथं कार्यवैजात्यमित्यर्थः, तत्र कार्यवैजात्ये, औपसदमुपसत्सम्बन्धि, ध्रौवाद् ध्रुवायां विद्य-

---

१. पूर्वकक्षविश्रान्तमिति कंपुस्तके । २. उपसदाख्यकर्मणीति पुपुस्तके । ३. पञ्चावत्तमिति छत्रं मपुस्तके ।

:तिमन्त्रेण षोडशाप्यृत्विजो यजमानेन सह तानूनप्त्रं समवमृश"न्त्वनु मे दीक्षाम्" (तै. सं. ।. २. १०.) इतिमन्त्रेण यजमानस्तत् समवमृशन् "यमृत्विजं कामयेतायं यज्ञं यशसमृच्छेदेति तं प्रथममवमर्शयेत्" (   ) इति श्रुतौ कल्पे (आप. श्रौ. ११. १. ४.) व, अत्र सर्वेषामृत्विजां तानूनप्त्रित्वाविशेषेपि यस्मिन् स्नेहातिशयेन तथेच्छा तत्रैव तथाकृतेर्नेतरेषु, न हि तत्राविशिष्टेषु कथमेवं कृतिरितिपर्यनुयोगः सम्भवत्येवमिहापीत्यर्थः। ननु श्रवणादेर्यथा पुरुषोत्तमसम्बन्धित्वेन तत्प्राप्तिहेतुत्वमेवमक्षरस्याप्यस्त्वित्याशङ्का तु निखिलासुरजीवतमःपुञ्जनिरासकेन यदुवंशोदयाचलचूडामणिनैव निरस्तेति न स्वतो वक्तुमुचितेत्याशयेनाह तदुक्तमिति भगवद्गीतास्वितिशेषः, तत्र "यदक्षरं वेदविदो वदन्ति" (गीता. ८. ११.) इत्युपक्रम्य "स याति परमां गतिम्" (गीता. ८. १३.) इत्यन्तेनाक्षरप्राप्त्युपायमुक्त्वा "नन्यचेताः सततम्" (गीता. ८. १४.) इत्यादिना स्वप्राप्त्युपायं वैलक्षण्यं चोक्त्वा भँक्त्येकलभ्यत्वं स्वस्य वक्तुं पूर्वं क्षराक्षरयोः स्वरूपमाह, "सहस्रयुगपर्यन्तम्" (गीता. ८. १७.) इत्युपक्रम्य "प्रभवत्यहरागमे" (गीता. ८. १८.) इत्यन्तेन क्षरस्वरूपमुक्त्वा "परस्तस्मात् तु भावोन्यः" (गीता. ८. २०.) इत्युपक्रम्य "तद्धाम परमं मम" (गीता. ८. २१.) इत्यन्तेनाक्षरस्वरूपमुक्तं, अत्र पूर्वं क्षरस्वरूपमुक्तमिति "परस्तस्मात्तु" (गीता. ८. २०.) इत्यत्र क्षरादेव परत्वमुच्यते, तच्छब्दस्य पूर्वपरामर्शित्वात्, तस्यैव पूर्वमुक्तत्वात्, अतएवाक्षरव्यावर्तकस्तुशब्द उक्तः, एतेन "नित्यत्वेन क्षरणाभावादक्षरशब्देन जीव एवोच्यते न तु पुरुषोत्तमाधिष्ठानभूतो जीवातीत' इति निरस्तं, "यं प्राप्य न निवर्तन्त" (गीता. ८. २१.) इति वाक्याज्जीवे तथात्वासम्भवान् नित्यमुक्तत्वापत्त्या शास्त्रवैफल्यापत्तेश्च, इत एव ज्ञानमार्गिणां तत्प्राप्तिरेव मुक्तिरिति ज्ञेयं, ततोनिवृत्तेः, "पुरुषः स परः पार्थ" (गीता. ८. २२.) इत्यनेनाक्षरात् परस्य स्वस्य भँक्त्येकलभ्यत्वमुक्तं, तेन ज्ञानमार्गीयाणां न पुरुषोत्तमप्राप्तिरिति सिद्धं, "यस्यान्तःस्थानि" (गीता. ८. २२.) इत्यनेन परस्य लक्षणमुक्तं, तच्च मृत्स्नादिप्रसङ्गे श्रीगोकुलेश्वरे स्पष्टमुच्यते, तेनाक्षरोपासकानां न पुरुषोत्तमोपासकत्वं तद्विषयकश्रवणादेरभावादितिभावः, "अव्यक्तोक्षर इत्युक्तस्तमाहुः परमां गतिम्" (गीता. ८. २१.) इतिवाक्यात् "स याति परमां गतिम्" (गीता. ८. १३.) इत्यत्राक्षरमेव यातीत्यर्थो ज्ञेयः।

किञ्च तैत्तिरीयोपनिषत्सु पठ्यते "यस्मिन्निदं सञ्च वि चैति सर्वं यस्मिन् देवा अधिविश्वे निषेदुः तदेव भूतं तदु भव्यमा इदं तदक्षरे परमे व्योमन् येनावृतं खञ्च दिवम्मही च

मानात्, समवमृशन्ति स्पर्शं कुर्वन्ति, अवमर्शयेद् वृणुयादित्यर्थः, तथेच्छा स्वकीययज्ञयशःसम्पादकत्वप्रकारिकेच्छा, तथाकृतिर्मुख्यत्वेनादौ वरणं, एवमिहापि परमसुकावपि भगवान् भक्तिं दत्वा यस्य जीवस्य स्वप्राप्तिमिच्छति तस्मै भक्तिं ददाति नेतरेभ्य इत्यर्थः, श्रवणादेः सर्वासां भक्तीनामित्यर्थः, एवमक्षरस्याप्यस्त्वक्षरसम्बन्धिश्रवणादीनामक्षरप्रापकत्वमप्यास्तामित्यर्थः, वैलक्षण्यं स्वस्याक्षराद्वैलक्षण्यं, तुशब्दः 'परस्तस्मा'त्विति तुशब्दः, एतेनाक्षरपदेन कूटस्थजीवातीतब्रह्मप्रतिपादनेन, नित्यमुक्तत्वापत्त्या 'यं प्राप्य न निवर्तन्त' एतादृशार्थस्याक्षरपदेन प्रतिपादनात्तस्यैव च जीवत्वोक्तौ मुक्तिसाधनवैफल्यापत्तेरित्यर्थः, इत एव 'यम्प्राप्ये'तिवाक्यादेव, पुरुषोत्तमस्याक्षरोत्तमत्वसिद्धावप्यक्षरस्य लोकत्वं तत्रस्थितत्वं च पुरुषोत्तमस्येति न वाक्यात्सिद्धमत आहुः किञ्चेति, 'यस्मिन्निद'मितिश्रुतावक्षरस्य सर्वाधारत्वं सर्वलीलोपयोगिदेवस्थानत्वं सर्वात्मकत्वं पादत्रयेणोच्यते

१. यज्ञयशसमिति कपुंपुंपु। २. श्रूयत इत्यधिकं थपुंगोपु। ३. तानूनप्त्रत्वा° वपुस्तके। ४. भक्त्यैक° पुंगोपुस्तकयोः। ५. मृत्स्नेत्यादि कथगोषु।

येनादित्यस्तपति तेजसा भ्राजसा च यमन्तःसमुद्रे कवयो वयन्ति यदक्षरे परमे प्रजा" इति (नारा. १.) अत्राक्षरात्मकत्वेन क्षरात्मकादाकाशात् "परमे व्योम्नि" भक्तानां हृदयाकाश इति यावत्। तत्र प्रकाशमानमित्यर्थात्, अत एव "ब्रह्मविदाप्नोति परम्" (तै. ब्र.) इत्युपक्रम्य "सत्यं ज्ञानमनन्तं ब्रह्म यो वेद निहितं गुहायां परमे व्योमन्" (तै. ब्र.) इत्येतदुपनिषत्स्वेव पठ्यते, "यदक्षरे परमे प्रजा" इतिपद"मवयन्ती"त्यनेन सम्बध्यते, अत्र "प्रजा"-पदाद् व्यापिवैकुण्ठात्मको लोकोक्षरपदेनोच्यत इत्यवगम्यते, अत एव "न यत्र माया" (भाग. २. ९. १०.) इत्यादिना श्रीभागवते तत्स्वरूपमुच्यते, एतेनाक्षरस्य पुरुषोत्तमाधिष्ठानत्वं निश्चीयते, इतोप्यक्षरातीतः पुरुषोत्तम इत्यवगम्यते, एवं सति सामान्यं भगवद्विभूतिरूपत्वं तद्भावस्तस्य पुरुषोत्तमस्य भावः सत्तोक्तरीत्या तत्र स्थितिरितियावत्, ताभ्यां हेतुभ्यां तथेत्यप्यर्थो ज्ञेयः ॥ ३३ ॥

ननु संसारनिवृत्त्यानन्दाविर्भावयोरविशेषादक्षरे ब्रह्मणि लये पुरुषोत्तमे प्रवेशान् न्यूनतोक्तौ को हेतुरित्याकाङ्क्षायामाह।

इयदामननात् ॥ ३४ ॥

इयदिति परिमाणवचनं तस्य श्रुतौ कथनादित्यर्थः, अत्रेदमवधेयम्[2], तैत्तिरीयोपनिषत्सु "सैषानन्दस्य मीमांसा भवति" (तै. ब्र.) इत्युपक्रम्य मानुषमानन्दमेकं गणयित्वा तस्मादुत्तरोत्तरं शतंगुणमानन्दं गन्धर्वानारभ्य प्रजापतिपर्यन्तस्योक्त्वोच्यते, "ते ये[3] शतं प्रजापतेरानन्दाः[4] स एको ब्रह्मण आनन्दः" (तै. ब्र.) इति, एवं सतीयदे[5]तावदित्यक्षरानन्दस्य सावधिकत्वेन[6] श्रुतौ कथनादानन्दमयत्वेन निरवध्यानन्दात्मकत्वस्य पुरुषोत्तमे कथनात् तथोक्तिरिति ॥ ३४ ॥ ११ ॥

इति तृतीयाध्याये तृतीयपाद एकादशमक्षरधियामित्यधिकरणम् ॥ ११ ॥

अथ ज्ञानमार्गे यथा स्वात्मत्वेन ब्रह्मणो ज्ञानं तथा भक्तिमार्गेपि भक्त्या पुरुषोत्तमज्ञाने स्वात्मत्वेन पुरुषोत्तमज्ञानं भवति न वेति विचार्यते, सर्वान्तरत्वेन श्रुतौ कथनात्

तुरीयपादे तु पुरुषोत्तमाधारत्वमुच्यते, एतच्च प्रथमचरणस्यार्थमाहुरत्राक्षरेत्यादिना, अत्र भक्तानां हृदयाकाशे, प्रकाशमानं पुरुषोत्तमाधिष्ठानत्वविशिष्टमक्षरं प्रकाशमानमित्यर्थः, 'परमव्योम'पदस्य भक्तहृदयबोधकतायां मानमाहुरत एवेत्यादि, ननु तथाप्यक्षरस्य लोकात्मकत्वे किं गमकमत आहुर्यदक्षर इत्यादि, तत्स्वरूपं व्यापिवैकुण्ठात्मकाक्षरस्वरूपं, इतोपि शुकवाक्यादपि, सामान्यतद्भावाभ्यामितिसूत्रभागस्यार्थान्तरं स्वयं व्याख्यातार्थानुकूलमाहुरेवं सतीत्यादिना, एवं सति पूर्वोक्तरीत्या पुरुषोत्तमाधिष्ठानत्वस्याक्षरे श्रुतिसिद्धत्वे सति, सामान्यमिति समानानां भगवद्विभूतिरूपाणां भावः सामान्यमक्षरस्य भगवद्विभूतिरूपत्वमितियावत्, उक्तरीत्या 'यदक्षरे परमे प्रजा'इतिश्रुत्युक्तरीत्या, तत्र स्थितिस्तद्भावशब्देन सोत्राक्षरे पुरुषोत्तमस्य स्थितिरुक्तेत्यर्थः, तथासद्व्याख्यातार्थस्य याथार्थ्यम् ॥ ३३ ॥

इयदामननात् ॥ ३४ ॥ नन्वक्षरात् संसारनिवृत्त्यानन्दयोर्लाभात्पुरुषोत्तमापेक्षयाक्षरस्य न्यूनतायां को हेतुरिति सूत्रेण प्रदर्शयन्तः सूत्रमवतारयन्ति नन्वित्यादि, तस्य पुरुषोत्तमापेक्षयाक्षरे न्यूनत्वस्य, अत्रेदमवधेयमक्षरे पुरुषोत्तमापेक्षया न्यूनत्वे प्रमाणं बोद्धव्यमित्यर्थः, एवं सत्यक्षरानन्दस्यैकत्वेन परिच्छेदश्रावणे सति, इयदितिसूत्रभागार्थमाहुरियदेतावदिति । परिच्छिन्नानन्दवदितिहेतोरित्यर्थः ॥ ३४ ॥ ११ ॥

इति तृतीयतृतीय एकादशाधिकरणम् ॥ ११ ॥

---

१. अस्मात् पूर्वमेतेनाक्षरस्येत्यारभ्य पुरुषोत्तम इत्यवगम्यत इति कपुपुस्तकयोः । २. अत्रेदं ज्ञेयमिति सर्वेष्वादर्शाः । ३. य इतिपदं लुप्तं कगोपुस्तकयोः । ४. आनन्द इति कगोपुस्तकयो । ५. सति यदिति कंपुस्तके सति यत इति च गोपुस्तके । ६. सावधित्वेनेति कपुपुस्तकयोः ।

तद् भवतीति पूर्वः पक्षः, तथात्वेपि "सर्वस्य वशी सर्वस्येशानः" (बृह ६. २. २२.) इत्यादिश्रुतिभिरेवमेव ज्ञानं न तु तथेतिसिद्धान्तः, अत्र तथाज्ञानाभावस्यावश्यकत्वार्थं विपरीते बाधकमाह, पूर्वस्मिन् सूत्रे ब्रह्मानन्दाद् भजनानन्दस्याधिक्यं निरूपितं, स तु भगवद्दत्तः, तद्व्यवधायकोर्थश्च प्रभुणा न सम्पाद्यते, स्वात्मत्वेन ज्ञानश्च भजनानन्दान्तरायरूपं, यद्येतत्सम्पादयेत् तं न दद्यात्, अन्यथाभावात्, अतः स्वात्मत्वेन ज्ञानं भक्तिमार्गीयस्य न सम्भवतीत्याशयेनाहान्तरा स्वात्मन इति ।

अन्तरा भूतग्रामवत् स्वात्मनः ॥ ३५ ॥ (३. ३. १२.)

भगवता भक्तिमार्गे स्वीयत्वेनाङ्गीकृतो य आत्मा जीवस्तस्य यदात्मत्वेन ज्ञानं तद् भजनानन्दानुभवेन्तरा व्यवधानरूपमिति भगवता तादृशे जीवे तन्न सम्पाद्यत इत्यर्थः, तत्सम्पादनस्य सर्वथैवासम्भावितत्वं[3] हीनत्वञ्च ज्ञापयितुं दृष्टान्तमाह भूतग्रामवदिति, उक्तभक्तस्य विग्रहोप्यलौकिक इति तत्र लौकिको भूतग्रामो न सम्भवति हीनत्वात्तथेत्यर्थः ।

अथवा लौकिको भूतग्रामः स्त्रीपुत्रपश्वादिर्ब्रह्मानन्दानुभवे बाधकस्तथा भजनानन्दानुभवे स्वात्मत्वेन भगवज्ज्ञानमित्यर्थः ॥ ३५ ॥

ननु भक्तेष्वप्युद्धवादिषु ज्ञानोपदेशः श्रूयते, स चात्मब्रह्माभेदज्ञानफलक इत्यात्मत्वेन ज्ञानाभावे तद्भेदोपदेशानुपपत्तिः स्यादिति तन्न मन्तव्यमेवैवं[4] सति भक्तिमार्गाज्ज्ञानमार्गस्योत्कर्षश्च सिध्यतीत्याशङ्क्य परिहरत्युपदेशान्तरवदिति ।

अन्यथाभेदानुपपत्तिरिति चेन्नोपदेशान्तरवत् ॥ ३६ ॥

न ह्यत्राभेदज्ञानायोपदेशः किन्तु यथाग्रिमस्वर्गापवर्गाख्यपारलौकिकानन्दफलकालौकिके कर्मण्यधिकाररूपसंस्कारार्थं गायत्र्युपदेशः क्रियते तत्संस्कारसंस्कृतं तच्छरीरादिकमपि

अन्तरा भूतग्रामवत् स्वात्मनः ॥ ३५ ॥ अक्षराभेदविचारेणाभेदज्ञानश्रवणानन्तर प्रसङ्गसङ्गत्या ज्ञानमार्गे पूर्णज्ञानसम्पत्तौ यथा स्वात्मब्रह्माभेदानुभावो जायते तथा भक्तिमार्गे भक्त्युत्पत्त्यनन्तरं 'भक्त्या मामभिजानाती'त्यादिवाक्योक्तः स्वात्मपुरुषोत्तमाभेदानुभावो भवति न वेति विचार्यतेथेत्यादिना, पूर्वपक्षमाहुः सर्वान्तरत्वेनेत्यादिना, श्रुतौ कथनात् 'यः पृथिव्यां तिष्ठन् पृथिव्या अन्तरो यं पृथिवी न वेद यस्य पृथिवी शरीर यः पृथिवीमन्तरो यमयती'त्यादिश्रुतौ कथनात्, स च यस्मिंस्तिष्ठति तं स्वान्तः स्थापयत्ययोगोलकाग्निवत्, इत्थञ्चाभेदज्ञानं पर्यवसितं सर्वत्रेतिभावः, सिद्धान्तमाहुस्तथात्वेपीत्यादिना, तथात्वेपि वस्तुतो जीवानां ब्रह्माभिन्नत्वेपि, एवमेवज्ञानं पुरुषोत्तमभक्तानां सर्ववशित्वेन सर्वेशत्वेनैव पुरुषोत्तमज्ञानं, न तु तथा, न तु स्वात्माभेदेन ज्ञानं फलायेत्यर्थः, अत्र पुरुषोत्तमभक्तेषु, तथाज्ञानाभावस्य भगवति स्वात्माभेदज्ञानाभावस्य, विपरीते तादृशाभेदज्ञाने, पूर्वस्मिन् सूत्र 'इयदामनना'दितिसूत्रे, स तु भजनानन्दस्तु, तद्व्यवधायकः 'स वै नैव रेमे तस्मादेकाकी न रमते स द्वितीयमैच्छ'दित्यादिश्रुतिभ्यो मुख्यभक्तिमार्गस्य रमणार्थत्वावगमादभेदावगमो भजनानन्दव्यवधायक इत्यर्थः, स्वात्मत्वेन ज्ञानं 'यत्र त्वस्य सर्वमात्मैवाभूत् तत् केन कं पश्ये'दित्यादिरूपं, एतद्भेदज्ञानं, अग्रे भेदज्ञानदशायां, अन्यथाभावाद्रमणासम्भवात्, तादृशे जीवे भजनानन्दयोग्ये जीवे, तद्भेदज्ञानं, उक्तभक्तस्य भजनानन्दयोग्यभक्तस्य, तथाभेदज्ञानमपि तथेत्यर्थः ॥ ३५ ॥

अन्यथाभेदानुपपत्तिरिति चेन्नोपदेशान्तरवत् ॥ ३६ ॥ ननु भक्तेषु स्वात्मनि ब्रह्माभेदानुभवस्य भजनानन्दानुभवप्रतिबन्धकत्वे भगवांस्तेषु कथमभेदमुपदिशति इत्यत्र समाधानं सूत्रकारस्यावतारयन्ति नन्वित्यादि, स च

---

१. मार्ग इति कंगोपुस्तकयोः । २. त्वेतादृश इति कपुपुस्तकयोः । ३ असम्भावितमिति कपुपुस्तकयो । असम्भवितमिति च कंपुस्तके । ४. तन्मन्तव्यमेवेति सर्वेष्यादर्शा. । प्रदीपेपि पश्चपङ्क्तौ तन्मन्तव्यमेवेत्युपन्यासः ।

भूतादिभिरपि नोपहतं भवति यथा वा योगोपदेशसंस्कृतस्य वपुरग्न्यादिभिर्नोपहन्यते तथा प्रकृते भक्तिभावस्य रसात्मकत्वेन संयोगविप्रयोगभावात्मकत्वाद् द्वितीयस्य प्रलयानलादतिकरालत्वेन कदाचित् तद्भावोदये तेन भक्तवपुरादेस्तिरोधानेग्रिमभजनानन्दानुभवप्रतिबन्धः स्यादिति तन्निवृत्त्यर्थं ज्ञानोपदेशसंस्कारसंस्कृतं तद्वपुरादिकं भगवता क्रियते न त्वात्माभेदज्ञानं भगवतोभिप्रेतमित्यर्थः, अन्यथोपदेशानन्तरं बदरीं गच्छन् विदुरं प्रती"हागतोहं विरहातुरात्मा" (भाग. ३. ४. २०.) इति न वदेदेवमेवान्येष्वपि भक्तेषु ज्ञेयं, अत्रोपदेशान्तरपदं प्रस्तुतोपदेशभिन्नमुपदेशमाहेति प्रस्तुतस्य तस्यान्यस्याभावादभेदपदेनाभेदोपदेश एवोच्यते, एतेन भगवान् स्वीयानां भक्तिभावप्रतिबन्धनिरासायैव सर्वं करोतीति ज्ञापितं भवति ।

अथवोपदेशान्तरवदित्यस्यायमर्थः, शरीराद्यध्यासवतस्तद्भिन्न आत्मा तत्त्वं न तु शरीरादिरित्युपदेशो ज्ञानमार्गे यथा क्रियते तेन शरीरादावात्मबुद्ध्या यः स्नेहादिः सोपगच्छति तथात्र सर्वेषामात्मनो ह्यात्मा "य आत्मनि तिष्ठन्" (बृह. ५. ७.) इत्यादिश्रुतिसिद्धो जीवात्मनोप्यात्मा पुरुषोत्तम इति बोध्यते तेन पुरुषोत्तमे निरुपधिः स्नेहस्तत्सम्बन्धेत्वनात्मनि स सिध्यति, यद्यप्येवम्भावः पूर्वमप्यासीदेव तथापि सहजस्य शास्त्रार्थत्वेन ज्ञानेतिप्रमोदो दार्ढ्यं च भवतीति तथा, नैतावता जीवाभेद आयाति, अग्रे जीवनसम्पत्तिरेवोपदेशकार्यं न तु तेन पूर्वभावोपमर्दः सम्भवतीति सारं, तेन ज्ञाने सर्वाधिक्यं मन्वानाय भक्तिबलप्रदर्शनञ्च सिध्यति ॥ ३६ ॥

उपदेशश्च, तदभेदः स्वात्मनि ब्रह्माभेदः, तन्न मन्तव्यं भक्तानां फलभोगदशायां स्वात्मनि ब्रह्मभेदज्ञानं न मन्तव्यमित्यर्थः, एवं सति स्वात्मब्रह्माभेदज्ञानस्य फलदशायां सर्वत्रावश्यकत्वे सति, परिहरति सूत्रकारः समाधत्त इत्यर्थः, तत्र सूत्रमध्येन्यथापदस्यार्थं आत्मत्वेन ज्ञानाभाव इत्यनेनोक्तः, अभेदानुपपत्तेरितिसूत्रभागस्यार्थस्तद् भेदोपदेशानुपपत्तिरित्यनेनोक्तः, इति तन्मन्तव्यमेवेत्यारभ्य परिहरतीत्यन्ते'नेति चेन्ने'तिसूत्रभागस्यार्थ उक्तः, परिहरति पूर्वोक्तदृष्टान्तेन सूत्रकारः परिहरतीत्यर्थः, अत्रोद्धवे साक्षाद्व्रजाङ्गनासु चोद्धवद्वाराप्यन्त्राप्येकान्तभक्तेषु, अभेदज्ञानाय अभेदज्ञानरूपफलायेत्यर्थः, भूतादिभिः शरीरनाशकत्वेनाभिमतभूतादिभिरित्यर्थः, तथा प्रकृते देहरक्षार्थमेकान्तभक्तेषु स्वात्मनि ब्रह्माभेदोपदेश इत्यर्थः, तन्निवृत्त्यर्थं भक्तदेहानां तिरोभावनिवृत्त्यर्थं, ज्ञानोपदेशसंस्कारेति, अत्र स्वात्मनि पुरुषोत्तमाभेदोपदेशो बोध्यो 'भक्त्या मामभिजानाती'त्यनेनोक्तो न त्वक्षराभेदोपदेशो भक्तानां तादृशसंस्कारो भवितुमर्हति तस्य तादृशविरहदुःखनिवर्तकत्वात्, अन्यथाभेदोपदेशस्य मोक्षजनकत्वे, न वदेन् मुक्त एव भवेदित्यर्थः, इत्थं च तादृशविरहातुरात्मनो देहपात एव स्याद्यदि भगवता तादृशोपदेशो न कृतः स्यादितिभावः, एवमेव विरह उपदेशस्य देहरक्षार्थत्वमेव, अन्येष्वपि यथा कुरुक्षेत्रे व्रजभक्तानां वाक्य 'आहुश्च ते नलिननाभ पदारविन्दं योगीश्वरैर्हृदि विचिन्त्यमगाधबोधैः संसारकूपपतितोत्तरणावलम्बं गेहञ्जुषामपि मनस्युदियात् सदा न' इत्यादि, ननु मूलेभेदानुपपत्तिरेवोक्ता न त्वभेदोपदेशानुपपत्तिरभेदोपदेशपरतया भवदीयव्याख्याने किं मानमित्यत आहुरत्रेत्यादि, उपदेशान्तरपदं दृष्टान्तप्रतिपादकमुपदेशान्तरपदमित्यर्थः, प्रस्तुतस्य दार्ष्टान्तिकस्य, अन्यस्याभेदोपदेशातिरिक्तस्य, अभेदोपदेश एवोच्यते अभेदपदलक्षणयाभेदोपदेश एवोच्यत इत्यर्थः भक्तिभावेत्यादि, भजनानन्दानुभवप्रतिबन्धको यो विरहे देहतिरोभावस्तन्निरासायैव स्वाभेदज्ञानोपदेशं तेषु करोतीत्यर्थः, अत्र भक्तिमार्गे, तेन पुरुषोत्तमस्य स्वात्मत्वेन ज्ञानेन, तत्सम्बन्धेन पुरुषोत्तमाभेदसम्बन्धेन, आत्मनि पुरुषोत्तमाभेदेन ज्ञाते जीवात्मनीत्यर्थः, स परः प्रेमा, एवम्भावः पुरुषोत्तम आत्मत्वेन प्रेमातिशयरूपो भाव इत्यर्थः, पूर्वभावः भजनानन्दानुभवरूपः ॥ ३६ ॥

---

१. °देशान्तरमाहेति वप्रकाशयोः । २. °निरासादिति कैपुस्तके । ३. सम्बन्धित्वेनेतिपाठः ४. अतिप्रमोदार्ढ्येति कंगोपुस्तकयोः ।

ननु "तद्योहं सोसौ योसौ सोहम्" (ऐत. आर. २. १२. २.) इत्यैतरेयके तैत्तिरीयके "त्वाह-मसि ब्रह्माहम्" (महानारा. ५. १०.) इति पठ्यते, अत्र मध्यस्थं "ब्रह्म"पदमुभयत्र सम्बध्यते, तेनावृत्त्या व्यतिहारोतो ब्रह्माभेदः सिध्यति, तथा लीलामध्यपातिभक्तानामपि "कृष्णोहमहं कृष्णः" (भाग. १०. १९. २७.) इतिभाव उल्लेखश्च श्रूयतेतस्तदभेदज्ञानं भक्तिफलमिति स्फुल्यमानं प्रतिवादिनं तत्स्वरूपं बोधयति ।

व्यतिहारो विंशिपन्ति हीतरवत् ॥ ३७ ॥

रसात्मकत्वाद्भक्तेः संयोगविप्रयोगात्मकत्वाद् द्वितीयभावोद्रेके यथेतरेश्वप्रलापादयो व्यभिचारिभावास्तथातिविगाढभावेन तदभेदस्फूर्तिरप्येकः, स न तु सार्वदिकः, तदा स्वात्मानं तत्त्वेन विंशिपन्ति तं च स्वात्मत्वेन, सोत्र व्यतिहारपदार्थ इत्यर्थः, अपरश्चोद्देश्यविधेयभाव-स्फूर्तौ न ह्यद्वैतज्ञानमस्ति किन्तु भावनामात्रं, भक्तानां तु विरहभावे तदात्मकत्वमेवाखण्डं स्फुरति येन तल्लीलां स्वतः कुर्वन्ति, एतद् यथा तथा श्रीभागवतदशमस्कन्धविवृतौ प्रपञ्चितमस्माभिः, एवं सति मुख्यं यदद्वैतज्ञानं तद् भक्तिभावैकदेशव्यभिचारिभावेष्वेकतरं इति सर्षपस्वर्णाचलयोरिव ज्ञानभक्त्योस्तारतम्यं कथं वर्णनीयमितिभावः ॥ ३७ ॥ १२ ॥

॥ इति तृतीयाध्याये तृतीयपादे द्वादशमन्तरा भूतग्रामवदित्यधिकरणम् ॥ १२ ॥

अथेदं विचार्यते, प्राप्तभक्तेः पुरुषस्य सत्यशमदमादयो विधीयन्ते न वेति फलोप-कार्यन्तरङ्गसाधनत्वाच्छुद्धौ सत्यामेव चित्ते भगवत्प्रादुर्भावसम्भवाद्विधीयन्त इति पूर्वः पक्षः।

सैव हि सत्यादयः ॥ ३८ ॥ (३. ३. १३.)

तादृशस्य ते न विधीयन्त इतिसिद्धान्तः, तत्र हेतुमाह, हि यस्माद्धेतोः, सैव भक्तिरेव

व्यतिहारो विंशिपन्ति हीतरवत् ॥ ३७ ॥ नन्वित्याद्यैतरेयकवाक्यं जीवस्यादित्यपुरुषं प्रति तैत्तिरीय-वाक्यं जीवस्य जलस्थब्रह्म प्रति, अत्र तैत्तिरीयवाक्ये, उभयत्रास्मदर्थे विशेषणतयास्मदर्थे विशेष्यतया चेत्यर्थः, आवृत्त्या ब्रह्मपदस्यावृत्त्येत्यर्थः, व्यतिहारो विशेषणविशेष्यभावेन व्यत्यय इत्यर्थः, उल्लेखश्च श्रूयते पञ्चाध्यायां भक्तानामुल्लेखः श्रूयत इत्यर्थः, भक्तिफलं भक्तिजन्यं फलमित्यर्थः, तत्स्वरूपं भक्तानां व्यतिहारस्वरूपं, बोधयति सूत्रकारो बोधयति, तदभेदः श्रीकृष्णाभेदः, एकः स व्यभिचारः, तत्त्वेन श्रीकृष्णत्वेन, विंशिपन्ति निरूप-यन्ति, तं च श्रीकृष्णं च, अत्र भक्तिमार्गे, उद्देश्यविधेयभावस्फूर्तौ 'त्वहमस्मि' 'ब्रह्माहमस्मी' तिवाक्यार्थे उद्देश्यविधेयभावस्फूर्तावित्यर्थः, तल्लीलां भगवल्लीलां, प्रपञ्चितं पञ्चाध्याय्यां प्रपञ्चितमित्यर्थः, एवं सति भगवल्लीलायाः स्वयंकरणे सति, मुख्यं स्वस्मिन् भगवद्धर्मातिरिक्ताविषयं, भक्तिभावैकदेशो भक्तिभावयोः संयोगविप्रयोगयोर्मध्य एकदेश एको विभागोर्धभक्तिभाव इत्यर्थः, एकतर इति, तथा च भक्तिभावैकदेशो विरहभावस्तत्रत्या ये सञ्चारिभावास्तेषामप्येकतरोभेदानुभव इत्यर्थः, इतीति हेतौ, अन्येषां फलमूर्धन्यो यो भावना-रूपोभेदानुभवस्तदपेक्षयोत्कृष्टो यो भगवदभेदानुभव इतरविषयक. सोपि फलसाधनीभूतभक्त्येकदेशविरहभावीय-व्यभिचारिभावानामेकदेश इतिहेतोरित्यर्थः, कथं वर्णनीयं न कथमपि वर्णयितुं शक्यमित्यर्थः ॥ ३७ ॥ १२ ॥

इति तृतीयतृतीये द्वादशाधिकरणम् ॥ १२ ॥

सैव हि सत्यादयः ॥ ३८ ॥ भक्तेः फलोत्कर्षमुपपाद्य फलसाधनतोप्युत्कर्षं प्रतिपादयन्त्यधिकरणप्र-योजनं वदन्तः सूत्रमवतारयन्त्यथेत्यादिना । विधीयन्ते भक्तिसिद्ध्युत्तरमपि विधीयन्ते भक्तस्य फलोद्देशेन विधीयन्ते न वेतिसंशयः, शमादिविधिर्विषयः फलेत्यादिपूर्वः पक्षः, विधीयन्ते भक्तिसिद्ध्युत्तरमपि विधीयन्त

---

१. व्यतिहारत इति कंगोपुस्तकयोः । २. उन्मेषश्चेति कपुस्तके । ३. पम्फुल्यमानमिति कपुस्तके । ४. स च नेति कंखगोपु । ५. ये तत्तल्लीलामिति कपुस्तके । ६. तथेति त्रुटं कंपुस्तके । ७. एकतरदिति धपुस्तके ।

सत्यादिसर्वसाधनरूपा, तस्यां सत्यां सत्यादयो ये ज्ञानमार्गे विहितत्वात् कष्टेन क्रियन्ते मुमुक्षुभिस्ते भक्तहृदि भगवत्प्रादुर्भावात् स्वत एव भवन्तीति न विधिमपेक्षन्त इत्यर्थः ॥ ३८ ॥

पूर्वसूत्रे शास्त्रोक्ताखिलसाधनरूपत्वं भक्तेरुक्तं तद्दार्ढ्यार्थमधुना मुक्तिप्रतिबन्धकत्वेन हेयत्वेनोक्तानां कामादीनामपि भगवत्सम्बन्धान्मुक्तिसाधकत्वमुच्यते, भक्तिस्तु विहिताविहिता चेति द्विविधा, माहात्म्यज्ञानयुतेश्वरत्वेन प्रभौ निरुपधिस्नेहात्मिका विहितान्यतोऽप्राप्तत्वात्, कामाद्युपाधिजा सा त्वविहिता, एवमुभयविधाया अपि तस्या मुक्तिसाधकत्वमित्याह ।

कामादीतरत्र तत्र चायतनादिभ्यः ॥ ३९ ॥

इतरत्र विहितभक्तेरितिशेषः, कामाद्युपाधिस्नेहजरूपायां कामाद्येव मुक्तिसाधनमित्यर्थः, भगवति चित्तप्रवेशहेतुत्वात्, आदिपदात् पुत्रत्वसम्बन्धित्वादयः, स्नेहत्वाभावेप्यविहितत्वभगवद्विषयकत्वयोरविशेषाद् द्वेषादिरपि सङ्गृह्यते, तेन भगवत्सम्बन्धमात्रस्य मोक्षसाधकत्वमुक्तं भवति, तत्र विहितभक्तावित्यर्थः, शास्त्रे सर्वथा हेयत्वेनोक्ता हि गृहाः, सर्वनिवेदनपूर्वकं गृहेषु भगवत्सेवां कुर्वतां तदुपयोगित्वेन तेभ्य एव मुक्तिर्भवतीत्यर्थः, एतादृशानां गृहा भगवद्गृहा एवेतिज्ञापनायायतनपदं, तेषु तथाप्रयोगप्राचुर्यात्, आदिपदेन स्त्रीपुत्रपश्वादयः सङ्गृह्यन्ते, एतेन ज्ञानादिमार्गादुत्कर्ष उक्तो भवति, बाधकानामपि साधकत्वात्, माहात्म्यज्ञानपूर्वकस्नेहे सत्येव भर्तृत्वेन ज्ञाने कामोपि सम्भवतीतिज्ञापनाय चकारः ॥ ३९ ॥ १३ ॥

॥ इति तृतीयाध्याये तृतीयपादे त्रयोदशं सैव हीत्यधिकरणम् ॥ १३ ॥

इत्यर्थः, तादृशस्येति सिद्धभक्तेः, ते शमादयः, तत्र भक्तिसिद्धिमति भक्ते शमाद्यनपेक्षायां, भक्तिरेव 'भक्त्या धर्मान्यथे'तिपद्यादित्यर्थः; 'यत्कर्मभिर्यत्तपसा ज्ञानवैराग्यतश्च यद् योगेन दानधर्मेण श्रेयोभिरितरैरपि सर्वं मद्भक्तियोगेन मद्भक्तो लभतेऽञ्जसे'तिभगवद्वाक्यादसहायशूरत्वाद्भक्तिरेव सर्वसाधिकेतिभक्तिसिद्धौ नेतरापेक्षेतिसिद्धान्तः ॥ ३८ ॥

कामादीतरत्र तत्र चायतनादिभ्यः ॥ ३९ ॥ कामादीनामित्यादि, 'कामं क्रोधं भयं स्नेह'मित्यादिवाक्यान्मुक्तिसाधकत्वमित्यर्थः, विहिता तापनीये विहितेत्यर्थः, अन्यतः प्रमाणान्तरतः, कामाद्युपाधिजा 'गोप्यः कामाद्भयात् कंस' इत्यादिवाक्योक्तेत्यर्थ. उभयविधाया 'विहिताविहिते'त्यनेनोक्ताया द्विविधाया अपीत्यर्थ., इतरत्रेत्यस्यार्थमाहुः कामादीत्यादिना, चित्तप्रवेशहेतुत्वात् कामाद्युपाधिजाताया अपि भगवति चित्तप्रवेशहेतुत्वान्मुक्तिजनकत्वमित्यर्थ , आदिपदात् कामादित्यादिपदात् सौत्रादित्यर्थः, स्नेहत्वाभावेपि द्वेषादौ स्नेहत्वाभावेपि, सौत्रतत्रपदस्यार्थमाहुर्विहितभक्ताविति, सौत्रायतनपदस्यार्थमाहुः शास्त्र इत्यादिना, तदुपयोगित्वेन सेवोपयोगित्वेन, तेभ्य आयतनादिभ्य', तेष्वित्यादि, तेषु भगवदायतनेषु हृदयादिषु, तथाप्रयोगदर्शनादायतनेतिप्रयोगदर्शनात्, एतेन मुक्तिविरोधित्वेन ज्ञानमार्गे उक्तानामपि गृहादीनां भक्तिमार्गे मुक्तिसाधकतया सूत्र उक्तत्वेन ॥ ३९ ॥ १३ ॥

इति तृतीयतृतीये त्रयोदशाधिकरणम् ॥ १३ ॥

---

१. सत्यामिति नास्ति पुस्तके ।

ननु नित्यानां वर्णाश्रमधर्माणां भगवद्धर्माणां चैककाले प्राप्तौ युगपदुभयोः करणासम्भवादन्यतरबाधे प्राप्ते कस्य स्यान्न कस्येति स्यात् संशयः, तत्र कर्मणां स्वस्वकाले विहितानामकरणे प्रत्यवायश्रवणादितरत्रातथाश्रवणादन्यदापि तत्कृतिसम्भवात् सावकाशत्वेन तेषामेव बाधो युक्तो न तु निरवकाशानामिति पूर्वः पक्षस्तत्र सिद्धान्तमाहादरादिति ।

आदरादलोपः ॥ ४० ॥ (३. ३. १४.)

ब्रह्मयज्ञप्रकरणे तैत्तिरीयैः पठ्यत "ओमिति प्रतिपद्यत एतद्वै यजुस्त्रयीं विद्यां प्रत्येषा वागेतत् परममक्षरं तदेतदृचाभ्युक्तं, ऋचो अक्षरे परमे व्योमन् यस्मिन् देवा अधिविश्वे निषेदुर्यस्तन्न वेद किमृचा करिष्यति य इत् तद् विदुस्त इमे समासत इति" (तै. आ. २.११.१.) इति, अत्र ऋक्सम्बन्धित्वेन वर्णात्मके वस्तुतस्तु "परमे" "परमव्योमा"त्मकेक्षरे ब्रह्मण्योङ्कारे वर्तमानं "तत्"लोकवेदप्रसिद्धं परं ब्रह्म "यो न वेद सं किमृचा करिष्यती"त्यनेन तदज्ञाने वेदाध्ययनस्य निष्फलत्वमुच्यते, एवं सति तदुक्तकर्मणोपि तथात्वमायाति, एतेन "भक्त्या मामभिजानाति" इतिवाक्यात् परब्रह्मस्वरूपज्ञानं भक्त्यैवेति भक्ताः सन्तः पुरुषोत्तमविदो ये तेषामेव वेदाध्ययनादिकं फलप्रदं नान्येषामित्युक्तं भवति, अत एव श्रीभागवतेप्युक्तं "ऋषयोपि देव युष्मत्प्रसङ्गविमुखा इह सञ्चरन्ति", संसरन्तीति वा (श्रीमद्भाग.३.९.१.), अन्वये निदर्शनं, "य इद्" ईश्वरत्वेन "तत्" पूर्वोक्तं परं ब्रह्म 'विदुस्त इमे' भक्ताः सर्वापेक्षया 'स'म्यक्प्रकारेण भगवन्निकटे श्रीगोकुलवैकुण्ठादि"ष्वासत इति", तेनान्येषां सम्यगसत्त्वमर्थाक्षिप्तं भवति, पुरःस्थितार्थवाचीदंशब्दप्रयोगेण चान्येषामसत्तुल्यत्वं श्रुतेरभिमतमिति ज्ञायते, ऋक्शाखायामपि

आदरादलोपः ॥ ४० ॥ पूर्वाधिकरणे सात्त्विकभक्तानां ज्ञानासक्तिवारणाय ज्ञानमार्गाद् भक्तिमार्गस्य फलतः साधनतः स्वरूपतः सम्बन्धतश्चोत्कर्षः प्रतिपादितः, अतःपरं राजसानां भक्तानां कर्मकरणासक्तिं वारयितुं कर्मकरणनिर्णयाधिकरणसूत्रमवतारयन्ति नन्वित्यादिना, कस्य स्याद् बाधः कस्य स्यादित्यर्थः, सूत्रार्थमाहुर्ब्रह्मयज्ञेत्यादिना, तैत्तरीयैः पठ्यत आरण्यके स्वाध्यायब्राह्मणे पठ्यते, श्रुत्यर्थस्तु ब्रह्मयज्ञेन यक्ष्यमाण ओमिति प्रतिपद्यते, प्रणवाक्षरं प्रथममुच्चारयेत्, प्रतिपद्यत इति पञ्चमो लकारः, पूर्वोच्चारणे हेतुरेतद् वै यजुस्त्रयीं विद्यां प्रति, अयं यजूरूपः प्रणवमन्त्रस्त्रयीं विद्यां लक्ष्यीकृत्य प्रतिनिधिरूपो यतोस्ति, एषा वाक् सर्ववेदबीजत्वात् सर्ववेदमयी प्रणवरूपा वागित्यर्थः, तदेतदृचाभ्युक्तमिति, तदेतत् परमं ब्रह्मस्वरूपमक्षरमृचाभ्युक्तं, मनुपदोक्तर्चा स्पष्टमुक्तमित्यर्थः, यस्मिन् प्रणवार्थेक्षरात्मके लोके, अधिविश्वे विश्वात्मकमक्षरं लोकमधिकृत्य, निषेदुः स्थिता भवन्ति, यस्तन्न वेद यः पुरुषस्तत्त्वं पुरुषोत्तमं न वेद, किमृचा करिष्यति? ऋगिति वेदमात्रोपलक्षणं, स पुरुषो वेदेन किं करिष्यति ? न किञ्चिदित्यर्थः, इदिति निर्धारणार्थकमव्ययं, समासते ब्रह्मलोके सम्यगासत इत्यर्थः, तत् लोकवेदप्रसिद्धं पुरुषोत्तमस्वरूपं, 'अतोस्मि लोके वेदे च प्रथितः पुरुषोत्तम'इतिगीतावाक्याल्लोकवेदप्रसिद्धं, एवं सति पुरुषोत्तमस्वरूपाज्ञाने वेदानां निष्फलत्वनिर्वचने सति, तदुक्तकर्मण उत्कृष्टत्वेन निर्णीतस्य पुरुषोत्तमसम्बन्धि यत् कर्म तस्य, तथात्वं उत्कृष्टत्वमित्यर्थः, अत एव पुरुषोत्तमस्वरूपाविदां वेदाध्ययनस्य निष्फलत्वादेव, ऋषयोपीतिवाक्यं तृतीयस्कन्धनवमाध्यायस्थं, अन्वये निदर्शनं वेदाध्ययनसत्त्वेपि संसारित्वकथनेन फलाभावप्रदर्शनं, वेदाध्ययनसत्त्वेन संसारित्वकथनेन फलाभावप्रदर्शनादन्वयव्यभिचारप्रदर्शकमित्यर्थः, पूर्वोक्तश्रुतिशेषं व्याकुर्वन्ति य इत्यादि, तेन उक्तश्रुत्यर्थबलेन, अन्येषां पुरुषोत्तमस्वरूपाविदां, सम्यगसत्त्वं ब्रह्मलोके सम्यगागमनमित्यर्थः, इदंशब्दप्रयोगेणे'मे समासत' इतिश्रुतौ सत्केश्चिदंशब्दप्रयोगेणेत्यर्थः, एतेन परलभ्यभक्तावादरो निर्णीतः, साधनभक्तिरपि श्रुतिसम्मतेत्याह ऋगित्यादिना, एतच्छ्रुत्यर्थस्तु तं लोकवेद-

---

१. तथाश्रवणात् पुं । २. तैत्तिरीयकैः पुं । ३. परमव्योमात्मके चपापुंगो । ४. स इत्यं पागो । ५. सञ्चरन्ति इत्यं पापुं । ६. परब्रह्म पुपुंगो । ७. इति इत्यं कपु ।

"तमु स्तोतारः पूर्व्यं यथाविद ऋतस्य गर्भं जनुषा पिपर्तन आस्य जानन्तो नाम चिद् विवक्तन महस्ते विष्णो सुमतिं भजामह" (ऋक्सं १.१६४.३९.) इत्याद्यृग्भिरन्येभ्यो धर्मेभ्यः सकाशाद् भगवद्धर्मेष्वादरः श्रूयत इति तेषामलोप एवेत्यर्थः, एतेनाकरणे प्रत्यवायश्रवणादित्यादि यदुक्तं तदपि प्रत्युक्तं वेदितव्यं, करणेपि वैयर्थ्यात् तदपरिहारात्, एवं सति यदकरणे प्रत्यवायकथनं तेन तस्मादवकाशं प्राप्य गौणकालेप्यकरणे तथेति तस्याशय इति ज्ञायते ॥ ४० ॥

नन्वेवंतात्पर्यकत्वे श्रुतेरुपनयनादिवत् कर्मोपयोगित्वं भक्तितज्ज्ञानयोः स्यादिति कर्मण एव प्राधान्यं न तु भक्तेः सिध्यतीत्याशङ्क्य भक्तितज्ज्ञानावश्यकर्तव्यबोधकश्रुतितात्पर्यमाह ।

उपस्थितेतस्तद्वचनात् ॥ ४१ ॥

तयोर्युगपत्करणेनुपस्थितेपि यदि पूर्वं भगवद्धर्मकरणमुच्येत तदा त्वदुक्तं स्यान्न त्वेवं किन्तूभयोर्युगपत्करण उपस्थिते बलाबलविचारे क्रियमाणेत आदराद्धेतोस्तद्वचनाद् भगवद्धर्माणां बलवत्त्वेनालोपवचनान्न कर्माङ्गत्वमेतेषां सिध्यतीत्यर्थः ॥ ४१ ॥ १४ ॥

इति तृतीयाध्याये तृतीयपादे चतुर्दशमादरादलोप इत्यधिकरणम् ॥ १४ ॥

प्रसिद्धं भगवन्त, उ इति सम्बोधनार्थमव्ययं, श्रुतय आहुर्भो स्तोतारो भगवद्वर्णनपराः, तं पूर्व्यं सर्वकारणकारणं, यथाविदो भयथावद् भगवत्स्वरूपवेत्तारो भवन्तः, ऋतस्य सूनृतवाणीस्वरूपस्य वेदस्य, गर्भमन्तर्निहितं, जनुषा यावज्जीव जन्मना, पिपर्तन सन्तुष्टं कुरुतदेहेन्द्रियादिसकलस्वीयपदार्थानां भगवत्येव विनियोगं कृत्वा सन्तोषयन्त्विति भावः, इत्थं च श्रुतिरपि सर्वप्रकारैर्भगवद्धर्मादरमेव सूचयति स्फुटं, सर्वप्रकारैर्भगवति प्रपत्त्या सन्तोषाजनने जन्मवैफल्यं स्यादत उत्तरार्धेनानुकूल्यमाहास्येत्यादि, आ समन्तात्, अस्य पुरुषोत्तमस्य, नाम जानन्तोखण्डब्रह्मात्मकत्वेन नामस्वरूपं जानन्तः, विवक्तन विशेषेण वदत, नामस्वरूपं ज्ञात्वा तदेव कीर्तयतेत्यर्थः, अनुकल्पेन कथं सन्तोषोत आह चिदिति, नाम सच्चिदानन्दस्वरूपं भवतीत्यर्थः, तथा च नाम्नः सच्चिदानन्दरूपत्वात् तेन भगवत्स्वरूपावबोधात् ततः सन्तोषणमपि भगवतो भवतीत्यर्थः, नामस्वरूपाज्ञाने तदुपायमाहुर्मह इत्यादिना, हे विष्णो, ते [illegible], महत्तमस्तेजोरूपं, सुमतिं [illegible] जानन्तं भगवद्भक्तं गुरुं भजामहे, तथा चान्यो भजतु मा वा वयं तु भजामह इति श्रुतयः स्वकृत्यमावेदयन्ति, इत्थं च भगवद्धर्मप्राप्त्युपायेष्वादरबोधनाद् भगवद्धर्मेष्वत्यादरो बोधितः श्रुतीनां ज्ञेयः, इत्थं च भगवद्धर्माणामवश्यकर्तव्यताबोधनात् तद्विरुद्धाकरणे प्रत्यवायाभावोपि श्रुत्यैव बोधित इति फलित, करणेपीत्यादि, श्रुत्या भगवद्धर्माणामनुष्ठेयानां परित्यागेन प्रत्यवायपरिहाराय कृतानां कर्मणां वैयर्थ्यात्, श्रुतिविरोधेन वैयर्थ्यात्, तदपरिहारात् कर्मणां वैयर्थ्ये प्रत्यवायस्याप्यपरिहार इत्यर्थः, एवं सति भगवद्धर्माणामवश्यानुष्ठेयत्वे सति, तेन प्रत्यवायकथनेन, अवकाशं प्राप्य भक्त्युपयोगिपदार्थाननुष्ठायोत्तरकालेवकाशं प्राप्येत्यर्थः, अकरणे नित्यकर्मणामकरणे, तथा प्रत्यवायसम्भव इत्यर्थः, तस्याशयः प्रत्यवायबोधकवाक्यानामाशय इत्यर्थ. ॥ ४० ॥

उपस्थितेतस्तद्वचनात् ॥ ४१ ॥ सूत्रावतरणमाहुर्नन्वित्यादिना, एवं श्रुतिभ्यां भगवद्धर्माणामवश्यानुष्ठेयत्वेन बोधने कृते तेषामनुष्ठाने कृत एव श्रौतकर्मणां सफलता नान्यथेत्येवं सतीत्यर्थः, कर्मोपयोगित्वं पूर्वाङ्गवत् कर्मणा साफल्याय कर्मोपयोगित्वमित्यर्थः, तयोः श्रौतभगवद्धर्मयोः, अत आदरादुक्तश्रुतिभ्यामादरात्, एवं सूत्रार्थेनैव सर्वं समाहितम् ॥ ४१ ॥ १४ ॥

इति तृतीयतृतीये चतुर्दशाधिकरणम् ॥ १४ ॥

---

१. विविक्तनेति सर्वनाशुद्धमपि । २. तदपरीहारात् कपुगो । ३. वत् लुप्तं क । ४. भक्तितज्ज्ञानयोः बपुंगो । ५. भक्तितज्ज्ञान° बपापुपुंगो । ६. °प्रबोधक° बैबगो । ७. लोपवचनाद् ब्रह्मकर्माङ्गत्वं गो ।

अथेदं विचार्यते पुरुषोत्तमविदः कर्म कर्तव्यं न वेति, तत्र मार्गत्रयफलात्मके तस्मिन्
सम्पन्ने पुनस्तस्य स्वतोपुरुषार्थस्य करणमप्रयोजकमिति न कर्तव्यमेवेति पूर्वः पक्षः, तत्र सिद्धान्त-
माह तन्निर्धारणेत्यादिना ।

तन्निर्धारणानियमस्तद्दृष्टेः पृथग्घ्यप्रतिबन्धः फलम् ॥ ४२ ॥ (३. ३. १५.)

अत्रेदमाकूतं, भक्तिमार्गे हि मर्यादापुष्टिभेदेनास्ति द्वैविध्यं, तत्र मर्यादायां पुष्टौ चतौ-
दृशस्य न कर्मकरणं सम्भवति, अत एव तैत्तिरीयकोपनिषत्सु पठ्यते "आनन्दं ब्रह्मणो विद्वान्
न बिभेति कुतश्चन इति" (तै. ब्रा.) इति, "एतꣳह वाव न तपति किमहꣳ साधु नाकरवं किमहं
पापमकरवम्" (तै. ब्र.) इति, श्रूयते चोभयविधानामपि कर्मकरणमम्बरीषोद्धवपाण्डवादीनां,
एवं सत्युभयविधानां मध्ये मम कर्मकरणे प्रभोरिच्छास्तीति यो निर्धारयति स करोति, य एत-
द्विपरीतं स न करोति यथा शुकजडादिः, एतन्निर्धारश्च भगवदधीनोतो भक्तेष्वपि तन्निर्धार-
णानियमोतः कर्म कर्तव्यमेवातन्निर्धारणे त्वाधुनिकानां, एवं सतीच्छाज्ञानवता तत्स-
न्देहवता च कर्म कर्तव्यमिति सिद्धं, तत्रोभयोः फलं वदन्नादावाद्यस्याह तद्दृष्टेस्तस्य
भगवदिच्छाया दृष्टिर्ज्ञानं यस्य स तथा तस्य, जीवकृतकर्मफलात् पृथग् भिन्नमीश्वरकृतकर्मणो
यत् फलं वेदमर्यादारक्षा लोकसङ्ग्रहश्च तत् फलमित्यर्थः, हिशब्देन "सक्ताः कर्मण्यविद्वांसो
यथा कुर्वन्ति भारत कुर्याद् विद्वांस्तथासक्तश्चिकीर्षुर्लोकसङ्ग्रहं" (श्रीमद्भग. ३. २५.) इति—
भगवद्वाक्यरूपोपपत्तिः सूचिता, द्वितीयस्य मध्यमाधिकारात् कालसङ्गादिजनितचित्तमालिन्येन
भगवत्सान्निध्ये प्रतिबन्धः स्यात् तन्निवृत्तिस्तत्कृतकर्मणः फलमित्यर्थः ।

अथवा पूर्वसूत्राभ्यां भगवद्धर्मकृतेरावश्यकत्वमुक्तं, सर्वात्मभाववतो "न ज्ञानं न च
वैराग्यं प्रायः श्रेयो भवेदिह" (श्रीमद्भाग. ११. १२. १४.) इतिभगवद्वचनाद् विधेयाभावाद-
सम्भवाच्च कर्मज्ञानयोर्विहितभक्तेश्च करणं न सम्भवतीति तस्य किं फलमित्याकाङ्क्षापूरणाय तदनु-
वदति तन्निर्धारणेत्यादिना, तस्मिन् धर्मिण्येव न तु धर्मेष्वपि दृष्टिर्यस्य स तथा, दृष्टिपदेन
ज्ञानमात्रमुच्यते, तेनान्यविषयकदर्शनश्रवणादिज्ञानाभाव उक्तो भवति, एतादृशस्य प्रभुसङ्ग-

---

तन्निर्धारणानियमस्तद्दृष्टेः पृथग्घ्यप्रतिबन्धः फलम् ॥ ४२ ॥ मार्गत्रयफलात्मके कर्मज्ञानभक्ति-
मार्गत्रयं तस्य फलात्मके, तस्मिन् पुरुषोत्तमज्ञाने, तस्य कर्मणः, एतादृशस्य भगवदानन्दानुभवकर्तुर्भक्तस्य,
अत एव तादृशभक्तयोः कर्मकरणस्यानावश्यकत्वादेव, उभयविधानां मर्यादापुष्टिभेदेन द्विविधानामपि भक्तानां,
एतद्विपरीतं कर्मकरणे भगवदिच्छाभावरूपं विपरीतं, तन्निर्धारणानियमो भगवदिच्छातदभावयोरनिर्णये
कर्मकरणतदभावयोरनिर्णयादनियमः, कर्तव्यमेवाकरणे प्रत्यवायश्रवणात्, पाक्षिकोपि दोषः परिहरणीय इति-
न्यायात् कर्म कर्तव्यमेवेत्यर्थः, अतन्निर्धारणे भगवदिच्छाया अनिर्धारणे, इच्छाज्ञानवता कर्म कर्तव्यमितीच्छा-
ज्ञानवता, तन्निर्धारणानियम इतिसूत्रभागं व्याख्याय तद्दृष्टेः पृथगितिसूत्रभागार्थमाहुस्तत्रेत्यादिना, आद्यस्य
कर्मकरणेच्छाज्ञानवतः, हिशब्देन सौत्रहिशब्देन, द्वितीयस्य करणाकरणविषयकभगवदिच्छाज्ञानरहितस्य,
तन्निवृत्तिः कालकृतप्रतिबन्धनिवृत्तिः, साधारणरीत्या सूत्रार्थं व्याख्यायासाधारणार्थं वक्तुं सूत्रस्यार्थान्तरमाहु-
रथवेत्यादि, आवश्यकत्वं श्रौतादिनित्यधर्मकरणापेक्षया भगवद्धर्माणामावश्यकत्वं, विधेयाभावाज् ज्ञान-
कर्मवैराग्यादिरूपविधेयाभावात्, असम्भवाच्च तस्य भक्तस्य ब्रह्मभावे पुरुषोत्तमातिरिक्तास्फूर्त्या विधेयसामान्यस्य
करणासम्भवाच्चेत्यर्थः, किं फलमेकस्यापि साधनस्याभावान्न किञ्चित् फलं भविष्यतीत्यर्थः, तदनुवदति
सूत्रकारस्तस्य किं फलमितिपूर्वपक्षं तन्निर्धारणानियम इतिसूत्रभागेनानुवदति, तद्दृष्टेरितिसूत्रभागस्यार्थमाहु-
स्तस्मिन्नित्यादिना, तथा तद्दृष्टिपदवाच्यः, एतादृशस्य पुरुषोत्तमातिरिक्ताकारशालिज्ञानसामान्यशून्यस्य, सङ्गमात्रं

---

१. पूर्वपक्षः कबपागो । २. कामसङ्गादि° घपा । ३. तन्निर्धारणेत्यादिना छसं पा । ४. सङ्गममात्रं सर्वत्र ।

मात्रमपेक्षितं भगवदुक्तं, तत्र स्वसङ्गमावधिकस्य भक्तस्य सङ्गमसमयनिर्धारो भवत्यतादृशस्य तस्य स नेति तन्निर्धारणानियमः, एतेन फलप्राप्तेः प्रागवस्थोक्ता भवति, फलस्वरूपमाह पृथक् फलमिति, अस्यानिर्वचनीयत्वादनुभवैकवेद्यत्वान्मोक्षान्तं यत् फलं शास्त्र उक्तं तस्माद् भिन्नमित्युक्तं, अन्यत्र हि धर्माणां साधनत्वं, यत्र फलमेव साधनं तत्फलस्यानिर्वाच्यता युक्तैवेति हिशब्देनाह, ज्ञानमोक्षादिना तद्भावाप्रतिबन्धश्च फलमित्यर्थः, प्रासङ्गिकमेतत् सूत्रम् ॥ ४२ ॥ १५ ॥

इति तृतीयाध्याये तृतीयपादे पञ्चदशं तन्निर्धारणाधिकरणम् ॥ १५ ॥

अथेदं विचार्यते, सर्वात्मभावो विहितकर्मज्ञानभक्तिसाध्यो न वेति, तत्र पुराणे "तस्मात् त्वमुद्धवोत्सृज्य" (भाग.११.१२.१४.) इत्युपक्रम्य "मामेकमेव शरणमात्मानं सर्वदेहिनां याहि सर्वात्मभावेन यास्यसे ह्यकुतोभयम्" (भाग ११. १२. १५.) इतिवाक्ये मुक्त्यात्मकाकुतोभयसाधनरूपशरणगमने प्रकारत्वेन सर्वात्मभावस्य कथनेन स्वप्रयत्नसाध्यत्वं गम्यतेतः साधनसाध्य इति पूर्वः पक्षः, तत्र सिद्धान्तं वक्तुं तदुपदेशस्वरूपमाह प्रदानवदिति ।

प्रदानवदेवं तदुक्तम् ॥ ४३ ॥ (३. ३. १६.)

यद्ययं साधनोपदेशः स्यात् तदा साधनत्वेन सर्वात्मभावेन शरणप्राप्तेः स्वकृतिसाध्यत्वं, नत्वेवं, किन्तु तदुक्तं भगवदुक्तं, प्रदानवत्, प्रकृष्टं दानं प्रदानं वरदानमिति यावत् तद्वदेवेत्यर्थः, वरेण हि स्वकृत्यसाध्यमपि सिध्यतीति तथा, शत्रुसंसारभयादिनापि शरणाप्तिर्भवति, तत्र न तस्याः पुरुषार्थत्वं किन्तु तन्निवृत्तेरेव, प्रकृतेपि सर्वात्मभावे स्वरूपप्राप्तिविलम्बासहिष्णुत्वेनार्त्यांर्तौ स्वरूपातिरिक्तास्फूर्त्या तद्भावस्याभाव्येन गुणगानादिसाधनेषु कृतेष्वप्यप्राप्तौ

रासलीलासम्बन्धिसङ्गमाग्रं, भगवदुक्त'मानन्दं ब्रह्मणो विद्वान् न बिभेति कुतश्चन' 'यास्यसे ह्यकुतोभय'मित्यादिना भगवदुक्तं, अतादृशस्य पुरुषोत्तमीयसर्वात्मभावशून्यस्य, स भगवत्प्राप्तिसमयनिर्धारः, नेति तन्निर्धारणानियम इतिसूत्रभागेनार्थं उक्त इत्यर्थः, एतेनोक्तरूपसूत्रभागार्थकरणेन, सौत्रपृथक्पदस्यार्थमाहुः फलमिति, अस्य सङ्गमरूपफलस्य, अनिर्वचनीयत्वाद् 'यतो वाचो निवर्तन्त' इत्यनेनानिर्वचनीयत्वोक्तेः, शास्त्र उक्तं गणितानन्दत्वेन शास्त्र उक्तं, भिन्नमगणितानन्दरूपं, अन्यत्रागणितानन्दफलातिरिक्तफले, फलमेव परमानन्दस्फूर्तिरेव, मोक्षादिनेत्यादिपदेन भेदेनानुभवाभावः, फलं सर्वात्मभावस्यार्थवशसम्पन्नं प्रासङ्गिकं फलमित्यर्थः, प्रासङ्गिकं नत्वधिकरणरूपमित्यर्थः ॥ ४२ ॥ १५ ॥

इति तृतीयतृतीये पञ्चदशाधिकरणम् ॥ १५ ॥

प्रदानवदेव तदुक्तम् ॥ ४३ ॥ पूर्वाधिकरणद्वयेन राजसभक्तानां कर्मासक्तिं वारयित्वोत्कृष्टभक्तेः फलं च प्रदर्श्येत.पर मुख्या भक्तिः केन साधनेन भवतीतिजिज्ञासायामिदमधिकरणमारभन्तेथेत्यादिना, सन्देहमुक्त्वा पूर्वपक्षमाहुस्तत्रेत्यादिना, 'तस्मात् त्वमुद्धवोत्सृज्य चोदनां प्रतिचोदनां मामेकमेव शरणमात्मानं सर्वदेहिनां याहि सर्वात्मभावेन यास्यसे ह्यकुतोभय'मितिवाक्य इत्यस्याग्रे कथनेनेत्यत्रान्वय., स्वप्रयत्नः शरणगमनानुकूलः स्वप्रयत्नः, तदुपदेशस्वरूपं सर्वात्मभावेन शरणगमनरूपोपदेशस्वरूपं, सूत्रार्थेन समाधानमाहुस्तदुक्तमिति, तदर्थो भगवदित्यादि, तथा सर्वात्मभावेन शरणगमनं स्वकृत्यसाध्यं, तन्निवृत्तेर्भयनिवृत्तेः फलत्वमित्यर्थ., प्रकृतेपि भजनानन्दानुभवार्थं सर्वात्मभावेन शरणगमनेपि, सर्वात्मभावे सिद्ध इत्यर्थ , तद्भावः सर्वात्मभावः, अप्राप्तौ

१. तत्र भगवदुक्तं सर्वत्र । २. एतादृशस्य कबपापुपुं । ३. °निर्णय. कै । ४. °भात्रो हि पुं । ५. °वदेव हि कै । ६. स्यात् स्यात् बप्रपागो । ७. साध्यत्वेन कै । ८. प्रदानं छुप्तं कैबपापु । ९. वरदानं छुप्तं कपु । १०. °सहार° कैबपापुंगोवि । ११. °प्राप्ति° पा । १२. असार्त्या बपागो ।

साशक्यत्वं ज्ञात्वा प्रभुमेव शरणं गच्छेति, एतच्च न स्वकृतिसाध्यमिति सुष्ठूक्तं प्रदानवदिति, भक्तस्येप्सितोऽर्थो हि वरो भवति, सर्वात्मभावस्यानुभवैकवेद्यत्वेन पूर्वमज्ञानेनेप्सितत्वासम्भवेपि स्वत एव कृपया दानमिति वदिदित्युक्तम्।

अथवा सर्वात्मभावेन मां याहीति सम्बन्धः।

यद्वा प्रदानवदित्यस्य पूर्ववदेव व्याकृतिः, तत्र साधनासाध्यत्वे प्रमाणमाह तदुक्तमिति, "नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन यमेवैष वृणुते तेन लभ्यः" (कठ. २. २२.) इतिश्रुत्या वरणातिरिक्तसाधनाप्राप्यत्वमुच्यत इति तत् तथैवेत्यर्थः, भगवदुक्ताकुतोभयपदस्य न मुक्तिरर्थः, किन्तु "यतो वाचः" (तै. ब्र.) इत्यादिनानन्दस्य स्वरूपमुक्त्वा "आनन्दं ब्रह्मणो विद्वान् न बिभेति कुतश्चन" (तै. ब्र.) इतिश्रुत्युक्तं यत् पूर्वोक्तैरसात्मकपुरुषोत्तमभजनानन्दानुभवोत्तरकालीन'मकुतोभयं' तदर्थः ॥ ४३ ॥ १६ ॥

इति तृतीयाध्याये तृतीयपादे षोडशं प्रदानवदित्यधिकरणम् ॥ १६ ॥

ननु प्रतिबन्धककालादृष्टादिसद्भावेपि वरणकार्यं स्यादुत तन्निवृत्ताविति संशये प्रतिबन्धकाभावस्य सर्वत्र हेतुत्वात् तन्निवृत्तावेव तथेति पूर्वपक्षे सिद्धान्तमाह लिङ्गेत्यादिना।

लिङ्गभूयस्त्वात् तद्धि बलीयस्तदपि ॥ ४४ ॥ (३. ३. १७.)

सामोपनिषत्सु नवमे प्रपाठके सनत्कुमारनारदसंवादे प्रथमत एव मुख्या ब्रह्मविद्योपदेशार्हो न भवतीति ज्ञात्वा सनत्कुमारो नारदाधिकारं च ज्ञातुं "यद् वेत्थ तेन मोपसीद" (छान्दो. ९. १. २.) इत्युक्तो नारदः स्वविदितमृग्वेदादिसर्पदेवजनविद्यान्तमुक्त्वा "सोहं भगवो मन्त्रविदेवास्मि" (छान्दो. ९.१.२.) इति स्वाधिकारमुक्त्वाह "नात्मविच्छ्रुत५ ह्येव मे भगवद्दृशेभ्यस्तरति शोकमात्मविदिति सोहं भगवः शोचामि तं मा भगवान् शोकस्य पारं तारयतु" (छान्दो. ९.१.३.) इति नारदेनोक्तः सनत्कुमारः पूर्वस्मात् पूर्वस्माद् भूयो वदेति पृष्टः, भूयःपद-

परमानन्दस्वरूपाप्राप्तौ, प्रदानवदिति पूर्वोक्तशरणगमनं वरप्रदानवदेवेत्यर्थः, सर्वात्मभावस्य फलोपहितसर्वात्मभावस्य, वदिदित्युक्तं फलसमानताप्रदर्शनं पूर्वदशायां कृतमित्यर्थः, *'याहि सर्वात्मभावेने'तिवाक्यस्यार्थमाहुरथवेत्यादिना*, 'शरण'मिति मामित्यस्य विशेषणं, पुराणवाक्यस्यात्र विषयत्वेनोपन्यासादेतद्विचारस्याश्रौतत्वशङ्का स्यादिति तन्निरासाय पूर्वोक्तसूत्रत्रयेपि विचारस्य श्रौतत्वप्रदर्शनायाहुर्यद्वेत्यादि, पूर्ववदेव वरदानार्थेनैव, तत्र वरदाने, तदुक्तं वरदानस्य स्वकृत्यसाध्यत्वमुक्तं, तत् तथैव सर्वात्मभावस्य साधनासाध्यत्वमुक्तं तद् यथार्थमेवेत्यर्थः, अकुतोभयं तदर्थो 'रसो वै सः' 'रस५ह्येवायं लब्ध्वानन्दी भवती'तिप्रभृतिश्रुत्युक्तं रसस्वरूपमेवाकुतोभयपदार्थ इत्यर्थः ॥ ४३ ॥ १६ ॥

॥ इति तृतीयतृतीये षोडशाधिकरणम् ॥ १६ ॥

लिङ्गभूयस्त्वात् तद्धि बलीयस्तदपि ॥४४॥ पूर्वाधिकरणे सर्वात्मभावरूपभक्तेर्वरणलभ्यत्वमुपपादितं, 'यमेवैष' इतिश्रुतौ तु परमात्मनो वरणैकलभ्यत्वं प्रतीयत इतिदूषणं समाधातुमधिकरणसूत्रमवतारयन्ति नन्वित्यादिना, उतेति संशयोल्लेखः, कालादृष्टस्वभावादिप्रतिबन्धकसद्भावे वरणकार्यसर्वात्मभावो भवति न वेतिसंशयस्वरूपं, तन्निवृत्ताविति प्रतिबन्धकाभावस्य कार्यसामान्यं प्रति कारणतायाः सर्वशास्त्रसम्मतत्वात् तन्निवृत्तावेवेत्यर्थः, तथा वरणेन सर्वात्मभावसिद्धिः, सिद्धान्तमाह सूत्रकारः सिद्धान्तमाहेत्यर्थः, सिद्धान्तप्रकारोपदर्शनमाहुः सामेत्यादिना, तथा च सामोपनिषत्सु वरणमेवासहायशूरतया सर्वात्मभावसम्पादकं सर्वात्मभाव एव च वरणस्य गमकं लिङ्गमिति सामोपनिषत्सिद्धान्तो बोध्य, संवादेऽधीहि भगव इति होपससाद सनत्कुमारं नारद इतिसंवादेऽधीहीति ण्यन्तः प्रयोगः, अध्यापयेत्यर्थः, प्रथमत एवाधिकारनिर्णयात् पूर्वमेव, यद् वेत्थेत्यादि, 'यद् वेत्थ तेन मोपसीद ततस्त ऊर्ध्वं वक्ष्यामीति होवाच' यत् त्वं जानासि तत्कथनेन मदुपसन्नो भवेति स्वाधीतं यद् ततोतिरिक्तं तुभ्यं कथयिष्यामीत्युक्तवान्, इत्युक्तो नारदः सनत्कुमारेणाज्ञप्तः, उक्त्वा ऋग्वेदादिपुराणान्तं स्वविदितं सर्वमुक्त्वा, नाहमात्मविदिति महापुरुषाणामाप्तानां वचसा स्वस्य शोकेन च ज्ञातं नाहमात्मविदिति, भगव इति सम्बोधनं, पूर्वस्मादि-

१. गच्छामः कैगो। २. न वदिति ख। ३. पूर्वोक्तं खपा। ४. इत्युक्तौ पुं। ५. विदितामृग्...विद्यां तमुक्त्वा क। ६. भगवतः कैगो प्रायः सर्वत्र। ७. शोचिमि ख। ८. मां खपा। ९. परं पारं पा।

माधिक्यार्थकं, नामवाङ्मनःसङ्कल्पचित्तध्यानविज्ञानबलान्नापस्तेजआकाशस्मराशाप्राणान् ब्रह्मत्वेनोपासनाविषयत्वेनोक्त्वा प्राणोपासकस्यातिवादित्वं सत्यवादित्वेनोक्त्वा विजिज्ञासितव्यत्वेन सत्यविज्ञानमतिश्रद्धानिष्ठाकृतिसुखानि पूर्वपूर्वकारणत्वेनोत्तरोत्तराण्युक्त्वा सुखस्वरूपजिज्ञासायामाह "यो वै भूमा तत् सुखम्" (छान्दो. ९. २३. १,) इति, भूम्नः स्वरूपजिज्ञासायामाह "यत्र नान्यत् पश्यति नान्यच्छृणोति नान्यद् विजानाति स भूमा" (छान्दो. ९. २४. १.) इति, एतेन सर्वात्मभावस्वरूपमेवोक्तं भवति, तत्र विरहभावेतिविगाढभावेन सर्वत्र तदेव स्फुरतीति "स एवाधस्तात्" (छान्दो. ९.२५.१.) इत्यादिनोक्त्वा कदाचित् स्वस्मिन्नेव भगवत्स्फूर्तिरपि भवतीत्य"थाहङ्कारादेशः" (छान्दो. ९. २५. १.) इत्यादिना तामुक्त्वैतेषां व्यभिचारिभावत्वेनानियतत्वं ज्ञापयितुं पुनः सर्वत्र भगवत्स्फूर्तिमाह "अथात आत्मादेश" (छान्दो. ९. २५. २.) इत्यादिना, ततः संयोगभावे सति पूर्वभावेन सर्वोपमर्दिना स्वप्राणादिसर्वतिरोधानेनाग्रिमलीलानुपयोगित्वं न शङ्कनीयं यतो भगवत एव सर्वसम्पत्तिरित्याशयेन "तस्य ह वा एतस्यैवं पश्यत:" इत्युपक्रम्या"त्मन एवेदꣳ सर्वम्" (छान्दो. ९.२६.१.) इत्युक्तवान्, ततः श्लोकैस्तद्भावस्वरूपमुक्त्वैतस्य मूलकारणमाहा"हारशुद्धौ" (छान्दो. ९. २६. २.) इत्यादिना, प्राणपोषको ह्याहारस्तस्य सदोषत्वे तु न किञ्चित् सिध्यति, एवं सति भगवदतिरिक्तस्य स्वतो निर्दोषत्वाभावाद् भगवानेव चेत् प्राणपोषको भवेत् तदा सर्वं सम्पद्यते, स च सर्वात्मभावे सत्येव

त्यादि, उत्तरोत्तरं स्वयं ज्ञानं बाहुल्येन वदेति सनत्कुमारेण नारदः पृष्ट इत्यर्थः, उपासनाविषयत्वेनोक्त्वा त्वया पूर्वोक्तानि यावन्ति तावन्ति नामोपासनाधिकरूपाणि भवन्तीत्युक्त्वेत्यर्थः, तथा च नाम भगवतः प्रसिद्धं, वाक् भगवच्चरित्रप्रतिपादिका, मनःपदेन भगवत्सम्बन्धिप्रभावानुकूलान्तःकरणव्यापारविशेषः, सङ्कल्पः कर्तव्यनिर्णयार्थमन्तःकरणीयव्यापारविशेषः, चित्तं भूतभविष्यवर्तमानस्वकृतिनिर्णायकोन्तःकरणीयवृत्तिविशेषः, ध्यानं निदिध्यासनं, ज्ञानं शास्त्रोक्तविशिष्टज्ञानं, बलमन्नभक्षणजं मनसो विज्ञेयविभावनसामर्थ्यं, अन्नमापस्तेजआकाशश्च प्रसिद्धः, स्मरः स्मरणमप्रयत्नश्चित्तव्यापारः, आशाप्राप्तार्थविषयिणी कामना, एषामुत्तरोत्तरमाधिक्येनोपासनामुक्त्वेत्यर्थः, सत्यवादित्वेनोक्त्वा पूर्वोपासकेभ्य उत्कृष्टत्वेनोक्त्वेत्यर्थः, सुखस्वरूपजिज्ञासायां नारदस्य सुखस्वरूपजिज्ञासायां, आह सनत्कुमार आह, एतेन स्वरतिविषयान्यस्यास्फूर्तिनिर्वचनेन, तामुक्त्वा स्वरतिविषयस्याहम्भावेन स्फूर्तिमुक्त्वेत्यर्थः, एतेषां 'नान्यत् पश्यति' सर्वत्र दिक्षु तमेव च पश्यतीत्यादिभावानां, आत्मादेशः भगवन्मात्रस्फूर्तिरित्यर्थः, ततः पूर्णविरहदशासम्पत्त्यनन्तर, अग्रिमलीलानुपयोगित्वं वरणसम्पादितविरहभावस्य द्वितीयदललीलानुपयोगित्वं, यतः वक्ष्यमाणोपपत्तितः, सर्वसम्पत्तिर्वरणविरहभावाग्रिमलीलोपयोगिदेहादिरक्षाणां सम्पत्तिः, तस्य ह वा एतस्य वरणेनोद्भवं प्रयुक्तसर्वात्मभावपूर्वकप्राप्तशरणभावस्य, एवं पश्यतः स्वे महिम्न्यक्षरे स्थितं भूमानं पश्यत', इदं सर्वं वरणादिसंयोगान्तं सर्वमित्यर्थः, ततो भगवत एव सर्वोपपत्तितः, तद्भावस्वरूपं भक्तभावस्य सर्वात्मभावरूपस्य स्वरूपं, एतस्य सर्वात्मभावस्य, श्लोकैरित्यग्रोक्ता. श्लोकास्तु 'न पश्यो मृत्युं पश्यति न रोगं नोत दुःखतां सर्वꣳ हि पश्यः पश्यति सर्वमाप्नोति सर्वश इति स एकधा भवति त्रिधा भवति पञ्चधा सप्तधा नवधा चैव पुनश्चैकादशः स्मृतः शतञ्च दश चैकश्च सहस्राणि च विंशतिराहारशुद्धौ सत्त्वशुद्धिः सत्त्वशुद्धौ ध्रुवा स्मृतिः स्मृतिप्रतिलम्भे सर्वग्रन्थीनां प्रविमोक्ष' इति, अर्थस्तु, पश्यो भूम्नः पुरुषोत्तमस्य द्रष्टा मृत्युप्रभृतीन् न पश्यतीत्यर्थः, सर्वꣳ हि पश्यः पश्यति पश्यः सर्वं भूमात्मकं पश्यति, इदमेव सर्वानिष्टनिवारणे हेतुरुक्तः, सर्वश इति सर्वदेशकालेष्वित्यर्थः, नानाप्रकारैराविर्भूय भूमा भक्तेष्टं साधयतीत्यादि,स भूमा,प्रतिलम्भे प्राप्तौ, सत्त्वशुद्धौ मूलकारणमाहारशुद्धिः,सा च 'त्वयोपभुक्तस्रग्गन्धवासोऽलङ्कारचर्चिताः उच्छिष्टभोजिनो दासास्तव मायां जयेमही'ति भगवद्दत्तप्रसादेन भवतीति बोध्यं,सर्वग्रन्थीनां प्रविमोक्ष इति,अविद्याकामकृतानां सर्वग्रन्थीनां प्रविमोक्षो ज्ञानिनोऽप्यपेक्षयोत्कृष्टो मोक्ष इत्यर्थः, पूर्वोक्तस्य सर्वस्य तात्पर्यमाहुरेवं सतीत्यादिना, एवं सति श्रुत्या वरणसर्वात्मभावात्मरक्षणादेः प्रतिपादने कृते सति, सर्वं सम्पद्यते वर-

१. अधिकार्थं बपा। २. जिज्ञासितव्येन कपुगो। ३. सुखरूप° के। ४. आत्मत. गो। ५. आहारः कपु। ६. स्वतिरिक्तस्य के।

भवति, स च तथा, तेन प्रकारेणेत्यर्थः, तद् वरणं विना न भवति, तथोक्तकार्यानुमेयमिति वरणलिङ्गं सर्वात्मभावस्तस्यैव भूयस्त्वात् सर्वतोधिकत्वात् तद् वरणमेव सर्वतः कालादेर्बलीय इत्यर्थः, यल्लिङ्गमेव सर्वतोधिकं तस्य तथात्वे किं वाच्यमितिकैमुतिकन्यायोपि सूचितः, ज्ञानमार्गीयज्ञानेन प्रतिबन्धशङ्कायामाह तदपीति, उक्तमिति शेषः, "अन्तरा भूतग्रामवत् स्वात्मनः" (ब्र. सू. ३. ३. ३५.) इतिसूत्रेण, तथोपपादितमस्माभिः ॥ ४४ ॥

तत्राह, नात्र वरणलिङ्गभूयस्त्वं निरूप्यते किन्त्वात्मज्ञानप्रकारविशेष एव, तथा हि, पूर्वप्रपाठक आत्मना सहाभेदः सर्वस्य निरूपितः श्वेतकेतूपाख्यानेन, अग्रिमे च "सोहं भगवो मन्त्रविदेवास्मि नात्मविद्" (छान्दो. ९. १. ३.) इत्यादिना नारदस्यात्मजिज्ञासैवोक्ता, एवं सत्युत्तरमपि तद्विषयकमेव भवितुमर्हत्यत आत्मप्रकरणत्वादुभयोः प्रपाठकयोः पूर्वस्मिन् यदभेद उक्तस्तस्यैव स्वरूप"मात्मन एवेद९ सर्वम्" (छान्दो. ९. २६. १.) इत्यन्तेनोक्तमिति पूर्वोक्तप्रकारादन्येन प्रकारेणात्माभेद एव सर्वस्योक्त इति तदेवाह ।

पूर्वविकल्पः प्रकरणात् स्यात् क्रियामानसवत् ॥ ४५ ॥

पूर्वस्य पूर्वप्रपाठकोक्तात्माभेदज्ञानस्य विकल्पः प्रकारभेद एवाग्रेपि निरूप्यते, तत्रोपपत्तिमाह प्रकरणादिति, एतच्चूपपादितं, अत्र सिद्धान्तिसम्मतमेव दृष्टान्तमाह तद्धृदयसंवादार्थं क्रिया मानसवदिति, यथा पूजनप्रकरणे बाह्यं तत्क्रियारूपमुच्यत आन्तरं तु मनोव्यापाररूपमुच्यते, न ह्येतावतान्यतरस्य तद्भिन्नत्वं वक्तुं शक्यं प्रकरणाभेदात् तथेहापीत्यर्थः ॥ ४५ ॥

णादिपुरुषोत्तमप्राप्त्यन्तं सर्वं सम्पद्यत इत्यर्थः, सूत्रार्थं वक्तुमाहुः स चेत्यादि, स च भगवतः प्राणपोषकभावश्च, स च सर्वात्मभावश्च, तेनेत्यादि, अनुग्रहेण यद् वरणं तत्प्रकारेणेत्यर्थः, तत् सर्वात्मभावरूपं कार्यं, तच्च वरणरूपं कारणं, उक्तकार्यानुमेयं सर्वात्मभावरूपकार्यानुमेयं, यल्लिङ्गं सर्वात्मभावरूपं वरणस्य लिङ्गं, तस्य वरणस्य, तथात्वे कालाद्यपेक्षया बलिष्ठत्वे, प्रतिबन्धशङ्कायां स्वात्मनि ब्रह्माभेदज्ञाने सति विरहभावस्यासम्भवेन प्रतिबन्धकत्वशङ्कायामित्यर्थः, उक्तमिति सूत्रेणेत्यनान्वेति, फलपूर्वदशायां विरहभावो भगवता सम्पाद्यते भजनानन्ददित्सायामिति स एव प्रतिबन्धं न करिष्यतीति तदधिकरण एव प्रपञ्चितमिति सा शङ्का तत एव निरस्ता बोध्या ॥ ४४ ॥

पूर्वविकल्पः प्रकरणात् स्यात् क्रियामानसवत् ॥ ४५ ॥ पूर्वोक्तसिद्धान्तं दृढीकर्तुं सूत्रकारः सूत्रद्वयेनाशङ्कते, तदवतारयन्ति तत्राहेत्याद्युक्तमित्यन्तेन ग्रन्थेन, तत्राह पूर्वप्रतिपादितेर्थे वादी पूर्वपक्षमाहेत्यर्थः, अत्र पूर्वसूत्रे निरूपित इत्यर्थः, अग्रिमे नारदोक्ते, तद्विषयकं सर्वस्मिन् ब्रह्माभेदविषयकं, पूर्वोक्तप्रकाराद् वरणादिसर्वात्मभावप्रकारात्, तदेवाहात्माभेदज्ञानमेवाह पूर्वविकल्पइतिसूत्रेण सूत्रकार आहेत्यर्थः, सूत्रार्थमाहुः पूर्वस्येत्यादिना, अग्रेपि नवमेस्मिन् प्रपाठकेपि, एतदभेदनिरूपणं, उपपादितमेतत्सूत्रावतरण एवोपपादितमित्यर्थः, सिद्धान्तिसम्मतं पूर्वपक्षे यः सिद्धान्ती तत्सम्मतमित्यर्थः, आह सूत्रकार आह, तद्धृदयसंवादार्थं वादिहृदयदृढीकरणार्थं, अन्यतरस्य बाह्याभ्यन्तरपूजनयोर्मध्य एकस्यापि, तद्भिन्नत्वं पूजनभिन्नत्वं, तथेत्यादि, यथा प्रकृतेपि पूर्वपूर्वकारणत्वेनोत्तरोत्तराणि मुक्तिसाधनत्वेनोक्त्वा 'यो वै भूमा तत् सुख'मित्यनेनापि साधनान्येवोक्तानि 'नान्यत् पश्यती'त्यादिकमपि मुक्तिदशाप्रतिपादनमेव न तु भगवदभिमतविरहसर्वात्मभावप्रतिपादनमित्यर्थः ॥ ४५ ॥

---

१. तेन...त्यर्थः लुप्तं कैबप्रपा । २. अत्राह कपुपुं । ३. प्रकारादन्येन लुप्तं बेंगो । ४. इति लुप्तं पा । ५. एतदे° पुं । ६. सिद्धान्त° पपुगो । ७. एष लुप्तं पा ।

अतिदेशाच्च ॥ ४६ ॥

नामरूपात्मकं हि जगत्, तत् पूर्वं 'सर्व' शब्देनानूद्य तस्मिन् ब्रह्माभेदो त्वंगादिविद्या अनूद्य नामात्मकब्रह्मत्वं तत्रातिदिश्यते "नामैवतद्नामोपास्व" (छा. ९. १. ४.) इति, इतोपि हेतोर्ज्ञानप्रकारभेद एवाग्रे निरूप्यत इत्यर्थः ॥ ४६ ॥

विद्यैव तु निर्धारणात् ॥ ४७ ॥

तुशब्दः पूर्वपक्षं व्यावर्तयति, यदुक्तं सनत्कुमारनारदसंवादे ज्ञानप्रकारविशेष निरूप्यत इति तन्न, किन्तु विद्यैव निरूप्यत इति, अत्रेदमाकूतं, 'नायमात्मा' (कठ. २. २३, मुण्ड. ३. ३.) इतिश्रुतिरितरसाधननिषेधपूर्वकं वरणस्य साधनत्वमुक्त्वा वृतलभ्यते हेतुत्वं वद वरणविषयमप्याह "तस्यैष आत्मा वृणुते तनुं स्वा"मिति, 'तस्य' वृतस्यात्मन 'एष' भगवान् 'आत्मा', अत एव तत्तनूरूपः स जीवात्मा, तद्वरणस्यावश्यकत्वज्ञापनाय 'स्वाम्' इति, सर्वो हि स्वकीयां तनुमात्मीयत्वेनात्मत्वेन च वृणुते, तद्विशिष्ट एव भोगान् भुङ्क्ते, अत एव तैत्तिरीयकोपनिषत्स्वपि "ब्रह्मविदाप्नोति परम्" (तै. ब्र.) इति सामान्यतो ब्रह्मविदः परब्रह्मप्राप्तिमुक्त्वाग्रिमर्चा विशेषतो वदन् "सत्यं ज्ञानमनन्तं ब्रह्म" (तै. ब्र.) इति परब्रह्मस्वरूपमुक्त्वा "यो वेद निहितं गुहायां परमे व्योमन् सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिता" (तै. ब्र.) इत्युक्तं, एतद्यथा तथानन्दमयाधिकरणे प्रपञ्चितमस्माभिः।

किञ्च पुरुषोत्तमलाभहेतुभूतं तु भक्तिमार्गे यद् वरणं स्वीयत्वेनाङ्गीकाररूपं तदेव न त्वन्यादृशमपीतिज्ञापनायाग्रे वदति "नायमात्मा बलहीनेन लभ्यः" (मुण्ड. ३. ४.) इति,

---

अतिदेशाच्च ॥ ४६ ॥ तत् पूर्वं नामरूपात्मकं जगत् पूर्वप्रपाठके, सर्वशब्देनानूद्येति 'तदात्म्यमिदं सर्व'मिति सर्वशब्देनानूद्य, अग्रे त्वस्मिन् प्रपाठके तु, त्वगादिविद्या नारदोक्तर्गादिविद्याः, इतोपि हेतो रूपात्मकप्रपञ्चे ब्रह्माभेदस्तद्वदतिदेशस्य नामप्रपञ्चे ब्रह्माभेदस्य कृतत्वाद्धेतोरित्यर्थः, तथा चास्मिन् प्रपाठके ज्ञानप्रकार एव निरूप्यते न तु भवदभिमतभक्तिप्रकार इत्यर्थः ॥ ४६ ॥

विद्यैव तु निर्धारणात् ॥ ४७ ॥ विद्यैव सर्वात्मभावस्वरूपज्ञानविशेषिका विद्यैवेत्यर्थः, निरूप्यते द्वितीयप्रपाठके निरूप्यते न तु मोक्षोपयोगिज्ञानरूपेत्यर्थः, विद्यापदेन सर्वात्मभावरूपज्ञानविशेष एवेति नियमस्य नियमनिर्वाहाय प्रकृतश्रुतीनां वरणश्रुत्येकवाक्यतया तात्पर्यनिर्वाहाय वरणश्रुतिं व्याकर्तुमाहुरत्रेत्यादि, नायमात्मेतिश्रुतिरिति, 'नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन यमेवैष वृणुते तेन लभ्य' इति, वरणविषयो भक्तजीवः, 'तस्यैष आत्मा वृणुते तनुं स्वा'मिति, मुण्डके कठवल्ल्यां चैतच्छ्रुतिद्वयमस्ति, तस्य वृतभक्तजीवस्य, एष पुरुषोत्तमः, स जीवः पुरुषोत्तमस्य तनुरूपः, वरणं च भोगार्थं, तनुविशिष्टस्यैवात्मनः सर्वत्र भोगदर्शनात्, अत एव यतस्तज्जीवस्य भगवानात्मातस्तस्य तनुरूपत्वमित्यर्थः, ननु माध्यन्दिनान्तर्यामिब्राह्मणे 'यस्यात्मे'त्यनेन सर्वजीवानां भगवच्छरीरत्वश्रवणात् कथमेकान्ततो वृतजीवस्यैव तच्छरीरत्वमित्यत आहुस्तद्वरणस्येत्यादि, तथा च 'य आत्मानमन्तरो यमयती'तिविशेषश्रावणाद् 'यमात्मा न वेदे'त्यनेन ज्ञाननिवृत्तेश्च भक्तजीवस्यैव वरणावश्यकत्वमन्यथा पूर्वार्धेव 'नायमात्मे'त्यादिना साधनालभ्यत्वोक्तिरनुपपन्ना स्याद्, भक्तभिन्नानां साधनेन मुक्तिलाभस्य श्रुतिसिद्धत्वात्, तस्मात् स[illegible]रूपो भगवान् भक्तानामेव वरणेनैव लभ्य इति तस्यैव वरणावश्यकतेति श्रुतिसिद्धं, अत एव वरणस्य

---

१. अधिकाथ[illegible] २. अग्रे तत् कै। ३. तत्रातिदिश्यते कपुगो। ४. तत्रेद° पुं। ५. साधनमुक्त्वा पा। ६. सत्यतिरिक्तस्य कै। ७. [illegible] ८. °रीयोप° पुं। ९. विशेषतोवदत् बगो।

र्यं हि प्रभुवशीकरणं, तच्चा"हं भक्तपराधीनः" (भाग. ९. ४. ६३.) "वशे कुर्वन्ति ग" (भाग. ९. ४. ६६.) इत्यादिवाक्यै"र्भक्त्यैवे"ति 'बल'शब्देन भक्तिरुच्यते, पूर्ववाक्य एवेतरनिषेधस्य कृतत्वात् पुनर्बलाभावेनिषेधं न कुर्यात्, वरणमात्रस्य हेतु- ो बलस्य तथात्वं चे न वदेत्, एतादृशस्य हृदि भगवत्प्राकट्यं भवतीत्याह "एतैरुपायै- स्तु विद्वांस्तस्यैष आत्मा विशते ब्रह्मधाम" (मुण्ड. ३. २. ४.) इति, अस्यार्थ'स्तस्यैष त्मनोप्यात्मा पुरुषोत्तमो 'ब्रह्म'क्षरब्रह्मात्मकं 'धाम विशत'इति, 'धाम'पदं पुरुषोत्तमस्या- । सहजं स्थानमितिज्ञापनार्थमुक्तं, अन्यथा न वदेत्, तेन तद्धृदये स्वस्थानमाविर्भाव- स्वयं तत्र प्रकटीभवतीति ज्ञाप्यते, प्रकृते श्वेतकेतूपाख्याने परोक्षवादेन ब्रह्माभेदबोध- ुरुषोत्तमाधिष्ठानत्वयोग्यता ज्ञाप्यते, अग्रे तु न ह्येतावतैवाधिष्ठानात्मकाक्षराविर्भावो पुरुषोत्तमस्य वा-तथा सति ज्ञानिनां सर्वेषां परप्राप्तिः स्यात्, नत्वेवं, "भक्त्याहमेकया . (भाग. ११. २४. ११.) इत्यादिवाक्यैः-किन्तु भगवदनुग्रहेण भक्तसङ्गेन च भक्तौ प्रेतिज्ञापनाय भक्त एव तद्बोधाधिकारीत्यपि ज्ञापयितुं भक्तस्य नारदस्य भगवदावेशयुक्तस्य मारस्य च संवाद उक्तः, त'त्रात्म'शब्देन पुरुषोत्तम उच्यते, भक्तिमार्गे तु निरुपधि- पयः स एव यतः, स तु सर्वात्मभावैकसमधिगम्य इति सर्वात्मभाव एव विद्या— ोच्यते, परमकाष्ठापन्नं यद् वस्तु तदेव हि वेदान्तेषु मुख्यत्वेन प्रतिपाद्यं, अक्षरब्रह्मादिकं भूतिरूपत्वेन तदुपयोगित्वेन मध्यमाधिकारिफलत्वेन च प्रतिपाद्यते, तेन तत्र विद्या- योग औपचारिकः, सर्वात्मभाव एव मुख्यः, युक्तं चैतत्, अक्षरविषयिण्या विद्यायाः स- त् तत उत्तमविषयिण्यास्तस्या उत्तमत्वं, एवं सति पूर्वप्रपाठकस्याक्षरप्रकरणत्वादुत्तरस्य पुरु- प्रकरणत्वात् त्वद्धेत्वसिद्धित्वादुक्तन्यायेन विद्यैवाग्रिमप्रपाठके निरूप्यते न तु पूर्वो- ज्ञानप्रकारविशेषः, अत्र हेतुमाह निर्धारणादिति, "सुखं त्वेव विजिज्ञासितव्यम्" दो. ९.२२.१.) इत्युक्त्वा सुखस्वरूपमाह "यो वै भूमा तत् सुखं नाल्पे सुखमस्ति भूमैव सुखं त्वेव विजिज्ञासितव्यः" (छान्दो.९.२३.१.) इति, अक्षरपर्यन्तं गणितानन्दत्वात् पुरुषोत्तम-

---

ा सह सर्वभोगार्थत्वादेव, अन्यादृशं भगवतोन्त स्थितत्वमात्ररूपं, अन्यथा 'नायमात्मा बलहीनेन लभ्य' पपन्नं स्याद् बलस्य भगवद्वशीकरणहेतोर्भक्तिभिन्नस्यासत्त्वात्, पूर्ववाक्ये 'नायमात्मे'तिश्रुतौ, बलस्य तथात्वं प्राप्त्यभावप्रयोजकाभावप्रतियोगित्वं बलस्य न वदेदित्यर्थः, तथा च वरणलभ्यभक्त्यैव पुरुषोत्तमलाभः, त्तमस्वरूपं तु 'ब्रह्मविदाप्नोति पर'मिति तैत्तिरीयक उक्तं, प्रथममुण्डकेपि 'यत् तदद्रेश्यमग्राह्य'मित्यादिना सर्व- त्वेनाक्षरं स्तुतं, द्वितीयमुण्डके 'सुदीप्तात् पावका'दित्यादिना सजातीयविजातीयकार्यजनकत्वमुक्त्वा 'दिव्यो : पुरुषः स बाह्याभ्यन्तरो ह्यजः अप्राणो ह्यमनाः शुभ्रोक्षरात् परतः पर' इत्यनेनाक्षरभिन्नत्वेन निरूपितं सोर्थः, भेदबोधनेनाक्षरब्रह्माभेदस्य प्रथमप्रपाठके बोधनेन, एतावतैवाक्षराभेदग्रहमात्रेणैव, तथा सत्यक्षराभेद- प्रेणाविर्भावे सति, सत्सङ्गेन नारदस्य सनत्कुमारसङ्गेन, तद्बोधाधिकारी सनत्कुमारोक्तोपदेशाधिकारी, भयोः संवादे, स एव पुरुषोत्तम एव, सर्वात्मभाव एवेति, एवकारेणाक्षराभेदनिरासः, तद्विभूतित्वेन समविभूतित्वेन प्रतिपाद्यत इत्यर्थः, तदुपेत्यादि, तथाक्षरस्य वेदान्तेषूपपादनं परप्राप्त्युपयोगित्वेन मध्य- कारिफलार्थं वा न तु सर्वोत्तमत्वेनेत्यर्थः, औपचारिकः परम्परया विद्यासाधके लाक्षणिक इत्यर्थः,त्वद्धेत्वसिद्धिः ऽद्वयस्यापि भिन्नप्रकरणत्वाद् वायुक्तप्रकरणे त्वद्धेतोरसिद्धिरित्यर्थः, विद्यैव सर्वात्मभावरूपा विद्यैव, अत्र त्तमस्य सर्वात्मभावस्य विद्यात्वे, आह सूत्रकार आहेत्यर्थः, हेतुं निरूपयन्ति सुखं त्वेवेत्यादिना, तथा च पूर्वं व सौम्ये'त्यादिनाक्षराभेदज्ञानमुक्तमस्मिन् प्रपाठके तु निरवध्यानन्दरूपमुच्यत इति स्फुटः प्रकरणभेदः, भूमा

---

१. निषेधनं कैगो। २. °मुक्त्वा पा। अशुद्धम्। ३. च लुप्तं कपु। ४. आत्मपुरुषोत्तम. कपु। ५. इति गो। ६. ज्ञायते कपुगो। ७. तु लुप्तं कपुं। ८. तद्धेत्व° कगो। ९. अपूर्वो° कैगो।

सैवानन्दमयत्वेन निरवधिसुखात्मकत्वात् स एव भूमा तस्यैव विजिज्ञासितव्यत्वेन निर्धारणा दित्यर्थः, भूम्नो लक्षणमग्र उच्यते "यत्र नान्यत् पश्यति" (छान्दो. ९. २४. १.) इत्यादिना, यस्मिन् ज्ञाते सति 'नान्यत् पश्यती'त्यर्थः, तथा सति सर्वात्मभाववतः प्रभुदर्शने सत्यपि लीलोपयोगिवस्तुदर्शनादिकमनुपपन्नमितिशङ्का तु "तस्य ह वा एतस्यैवं पश्यत एवं मन्वान स्यैवं विजानत आत्मनः प्राणाः" (छान्दो. ९. २६. १.) इत्यादिना निरस्ता वेदितव्या, तैः सह लीलां चिकीर्षतः प्रभुत एव सर्वं सम्पद्यते न तु भक्तसामर्थ्येनेतिभावेन तदुक्तेः ॥ ४७ ॥

दर्शनाच्च ॥ ४८ ॥

दृश्यते च सर्वात्मभाववतां भक्तानां व्रजसीमन्तिनीप्रभृतीनां पूर्वमितरविस्मृतिर्भगवत्स्पर्शादिनाग्रे सर्वसामर्थ्यमिति व्यासः स्वानुभवं प्रमाणत्वेनाह, उक्तं च श्रीभागवते ताभिरेव "चित्तं सुखेन भवतापहृतं गृहेषु यन्निर्विशत्युत करावपि गृह्यकृत्ये पादौ पदं न चलतस्तव" (श्रीमद्भाग. १०. २९. ३४.) इत्यादिना, तेन ज्ञानशक्तिक्रियाशक्तितिरोधानमुक्तं भवति, अग्रे तदाविर्भावादिकं स्फुटमेव ॥ ४८ ॥

ननु सनत्कुमारनारदसंवादात्मकमान्तमेकवाक्यं, तत्रोपक्रमे "मन्त्रविदेवास्मि नात्मविच्छ्रुतꣳह्येव मे भगवद्दृशेभ्यस्तरति शोकमात्मविदिति सोऽहं भगवः शोचामि" (छान्दो. ९. १. ३.) इत्यादिना स्वात्मज्ञानस्यैवोपक्रमादुपसंहारोऽपि तमादायैवोचितः, अग्रे चे'दात्म' पदानामीश्वरपरत्वं स्याद् वाक्यभेद उपक्रमविरोधश्च स्यात्, तस्माद् वाक्यानुरोधात् पूर्वज्ञानप्रकारविशेष एवायमिति मन्तव्यमित्यत उत्तरं पठति ।

श्रुत्यादिबलीयस्त्वाच्च न बाधः ॥ ४९ ॥

नैवं वाक्यानुरोधाद् वरणजसर्वात्मभावलिङ्गभूयस्त्वं बाधितव्यं, वाक्यापेक्षया श्रुतिलिङ्गयोर्बलीयस्त्वात्, एतद्बलीयस्त्वं तु "श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्यम्" (जै. सू. ३. ३. १३.) इतिजैमिनीयसूत्रे सिद्धं, प्रकृत इतरसाधननिषेधपूर्वकं "यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा वृणुते तनुं स्वाम्" (मुण्ड. ३. २. ३.) इतिश्रुतिर्वरणमात्रलभ्यत्वमाह, एतदग्रे च "नायमात्मा बलहीनेन लभ्य" (मुण्ड. ३. २. ३.) इत्युपक्रम्यै "तैरुपायैर्यतते यस्तु विद्वांस्तस्यैष आत्मा विशते ब्रह्मधाम" (मुण्ड. ३. २. ४.) इतिश्रुतिः पठ्यते, एतच्च "विद्यैव तु निर्धारणात्" (ब्र. सू. ३. ३. ४७.) इत्यत्र निरूपितं, अपरं च

गणनाशून्यः, अल्पे गणितानन्दे, ननु भूम्नो ज्ञानस्य सर्वात्मभावरूपत्वे किं नियामकमत आहुर्भूम्न इत्यादि, 'नान्यत् पश्यती'त्यादि सर्वात्मभावस्वरूपम् ॥ ४७ ॥

दर्शनाच्च ॥ ४८ ॥ शब्देनान्यादर्शनं साधयित्वा स्वप्रत्यक्षेण समाधिरूपेणान्यादर्शनं साधयतीत्याशयेनाहुर्दृश्यत इत्यादि ॥ ४८ ॥

श्रुत्यादिबलीयस्त्वाच्च न बाधः ॥ ४९ ॥ आन्तं समाप्तिपर्यन्तं, एकवाक्यं एकार्थकं विभागे साकाङ्क्षं चेत्यर्थः, स्वात्मज्ञानस्य स्वात्मनाक्षराभेदज्ञानस्य, तमुपक्रमं, अग्रे द्वितीयप्रपाठके, ईश्वरपरत्वमक्षरात् परब्रह्मपरत्वं, सूत्रमवतारयन्ति नैवमित्यादि, वाक्यानुरोधात् वाक्यप्रमाणानुरोधादित्यर्थः, वरणजं श्रुतिप्रमाणबोधितं यद् वरणं तज्जमित्यर्थः, श्रुतिभिर्लिङ्गभूयस्त्वं प्रकटं प्रदर्शयन्ति प्रकृत इत्यादिना, एतच्च वरणमारभ्यात्मप्रवेशपर्यन्तमुक्तं चेत्यर्थः, इत्यत्रेति सूत्रव्याख्याने, अपरं च विशेषतः पुरुषोत्तमविद्यानिर्णायकं चेत्यर्थः, अग्र उच्यत इतिशेषः,

---

१. जिज्ञासि॰ पा । २. तद्भूम्नः पु । ३. तव लुप्तं वपागो, पादमूलमधिकं पु । ४. ॰कं मान्तं क, आन्तं लुप्तं कैवपागो, ॰मेव दापु । ५. ॰वं कैवपुगो । ६. ते वगो । ७. बाधा कैपुपुगो । ८. वरणेन कैवपागो । ९. पर॰ कपु ।

"नात्मवित् तरति शोकमात्मवित्" (छान्दो. ९. १. ३.) इतिनारदवाक्यानुवादयो'रात्म'पदमुत्तम-[1]श्रोत्मकेन लिङ्गेन पुरुषोत्तमपरमिति ज्ञायते, स हि सर्वेभ्य उत्तमोतो 'ब्रह्मे'त्युपास्यत्वेन सनत्कुमारोक्तं [2]प्रतिरूपं तत'स्ततो भूयोस्ती'त्यपृच्छत्, अन्ते सर्वाधिकत्वेन सुखात्मकत्वेन भूमानं श्रुत्वा तथा नापृच्छत् किन्तु तत्प्राप्त्यर्थमत्यार्त्या[3] "कस्मिन् प्रतिष्ठितः" (छान्दो. ९.२४.१.) इत्यपृच्छत्, तदा सर्वात्मभाववत्स्वेव प्रतिष्ठित इत्याशयेन सर्वात्मभावलिङ्गात्मकं भावं "स एवाधस्तात्" (छान्दो. ९. २५. २५.) इत्यादिनोक्तवान् ॥ ४९ ॥

न[4]न्वेतया श्रुत्या न सर्वात्मभावलिङ्गात्मको भाव उच्यते किन्तु व्यापकत्वेन सर्वरूपत्वेन स्वभिन्नाधिकरणाभावादन्यत्राप्रतिष्ठितत्वमेवोच्यत इत्यत उत्तरं पठति ।

अनुबन्धादिभ्यः प्रज्ञान्तरपृथक्त्ववद् दृष्टश्च तदुक्तम् ॥ ५० ॥

भूमस्वरूपं श्रुत्वा "स भगवः कस्मिन् प्रतिष्ठितः" (छान्दो. ९. २४. १.) इतिप्रश्ने "स्वे महिम्नि" (छान्दो. ९. २४. १.) इत्युत्तरं, तदर्थस्तु स्वीयत्वेन वृते भक्ते यो 'महिम'रूपः सर्वात्मभावस्तस्मिन्निति स्वरूपात्मके महिम्नीति वा भगवदात्मकत्वात् सर्वात्मभावस्य, तदितरस्य साक्षात् पुरुषोत्तमाप्रापकत्वादस्यैव तत्प्रापकत्वात् परमकाष्ठापन्नमहिम[5]रूपोयमेव भाव इति महिमशब्देनोच्यते, स तु विप्रयोगभावोदये सत्येव सम्यग् ज्ञातो भवति व्यभिचारिभावैः, ते त्वनियतस्वभावा इति ज्ञापयितुं त्रिविधाः "स एवाधस्तात्" (छान्दो.९.२५.१.) इत्यादिना "स्मै-वेद५ँसर्वम्" (छान्दो. ९. २६. १.) इत्यन्तेन निरूप्य भूमप्रतिष्ठाधिकरणप्रश्ने यदुत्त[6]रितं "स्वे महिम्नि" (छान्दो. ९. २४. १.) इति तमेवानुबध्नाति "स वा एषः" (छान्दो. ९. २५. २.) इत्यनेन, 'त'च्छब्दस्य पूर्वपरामर्शित्वात्, एवं सति त्वदुक्तमन्यत्राप्रतिष्ठितत्वं चेदिह प्रतिपाद्यं स्यात् तदोक्त-

---

'नात्मवित् तरति शोकमात्मवित्', अत्र जीवात्मनो दुःखित्वादक्षरात्मनश्च गणितानन्दत्वादेतदुभयस्मादुत्तमात्मज्ञानादेव शोकतरणमितिश्रुत्यर्थः, नारदवाक्यानुवादयोरात्मपदमिति, 'नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा वृणुते तनुं स्वां' 'नायमात्मा बलहीनेन लभ्य'इत्युपक्र'म्यैतैरु-पायैर्यतते यस्तु विद्वांस्तस्यैष आत्मा विशते ब्रह्मधामे'तिश्रुतिसमुदायरूप एकोनुवादः, द्वितीयस्तु 'नात्मवित् तरति शोक'मितिश्रुतिरूपः, एतयोरनुवादयोरात्मपदमित्यर्थः, लिङ्गेन उक्तश्रुतिसमुदायेन पुरुषोत्तमरूपबोधकलिङ्गेने-त्यर्थः, प्रतिरूपमुक्तापेक्षयोत्तरोत्तरमधिकमित्यर्थः, तथा नापृच्छदितोप्यग्रे भूयोस्तीति नापृच्छदित्यर्थः, इत्यादि-नोक्तवान् भक्तानां सर्वेदिक्षु पुरुषोत्तमभानात् सर्वात्मभावमेव सनत्कुमारो नारदं प्रत्युक्तवानित्यर्थः ॥ ४९ ॥

अनुबन्धादिभ्यः प्रज्ञान्तरपृथक्त्ववत् दृष्टश्च तदुक्तम् ॥ ५० ॥ अग्रिमसूत्रमवतारयन्ति नन्वित्या-दिना, एतया श्रुत्या 'स एवाधस्तादि'त्यादिनारभ्या'स्मैवेदं सर्वं'मित्यन्तेनोक्तद्वितीयप्रश्नश्रुत्या, अन्यत्र स्वात्मक-स्वमहिम्नि, उच्यते स भूमा 'कस्मिन् प्रतिष्ठित' इतिप्रश्ने 'स्वे महिम्नि प्रतिष्ठित' इत्युत्तरं श्रुत्योच्यत इत्यर्थः । तदर्थस्तु 'स्वे महिम्नि प्रतिष्ठित' इतिश्रुत्यर्थस्तु, 'स्व'पदस्यात्मीयरूपमर्थमादावुक्त्वात्मरूपार्थपरतया व्याख्यानमाहुः स्वरूपात्मक इति, तदितरस्य पूर्वोक्तसर्वात्मभावभिन्नस्याक्षराभेदज्ञानस्य, 'ब्रह्मविदाप्नोति पर'मितिश्रुत्याक्षराभेद-ज्ञानस्याप्यन्तःकरणशोधनद्वारा पुरुषोत्तमप्रापकत्वात्, साक्षादिति, अयमेव 'स एवाधस्ता'दित्यादिश्रुत्युक्तः पुरु-षोत्तमसर्वात्मभाव एव 'ता नाविदन् मय्यनुषङ्गबद्धधियः स्वमात्मानमदस्तथेद'मित्यादिस्वरूपः, ते व्यभिचारिभावाः त्रिविधास्तिस्रो विधास्तदादेशाहङ्कारादेशात्मादेशरूपा ज्ञापका यस्येत्यर्थः, ताश्च तिस्रो विधा 'जातोहं खलानां ननु दण्डधृक्' 'कस्याश्चित् पूतनायन्त्या' इत्याद्युदाहरणेषु सर्वेषु च द्रष्टव्याः, 'स्वे महिम्नी'तीति, 'स्वे महिम्नी'ति-श्रुत्या कृत्वा, तमेव पूर्वोक्तसर्वात्मभावमेव, अनुबध्नाति सर्वात्मभाववद्भक्ते नियमयति, भक्तसर्वात्मभावनियामकत्वं पूर्वश्रुतेरस्ति, तत्र प्रमाणमाहुः 'स वा एष' इत्यादिना 'स वा एष एवं पश्यन्नि'त्यत्र शब्दस्य पूर्वोक्तसर्वात्मभाव-

---

१. प्रशातमकत्वेन कपु । २. °क्तं कपु । ३. अत्यार्तौ ? क । ४. न त्वे° क । ५. महित्व° कवपुपुंगो, महिमत्व° पा । ६. °त्तरं वैगो ।

रीत्यानुयन्धं न कुर्यादहङ्कारादेशादिकं च न कुर्यादुक्तप्रश्नोत्तरं स्वान्यवस्त्वभावान्न क्वापीत्येव वदेत्, तस्मादसदुक्त एव मार्गोनुसर्तव्यः, आदिपदात् त्रिविधा ये भावा उक्तास्तेषामपि स्वरूप"मेवं पश्यन्नेवं मन्वान एवं विजानन्" (छान्दो. ९. २५. २.) इतिक्रमेण यन्निरूपितं तदुच्यते, पूर्वं रतिविगाढभावेन तदितरास्फूर्त्या तमेव सर्वत्र पश्यति, एतदेवोक्त"मेवं पश्य"न्नित्यनेन, ततः किञ्चिद्बाह्यानुसन्धानेहङ्कारादेशो भवति, स त्वहमेव सर्वतः स्वकृतिसामर्थ्येन तं प्रकटीकरिष्य इति मनुते, करोति च तथा, अत एवान्वेषणगुणगाने कृते ताभिः, एतदेवोक्त'मेवं मन्वान' इत्यनेन, ततो निरुपधिस्नेहविषयः पुरुषोत्तम 'आत्म'शब्देनोच्यत इति तदादेशो भवति, तदा पूर्वकृतस्वसाधनवैफल्यज्ञानेनातिदैन्ययुक्तसहजस्नेहजविविधभाववान् भवति, तदेवदुक्त'मेवं विजान'न्नित्यनेन, अत एवोपसर्ग उक्तः, ततोतिदैन्येनाविर्भावे सति या अवस्थास्ता निरूपिता 'आत्मरति'रित्यादिना, अत्रा'त्म'शब्दाः पुरुषोत्तमवाचका ज्ञेयाः, अन्यथौपचारिकत्वं स्यात्, मुख्ये सम्भवति तस्यायुक्तत्वात्, ननु सर्वात्मभावस्यापि मुक्तौ पर्यवसानमुत नेतिसंशयनिरासाय दृष्टान्तमाह प्रज्ञान्तरपृथक्त्ववदिति, मुमुक्षुभक्तस्य स्वेष्टदातृत्वेन भगवद्विषयिणी या प्रज्ञा सा सर्वात्मभाववद्भक्तप्रज्ञातः प्रज्ञान्तरमित्युच्यते, तच्च कर्मज्ञानतदितरभक्तप्रज्ञाभ्यः पार्थक्येन तदिष्टमेव साधयति यथा तथा सर्वात्मभाववतो भक्तस्य यत्प्रकारिका भगवद्विषयिणी प्रज्ञा तमेव प्रकारं स भावः साधयति नान्यमिति न मुक्तौ पर्यवसानमित्यर्थः, अत्र व्यासः स्वानुभवं प्रमाणत्वेनाह दृष्टश्चेति, उक्तभाववतो भक्तस्य प्रभुस्वरूपदर्शनाद्यतिरिक्तफलाभावोस्माभिरेव दृष्ट इत्यर्थः, एतादृशा अनेके दृष्टा इति नैकस्य नाम गृहीतं, अत्र शब्दमपि प्रमाणमाह तदुक्तमिति, भगवतेतिशेषः, श्रीभागवते दुर्वाससं प्र"त्यहं भक्तपराधीनः" (भाग. ९. ४. ६३.) इत्युपक्रम्य "वशे कुर्वन्ति मां भक्त्या सत्स्त्रियः सत्पतिं यथा" (भाग. ९. ४. ६६ .) इति, यो हि यद्वशीकृतः स तदिच्छानुरूपमेव करोत्यतो न सायुज्यादिदानं किन्तु भजनानन्ददानमेव, तेषां मुक्त्यनिच्छा तु "मत्सेवया प्रतीतं च सालोक्यादिचतुष्टयं नेच्छन्ति सेवया पूर्णाः कुतोन्यत् कालविप्लुतं स्वर्गापवर्गनरकेष्वपि तुल्यार्थदर्शिनः सालोक्यसार्ष्टिसामीप्यसारूप्यैकत्वमप्युत दीयमानं न गृह्णन्ति विना मत्सेवनं जनाः" (भाग. ९. ४. ६७–६९.) इत्यादिवाक्यसहस्रैर्निर्णीयते ॥ ५० ॥

वद्भक्तपरामर्शकत्वात् तस्यैव दर्शनाद्युच्यत इति पूर्वोक्तभक्त एव महिमाधिकरणमिति भक्त एव भूम्नः प्रतिष्ठोक्तेति फलितं, इह 'स्वे महिम्नि प्रतिष्ठित' इतिश्रुतौ, उक्तरीत्येत्यादि, 'स्वे महिम्नि प्रतिष्ठित' इति, 'स वा एष एवं पश्यन्नि'तिश्रुतिभ्यां सर्वात्मभावस्य तादृशदर्शनस्य च तादृशभक्ते नियमनं कुर्यादित्यर्थः, अहङ्कारेत्यादि, तदादेशाहङ्कारादेशात्मादेशादिरूपाः सर्वात्मभावबोधिकास्तिस्रोवस्थाश्च न वर्णयेदित्यर्थः, तस्मादुक्तश्रुतीनां त्वदुक्तरीत्या व्याख्यानासम्भवात्, आदिपदात् सूत्रस्थादिपदात्, त्रिविधस्तदादेशाहङ्कारादेशात्मादेशादिशब्दैर्बोध्या, तत्रादौ तदादेशस्यात्ममात्रस्फूर्तिरूपस्यादौ स्वरूपं निरूपयन्ति पूर्वं ह्यतीत्यादिना, पूर्वमहङ्कारात्मदेशाभ्यां पूर्वं, तदितरास्फूर्त्या भगवदतिरिक्तास्फूर्त्या, अहङ्कारादेशस्वरूपमाहुस्ततो निरुपधीत्यादिना, सूत्रांशान्तरव्याख्यानमाहुर्नन्वित्यादि, प्रज्ञान्तरं पृथक्त्ववत्, अन्या प्रज्ञा प्रज्ञान्तरं सर्वात्मभाववद्भिन्नपुरुषोत्तममुमुक्षुभक्तप्रज्ञारूपं यस्मिन् यथान्यमुमुक्षुप्रज्ञापृथक्त्वं तद्वत् सर्वात्मभावस्यापि मुक्तिपर्यवसायिभिन्नत्वं बोध्यमित्यर्थः, तदिष्टं मोक्षरूपं 'तमेव' 'सोश्नुते सर्वान् कामानि'त्याद्युक्तमेव रूपं, स भाव उक्तसर्वात्मभावः, अत्र सर्वात्मभावस्योक्तरूपफलसार्थकतायाम् ॥ ५० ॥

---

१ °स्मा° २. °दैन्यावि° कंगो । ३. °ज्ञानं कैवपागो । ४. यथा इष्टं कैवपागो ।

ननु "नान्यत् पश्यति" इत्यारभ्य सर्वस्य प्रपाठकस्य[1] सर्वात्मभावनिरूपकत्वोक्तिरनुपपन्नात एवात्मपदानां पुरुषोत्तमपरत्वोक्तिश्च, यतस्तस्य मुक्तावपि कामाभावः प्रतिपाद्यतेऽत्र तु तस्य "सर्वेषु लोकेषु[2] कामचारो भवति" (छान्दो. ९. २५. २.) इतिश्रुतिः पठ्यते, एवं[3] सति न तन्निरूपणमत्रेति वाच्यं[4] तद्भाववतोप्यन्यकामवत्त्वमिति वा, द्वितीयस्योक्तप्रमाणपराहतत्वेनाद्यपक्ष एवाश्रयणीय इतिपूर्वपक्षं निरस्यति नेति ।

न सामान्यादप्युपलब्धेर्मृत्युवन्न हि लोकापत्तिः ॥ ५१ ॥

तत्र हेतुमाह सामान्यादप्युपलब्धेरिति, तत्समानधर्मयोगादपि तत्प्रयोगः श्रुताद्युपलभ्यतेनेकशो यतः प्रकृतेपि विविधानां लोकानां विविधसुखप्रधानत्वाद् भगवत्सम्बन्धिषु 'सर्वेषु' सुखेषु[5] 'कामचारो भवती'तिश्रुतेरर्थो ज्ञेयः, ननु यथाश्रुत एवार्थोस्तु तत्राह न हि लोकापत्तिरिति, सर्वात्मभाववत[6] इति, प्रकरणात् 'नान्यत् पश्यति' इत्यादिधर्मविशिष्टस्यात्मनः प्राणादिसर्ववतो लोकसम्बन्धो युक्तिसहोपि नेतिज्ञापनाय हिशब्दः, किञ्चैतदग्रे "न पश्यो मृत्युं पश्यति" (छान्दो. ९. २६. २.) इतिश्रुत्या यथा मृत्युनिषेधः क्रियते तथा'त्मन[7] एवेदꣳ सर्वम्" (छान्दो. ९. २६. २.) इतिश्रुत्यै'व'कारेणात्मातिरिक्तव्यवच्छेदः क्रियत इति मृत्युवल्लोकोपि न सम्बध्यत इत्याह मृत्युवदिति, तत्र रोगादीनामपि दर्शननिषेधे सत्यपि मृत्योरेव यन्निदर्शनमुक्तं तेन भक्तानां लोकान्तरसम्बन्धस्तत्तुल्य इति ज्ञाप्यते, अत एव "नोत दुःखम्" (छान्दो. ९. २६. २.) इति दुःखसामान्यनिषेधोग्रे कृतः ॥ ५१ ॥

परेण च शब्दस्य ताद्विध्यं भूयस्त्वात् त्वनुबन्धः ॥ ५२ ॥

अत्र हेत्वन्तरमाहास्मिन्नेव श्लोके "सर्वमाप्नोति सर्वशः" (छान्दो. ९. २६. २.) इति परेण पदेन शब्दस्य श्रुतिवाक्यस्य "आत्मन एवेदꣳ सर्वम्" (छान्दो. ९. २६. २.) इति यत् पूर्वं[8] श्रुति-

---

न सामान्यादुपलब्धेर्मृत्युवन्न हि लोकापत्तिः ॥ ५१ ॥ तस्याप्यदर्शनाभाववतः, मुक्तावप्यक्षरमुक्तावपीत्यर्थः, अत्र तु सर्वात्मभाववद्भक्तिप्रतिपादकसनत्कुमारवाक्ये, एवं सत्यकामकत्वबोधककपिलस्मृतेः कामचारबोधकश्रुतिविरोधे सति, न तन्निरूपणं न सर्वात्मभावनिरूपणं, अत्र सनत्कुमारश्रुतिषु, तद्भाववतः सर्वात्मभाववतः, इति वा न वा, न वाच्यमित्यर्थः, द्वितीयस्य सकामत्वबोधकश्रुतिवाक्यस्य, उक्तप्रमाणेत्यादि, 'दीयमानं न गृह्णाती'ति कपिलस्मृतिपराहतत्वेनेत्यर्थः, आद्यपक्षोकामत्वपक्षः, नेतीत्यादि, पूर्वमुक्तं सर्वात्मभावोत्र निरूपणीय इति तन्नेत्यर्थः, तत्र सर्वात्मभावस्य सर्वथा निरूपणीये, हेतुमाह सूत्रकारः हेतुमाह, हेतुं व्याकुर्वन्ति तत्समानधर्मयोगादिति, तथा च लोके सुखभोगरमणादयः प्रसिद्धाः, तेषां सादृश्यं सर्वात्मभावाद्भक्तानां भगवत्सम्बन्धिरमणादिष्वपि तिष्ठतीति सर्वलोकसुखापेक्षयाप्यस्य सुखस्योत्कृष्टत्वेन'सर्वलोक'पदप्रयोगः कृतो न त्विहापि सुखं लोकसुखं भवतीतिहेतुना श्रुतितात्पर्यं प्रदर्शितं, यथाश्रुत एवार्थ इति, 'सर्वेषु लोकेषु कामचारो भवती'तिश्रुतेर्भक्तानां पुरुषोत्तमसम्बन्धिनां सर्वलोकसम्बन्धिसुखानुरूप एवार्थो भवतु न तु तत्सदृशालौकिकसुखानुभवरूपोर्थ इत्यर्थः, आत्मन इत्यादि भगवत्सम्पादितदेहेन्द्रियान्तःकरणादिसकलधर्मवतः सर्वात्मभाववद्भक्तस्येत्यर्थः, एतदग्रे 'नान्यत् पश्यती'त्यादिश्रुतेरग्रे,' 'न पश्यो मृत्युं पश्यती'तिश्रुतिः, तथाच चतुर्मुखलोकपर्यन्तानां पुनरावृत्तिदर्शनादेतस्य मृत्युनिषेधाल्लोकातीतत्वमवगम्यते, एतदेवाहु'रात्मन एवेदं सर्व'मिति, आत्मातिरिक्तव्यवच्छेदः परमानन्दभोगसाधनेष्वात्मातिरिक्तव्यवच्छेदः सुखे चेति बोध्यं, तत्तुल्यो रोगदुःखादितुल्य इत्यर्थः ॥ ५१ ॥

परेण च शब्दस्य ताद्विध्यं भूयस्त्वात्त्वनुबन्धः ॥ ५२ ॥ अत्र भक्तभावानां लौकिकत्वाभावे, अस्मिन्नित्यादि 'न पश्यो मृत्युं पश्यती'त्यादिश्लोके, पादान्तरेण तुरीयेण 'सर्वमाप्नोति सर्वश' इत्यनेनेत्यर्थः, शब्दस्य 'सर्वेषु लोकेषु कामचारो भवती'तिश्रुतिवाक्यस्य, पूर्वं कामचारश्रुतेः 'आत्मन एवेदं सर्व'मितिश्रुतिवाक्यं पूर्वं,

---

१. प्रपाठकस्य लुप्तं पा । २. लोकेषु लुप्तं कपु । ३. च अधिकं गो । ४. वा वाच्यं कपु । ५. सर्वेषु सुखेषु लुप्तं पु । ६. सर्वात्मवतः कपु । ७. आत्मतः गो प्रायः सर्वत्र । ८. पूर्वोक्तं कैपा ।

वाक्यं तद्विधतैव प्रतीयत इति न लोकसम्बन्धो वक्तुं शक्य इत्यर्थः, नन्वा"त्मन एवेदं सर्व"मितिवाक्येनैवैतदर्थलाभे पुनस्तदुक्तिर्नोचितेतिशङ्कायां तत्र हेतुमाह, तुशब्दः शङ्कानिरासे, भूयस्त्वाद्धेतोः, उक्तेर्थे हेतूनां बाहुल्ये तद्दार्ढ्यं भवतीत्याशयेनोक्तार्थस्यैव श्लोकेनानुबन्धः कृत इत्यर्थः, अथवा भूयःपदमाधिक्यार्थकं, तथा च स्वकृतसाधनसाधितफलापेक्षया स्वयमुद्यम्य भगवता साधितफले निरवधिरुत्कर्ष इतिज्ञापनाय पुनः श्लोकेन तथेत्यर्थः ॥ ५२ ॥

एक आत्मनः शरीरे भावात् ॥ ५३ ॥

उक्तेर्थे श्रुत्यन्तरसम्मतिमप्याहैके शाखिनस्तैत्तिरीयाः शरीरे भक्तशरीरे हृदयाकाश इति यावत्, तत्रात्मनो भगवतो भावादाविर्भावात् तेन सह सर्वकामोपभोगं वदन्तीं श्रुतिं पठन्ति "सत्यं ज्ञानमनन्तं ब्रह्म यो वेद निहितं गुहायां परमे व्योमन् सोश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिता" (तै. ब्र.) इति, अत्रोपक्रमे "ब्रह्मविदाप्नोति परमि"तिश्रुतिरक्षरब्रह्मविदः परब्रह्मप्राप्तिं सामान्यत उक्त्वा विशेषतः कथनार्थं "तदेषाभ्युक्ता" (तै. ब्र.) इतिवाक्यं 'तद्' ब्रह्म प्रतिपाद्यत्वेना'भि'मुखीकृ'त्यैषा' वक्ष्यमाणा ऋक् परब्रह्मविद्भि'रुक्ते'त्युक्त्वा तामुक्तवती "सत्यं ज्ञान"मिति, परब्रह्मस्वरूपमनुभवैकवेद्यं न शब्दादिभिर्वेद्यमितिज्ञापनाय स्वयं तत्त्वप्रतिपादिकाप्यन्यमुखेनोक्तवती, अत्र 'ब्रह्मणा सह' 'सर्वकामो'पभोग उक्त इत्येतदेकवाक्यतायै "सर्वेषु लोकेषु कामचारो भवति" (छान्दो. ९. २५. २.) इतिश्रुतेरप्युक्त एवार्थो मन्तव्यः ॥ ५३ ॥ १७ ॥

इति तृतीयाध्याये तृतीयपादे सप्तदशं लिङ्गभूयस्त्वाधिकरणम् ॥ १७ ॥

ननु "ब्रह्मविदाप्नोति परम्" (तै. ब्र.)इतिश्रुत्याक्षरब्रह्मविदः परब्रह्मप्राप्तिरुच्यते, तत्रेतरसाधनसापेक्षं ब्रह्मज्ञानं परं प्रापयत्युत तन्निरपेक्षमिति भवति संशयः, अत्र श्रुतौ तन्मात्रोक्तेरितरनिरपेक्षमेव तत् तथेति पूर्वः पक्षः, सिद्धान्तस्त्वेवं सति ज्ञानमार्गीयाणा-

---

तद्विधतैवात्मसम्पादितसम्पत्तिमत्त्वैव, न लोकसम्बन्धो भक्तेषु न लोकसम्बन्ध इत्यर्थः, एतदर्थलाभे भक्तसम्बन्धिनिखिलपदार्थानामलौकिकत्वलाभे, पुनस्तदुक्तिरलौकिकत्वसाधकहेत्वन्तराणां श्रुतिभिरुक्ति', शङ्कानिरासे हेत्वन्तरोपन्यासः किमर्थमितिशङ्काया निरासे, तथा 'आत्मन एवेदं सर्व'मितिभावः, भूयःपदं सूत्रस्य'भूयः'पदं, हेतुबाहुल्यापेक्षया विशेषतस्तुष्टार्थबोधनायाहुरथवेत्यादि, भूयःपदसूचितार्थमाहुस्तथा चेत्यादिना, स्वकृतं जीवकृतं, पुनः श्लोकेन पूर्वं'मात्मन एवेदं सर्व'मितिश्रुत्या बोधनेप्यात्मपदस्य जीवसाधारण्याद्भगवदसाधारणफललाभसूचनाय 'सर्वमाप्नोति सर्वशः' इतिश्रुत्या पुनः फलस्यानुबन्धः इत', तथानुबन्ध इत्यर्थः, ॥ ५२ ॥

एक आत्मनः शरीरे भावात् ॥ ५३ ॥ उक्तेर्थे 'सर्वेषु लोकेषु कामचारो भवती'त्यर्थस्यालौकिकत्वरूपेर्थे, उक्त एवार्थः 'सोश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चितेति'श्रुत्युक्तं सर्वकामाशनमेव सर्वलोककामचार—भावपस्याप्यर्थः, प्रकटार्थमन्यत् ॥ ५३ ॥ १७ ॥

इति तृतीयतृतीये सप्तदशाधिकरणम् ॥ १७ ॥

व्यतिरेकस्तद्भावाभावित्वान्न तूपलब्धिवत् ॥ ५४ ॥ पूर्वाधिकरणान्ते 'ब्रह्मविदाप्नोति परमि'तिश्रुतेः [illegible] प्रसङ्गात् तदर्थविचाराधिकरणान्तरमारभत इत्यवतारयन्ति नन्वित्यादि, तत्राक्षरब्रह्मज्ञानस्य परब्रह्मप्राप्तिं संशयबीजं, तदक्षरज्ञानं, तथा पुरुषोत्तमप्रापकं, एवं सति केवलाक्षरज्ञानस्य पुरुषोत्तमप्रापकत्वे

---

१. मत्र पूर्वं श्रुतिवाक्यं ख्रेन । २. 'शरीरहृदया' क्ष्यु । ३. ब्रह्म यो वेद निहितं परमितिश्रुतेः क्वगो । ४. अ-क्षर' कगो । ५. एवं कग । ६. शब्दादिभिर्वेद्यं' पु । ७. तत्र पु ।

मपि परप्राप्तिः स्यात्, सा त्वनेकप्रमाणबाधितेति पूर्वमवोचाम, किञ्च, ज्ञानशेषभूतब्रह्मापेक्षया
फलात्मकस्य परस्य मुख्यत्वात् "तदेषाभ्युक्ता" (तै. ब्र.) इतिश्रुतिस्तदेव प्रतिपाद्यत्वेनाभि-
मुखीकृत्य ऋगुक्तेत्याह, तेन तत्र 'ब्रह्म'पदे पुरुषोत्तमपरे ज्ञायेते, तथा च गुहायां यथाविर्भूतं
परमं व्योम पुरुषोत्तमगृहात्मकमक्षरात्मकं व्यापिवैकुण्ठं भवति तदा तत्र भगवानाविर्भवतीति
तत्प्राप्तिर्भवतीत्युच्यते "यो वेद निहितं गुहायां परमे व्योमन्" (तै. ब्र.) इत्यनेन ।

व्यतिरेकस्तद्भावाभावित्वान्न तूपलब्धिवत् ॥ ५४ ॥ (३. ३. १८.)

तथा च ज्ञानिनां गुहासु परमव्योम्नो व्यतिरेक एव, तत्र हेतुस्तद्भावाभावित्वा-
दिति, "यमेवैष वृणुत" (कठ. २. २२.) इतिश्रुतेर्वरणाभावे भगवद्भावस्यासम्भवाज्
ज्ञानिनां तथावरणाभावाद् भगवद्विषयको भावो न भावीति तथेत्यर्थः, ननु ज्ञानविषयत्व-
वदाविर्भावोऽप्यस्तु किञ्च तदतिरिक्तमाविर्भावमपि न पश्याम इत्याशङ्कायामाह न तूपलब्धि-
वदिति, उपलब्धिर्ज्ञानं तद्वद् गुहायामाविर्भावो न भवतीत्यर्थः, यस्मै भक्ताय यल्लीला-
विशिष्टं स्वस्वरूपमनुभावयिता प्रभुर्भवति तद्गुहायां तल्लीलाश्रयभूतमक्षरस्वरूपं वैकुण्ठलोक-
वदाविर्भावयतीति नोक्तशङ्कालेशोऽपि, यत्र पुरुषोत्तमस्य चाक्षुषत्वं तत्र ततोऽधःकक्षस्य
तस्य तथात्वे का शङ्का नाम? एतच्चोपपादितं पूर्वं विद्वन्मण्डने च ॥ ५४ ॥

ननु ज्ञानिज्ञानविषयभक्तगुहाविर्भूताक्षरयोर्भेदोऽस्ति न वा? नाद्यः, मानाभावादेक-
त्वेनैव सर्वत्रोक्तेः, न द्वितीयः, निरवयवस्य क्वचिल्लोकरूपत्वातद्रूपत्वाभ्यामेकत्वानुपपत्ते-
रिति चेत्, मैवं, लोकरूपत्वस्य पश्चाद्भावित्वे हीयमनुपपत्तिर्नत्वेवं किन्त्वक्षरस्वरूपमेव तथेति

सति, अनेकप्रमाणेत्यादि, 'यमेवैष वृणुते' 'भक्त्याहमेकया ग्राह्य' इत्याद्यनेकप्रमाणेत्यर्थः, ऋगुक्तेत्याहेति,
श्रोतॄनभिमुखीकृत्य पुरुषोत्तमसाक्षात्कारविद्भिरे'षा 'सत्यं ज्ञानमनन्त'मित्यृगुक्तेत्यर्थं, तेन पुरुषोत्तमप्रतिपादक-
तयैतादृङ्निर्वचनेन, तत्र 'सत्यं ज्ञानमनन्त'मित्यृचि, ब्रह्मपदे 'अनन्तं ब्रह्मे'ति ब्रह्मपदं 'सह ब्रह्मणे'ति ब्रह्मपदमेते
ब्रह्मपदे इत्यर्थः, पुरुषोत्तमपरे तत्राविर्भूतपुरुषोत्तमप्रत्यक्षतात्पर्यके, तथा चेत्यादि, एवं सत्यग्रे तद्हृदयाकाशे
पुरुषोत्तमाधिष्ठानत्वविशिष्टे 'परमव्योम'पदवाच्येऽक्षर आविर्भूते सति 'सोऽश्नुत' इत्यादिरूपं फलं भवतीति पर्यव-
सितोऽर्थः, तदा वैकुण्ठाविर्भावकाले, तत्र हृदये, पूर्वसूत्रार्थं श्रुत्योक्त्वा सूत्राक्षरैर्व्याख्यानमाहुस्तथा चेत्यादि,
गुहासु हृदयेषु, परमव्योम्नः पुरुषोत्तमाधिष्ठानत्वविशिष्टाक्षरस्य, व्यतिरेक आविर्भावाभाव., तत्र तादृशाना-
विर्भावे, तद्भावाभावित्वादितीति, तद्भावस्याभावित्वं तद्भावाभावित्वं, तद्भावस्य पुरुषोत्तमाधिष्ठानेषु
विशिष्टपरमव्योमाविर्भावकारणस्य सर्वात्मभावस्य, अभावित्वाद् 'यमेवैष वृणुते तेन लभ्य' इति 'तस्यैष आत्मा
वृणुते तनुं स्वा'मितिश्रुतिभ्यामुक्तवरणरूपकारणस्याभावेन कार्यभूतसर्वात्मभावस्य तेष्वसम्भावित्वादित्यर्थः,
ज्ञानविषयवदित्यादि, तथा च ज्ञानिनां हृदये यथाक्षरविषयताशालिज्ञानमाविर्भवति तथा तादृशपरमव्योमावि-
र्भावोऽप्यास्तामित्यर्थः, पुरुषोत्तमाधिष्ठानवत्त्वं परमं व्योमाप्यक्षरमेव न तु तदतिरिक्तं विशिष्टस्यानतिरिक्तत्वादि-
त्यर्थः, किञ्चेत्यादि, तद्वद्गुहायामित्यादि, ज्ञानाविर्भाववज्ज्ञानिगुहाया तादृशपरमव्योमाविर्भावो न भवतीत्यर्थः,
ननु पुरुषोत्तमाधिष्ठानत्वविशिष्टाक्षरस्यातिरिक्तत्वाभावाच्छुद्धाक्षरस्य ज्ञानिगुहायामाविर्भावे किमवशिष्यत इत्यत-
आहुर्यस्मा इत्यादि, तथा च यादृशी वरणसर्वात्मभावादिसामग्री यस्य वर्तते तस्मिंस्तादृशलीलाविशिष्टमेवाविर्भाव-
यितुमिच्छति प्रभुर्न तु नियमेनेति न काप्यनुपपत्तिरितिभाव., ननु तादृशवैकुण्ठात्मकाक्षरस्याविर्भावेन भक्तानां
दर्शनमुक्तं तदनुपपन्नमक्षरस्यादृश्यत्वादिगुणकत्वस्य श्रुतावुक्तत्वादित्यत आहुर्यत्रेत्यादि, तस्य तथात्वेऽक्षरस्य चाक्षु-
षत्वे, पूर्वमित्यादि, 'कश्चिद् धीर. प्रत्यगात्मानमैक्षदावृतचक्षु'रितिश्रुत्या सति वरणे दिव्यचक्षुर्लाभेनाक्षरस्यापि
ज्ञानमुक्तमित्यर्थः, अक्षरस्वरूप विशदीकृत्य प्रदर्शयितुमाहुर्नन्वित्यादि, नाद्यो न भेद', सर्वत्रे'त्यमेवाद्वय'मि-
त्यादिश्रुतिष्वित्यर्थ', न द्वितीयो न भेदाभावः, पश्चाद्भावित्वे कृत्रिमत्वे, इयं भेदाभेदचिन्तारूपा, तथा श्रुत्युक्तं

---

१. परस्य छुतं गो । २. यथावि° कैगो । ३. °त्यन्तेन वैगो । ४. हेतुम° वपा । ५ स्वरूप° वपा ।
६. °मित्ता पा । ७. च छुत वपा ।

श्रुतिराह "अम्भस्यपारे भुवनस्य मध्ये" (तै. आ. १०. १. १.) इत्युपक्रम्य "तदेव भूतं तदु भव्यमा इदं तदक्षरे परमे व्योमन्" (तै. आ. १०. १. १.) एतदग्रे च "यमन्तःसमुद्रे कवयोवयन्ति, यदक्षरे परमे प्रजा" (तै. आ. १०. १. १.) इत्यादिरूपा, स्मृतिरपि "परस्तस्मात्तु भावोन्यो व्यक्तोव्यक्तात् सनातनः यः स सर्वेषु भूतेषु नश्यत्सु न विनश्यति अव्यक्तोक्षर इत्युक्तस्तमाहुः परमां गतिं यं प्राप्य न निवर्तन्ते तद्धाम परमं मम" (भग. ८. २०-२१.) इत्यादि तु गीतासु, श्रीभागवतेपि "दर्शयामास स्वं लोकं गोपानां तमसः परं सत्यं ज्ञानमनन्तं यद् ब्रह्म ज्योतिः सनातनं यद्धि पश्यन्ति मुनयो गुणापाये समाहिताः" (भाग. १०. २५. १४-५.) इति दशमे, द्वितीये च "तस्मै स्वलोकं भगवान् समाहितः सन्दर्शयामास" (भाग. २. ९. ९.) इत्युपक्रम्य कालत्रिगुणमायासम्बन्धराहित्यमुक्त्वा भगवत्पार्षदानुक्त्वा विमानप्रमदा उक्त्वा श्रीरुक्ता, तथा च श्रुतिस्मृत्येकवाक्यतायां तादृक्स्वरूपमेवाक्षरमितिनिर्णयो भवति, एवं सति सच्चिदानन्दत्वदेशकालापरिच्छेदस्वयंप्रकाशत्वगुणातीतत्वादिधर्मवत्त्वेनैव ज्ञानिनामक्षरविज्ञानं भक्तानामेव पुरुषोत्तमाधिष्ठानत्वेन तथेति ज्ञेयं "मल्लानामशनि" (भाग. १०. ४०. १७.)रितिश्लोकोक्तरीत्या पुरुषोत्तमस्यैवं, प्रभुणा ये यथा विचारिताः सन्ति ते तथा भवन्तीति तद्विचार एव सर्वेषामधिकाररूप इति "कृतप्रयत्नापेक्षस्तु" (ब्र. सू. २. ३. ४२.) इत्यत्र निर्णीतम् ॥ ५४ ॥

अस्मिन्नर्थे कैमुतिकन्यायकथनार्थं निदर्शनेनोत्तरं पठति,

अङ्गावबद्धास्तु न शाखासु हि प्रतिवेदम् ॥ ५५ ॥

याग तत्तदृत्विङ्नियतकर्तव्यान्यन्वाधानादीन्यङ्गानि तत्रावबद्धाः सर्व एवर्त्विजो यजमानेन, 'अवबन्धनं' नामा'ध्वर्युं त्वा वृणे' 'होतारं त्वा वृण' उद्गातारं त्वा वृण' इत्यादिरूपं वरणमेवान्यथा सर्वकर्मविदुषां तत्कृतिपटूनामेकत्राधिकारो नान्यत्रेतिनियमो न स्यात्, तस्य तस्य तथावरणे तु यजमानेच्छैव हेतुः, ते च तदा न सर्वासु शाखासु विहितान्यङ्गानि कर्तुं सर्वेपि शक्ताः किन्तु यजमानवरणनियमिता एव तथा, तत्र हेतुमाह हि यतःकारणात् प्रतिवेदं नियमितान्यङ्गानि "हौत्रमृचाध्वर्यवादि यजुषौद्गात्रं साम्ना" (आप. परि. १. १८-२०.) इति, तथा चालौकिके वैदिके कर्मणि जीवेच्छा नियामिका भवति यत्र तत्र किमु वाच्यं प्रतिरोमकूपं सावकाशममितब्रह्माण्डस्थितिमतस्तदीशितुरिच्छैव नियामिका तत्तत्साधनफलसम्पत्ताविति ॥ ५५ ॥

ननु पूर्वं कर्मज्ञाननिष्ठानामपि पुंसामग्रे भक्तिमार्गीयत्वं यत्र भवति तत्र तथैव भगवद्वरणमिति हि[११] सिद्धान्तः, ऋत्विजस्त्वेकस्मिन् याग एकत्र वृतस्य नापरत्रापि तथेति विरुद्धो दृष्टान्त इत्यरुच्या निदर्शनान्तरमाह,

---

नानाविधात्मकं, इत्यादिरूपा 'यदक्षरे परमे प्रजा' एवमादिनानाविधाक्षरप्रतिपादिकेत्यर्थः, पुरुषोत्तमस्यैवेति, तथा चैक एव भगवानधिकारभेदेन भक्तैस्तथा दृष्ट इति 'मल्लानामशनि'रितिश्लोके निरूपितं तद्वदेव भगवदत्ताधिकारेणाक्षरस्वरूपमपि यादवनानाप्रकारमुद्दिष्टं शक्यमित्यर्थः ॥ ५४ ॥

अङ्गावबद्धास्तु न शाखासु हि प्रतिवेदम् ॥ ५५ ॥ सूत्रमवतारयन्ति तस्मिन्नित्यादि, कैमुतिकेत्यादि, अलौकिके वैदिके यज्ञादिकर्मणि यज्ञादौ मनुष्ययजमानवरणेन ऋत्विजां षोडशपदार्थकरणसमर्थानामपि नियतस्वकीयतत्तत्पदार्थानुष्ठानमेव भवति न स्वनियतं तत्र भगवद्वरणेन भक्तानां नानाविधलीलानां मध्ये यदधिकारिणे यल्लीलाप्रदर्शनं भगवतोऽभिप्रेतं तदेव भवतीत्यत्र किं चित्रमिति कैमुतिकन्यायः, तथा यजमानशाखानियतकर्मकर्तारः, स्फुटमन्यत् ॥ ५५ ॥

---

१. मः सः कपाउंगो । २. समाश्रितः पा । ३. 'मायादि' कपु । ४. 'र्सं' कपु । ५. 'सं' कपु । ६. ते ते के । ७. निर्णीतः के । ८. त्वां कंखपागो । ९. सर्वे कपु । १०. 'रोम' कपु । ११. 'हां' क । १२. इमं कंगो ।

मन्त्रादिवद् वाविरोधः ॥ ५६ ॥

यथैक एव कश्चिन्मन्त्रो बहुषु कर्मसु सम्बध्यते कश्चिद् द्वयोः कश्चिदेकत्रैव तथैव विधानात् तथात्रापीत्यर्थः, आदिपदात् कर्मोच्यते, यत्र काम्येनैव नित्यकर्मनिर्वाहस्तत्र कामितार्थसाधकत्वेप्रत्यवायपरिहारेप्येकमेव तदुपयुज्यते, यथा च सर्वतोमुखेनैकहोतृप्रवरेध्वर्युप्रवरे च गृह्यमाणे "देवाः पितर" (तै. ब्रा. ३.७.५.४.) इत्यादिना यजमानकर्तृकानुमन्त्रणमेव सर्वत्र सम्बध्यते तथैव विधेः, तथात्रापि तावद्विधं यदेकमेव वरणं तेन तत्तन्निष्ठानन्तरं भक्तिनिष्ठेति न दृष्टान्तविरोध इत्यर्थः ।

अथवो"मित्यु"दाहृत्यैव मन्त्राणामुच्चारणान्मन्त्रादिरोङ्कारः, स यथा ब्रह्मात्मकत्वेनैक एव सर्वमन्त्रेषु सम्बध्यते तथा वरणमपीति तथेत्यर्थः, यद्यपीतरनिष्ठानन्तरभूतभक्तिनिष्ठावर्त्तो वरणं तथाभूतमेकमेवेति न दोषस्तथाप्युत्कृष्टमार्गे वृतस्य नीचकक्षापादानमनुचितमिति मत्वा पक्षान्तरमुक्तं, वस्तुतस्तु साधनमर्यादया यत्र भक्तिर्दित्सिता तत्र तथेति नानुपपत्ति काचित् ॥ ५६ ॥ १८ ॥

इति तृतीयाध्याये तृतीयपादेष्टादशं व्यतिरेकाधिकरणम् ॥ १८ ॥

इति तृतीयाध्याये तृतीयपादेष्टादशं व्यतिरेकाधिकरणम् ॥ १८ ॥

ननु सुखस्वरूपजिज्ञासायां "यो वै भूमा तत् सुख" (छान्दो. ९. २३. १.) मित्युक्तं, भूमस्वरूपजिज्ञासायां "यत्र नान्यत् पश्यती"(छान्दो. ९.२४. १.)त्यादिना तद्यन्निरूपितं तत् सर्वात्मभावस्वरूपमिति यदुक्तं तन्नोपपद्यते, भूम्नो हि सुखरूपतोच्यते, सर्वात्मभावे तु विरहभावे दुःसहदुःखानुभवः श्रूयते, तेन मोक्षसुखमेव "यो वै भूमे"त्यादिनोच्यते, "यो वै भूमा तदमृत" (छान्दो. ९. २४. १.) मितिवाक्याच, अग्रे च "स वा एष एवं पश्य"

मन्त्रादिवद् वाविरोधः ॥ ५६ ॥ तत्र तेषु तथैव ज्ञानमार्गादि सम्पादयतामेव, तेन न कालभेदेनान्यत्र वरणमितिसमाधानं, एक एवेति, प्रणवव्याहृत्यादिरूपः, द्वयोरिति, यथा शनिमन्त्रो मार्जने शनिप्रसादने चोप, युज्यते, एकत्रैव यथा 'सूर्यो ज्योति'रिति प्रातरग्निहोत्रहोमे, तथात्रापीति, तथा च भगवद्वरणस्थलेप्येकमेव वरणं क्वचित् कर्मज्ञानद्वारा भक्तिं दास्यैनमुद्धरिष्य इत्याकारकं क्वचिदेकद्वारा भक्तिं दास्यैनमुद्धरिष्य इत्याकारकमिति न कोप्यनुपपत्तिलेश इत्यर्थः, आदिपदात् सूत्रस्यादिपदात्, कर्मोच्यत इति, यथाग्निहोत्रादिकर्म स्वर्गप्रत्यवायाभावोभयसाधकं, एवमन्यदप्याहुर्यथा चेत्यादिना, प्रचरे गणे, 'देवाः पितर' इति तेषामनुमन्त्रणमन्त्रः, सर्वत्रानेकगणे, तथैव विधेरेकस्यैवानेकत्र कार्यत्वसाधकत्वस्य विधिना बोधनात्, तथात्राप्येकस्यैव वरणस्य नानाप्रकारैर्भक्तिप्रदत्वं 'यमेवैष' इत्यत्र सामान्याकारेणोद्धर्तव्योपदेशात्, तावद्विधमेकमेव नानाप्रकारकं समूहालम्बनज्ञानवदित्यर्थः, तेन वरणेन, तत्तन्निष्ठा धर्मज्ञानसत्सङ्गादिनिष्ठा, भौतिकदृष्टान्तमुक्त्वाध्यात्मिकदृष्टान्तमाहुः प्रणवस्य ब्रह्मरूपत्वादथवेत्यादि, तथा ब्रह्मात्मकमेकमनेकधोपकरोतीत्यर्थः, इतरनिष्ठा कर्मज्ञानसत्सेवादिनिष्ठा- इतरनिष्ठत्वं चासाधारणभक्तिसाधकोपदेशाद्यपेक्षया, तथाभूतमितरनिष्ठानन्तरं भक्तिं दास्यामीत्याकारकं, न दोषो न दृष्टान्तवैषम्यं, तथाप्युत्कृष्टेत्यादि, तथा च साक्षान्मोक्षप्रदस्य प्रणवस्य क्षुद्रकर्माङ्गमन्त्रादावुपयोगवत् कर्मादिनिष्ठानन्तरभक्तिनिष्ठादानमपि नोचिततरमितिप्रदर्शनायाथवेतिपक्षान्तरं स्वयं प्रदर्शितमित्यर्थः, नानुपपत्तिर्नेदीनता विभावनीयेत्यर्थः ॥ ५६ ॥ १८ ॥

॥ इति तृतीयतृतीयेष्टादशाधिकरणम् ॥ १८ ॥

भूम्नः क्रतुवज्ज्यायस्त्वं तथा हि दर्शयति ॥ ५७ ॥ मध्ये प्रासङ्गिकं निरूप्य प्रकृतं निरूपयितुं सूत्रयतीति सूत्रमवतारयन्तः संशयमाहुर्नन्वित्यादिना, तद्यदिति 'सर्वात्मभावे'त्वेति, तेनेति, तेन 'यो वै भूमा तत् सुख'मित्युक्त-

---

१. साधकत्वे कैवपापुंगो । २. परीहारे कपु । ३. तथा च कदापुगो । ४. एकमेव कैवपागो । ५. तथैव छसं पा । ६. तन्निष्ठा° पापुं । ७. तथा छसं कें । ८. अपि मपापुंगो । ९. मोक्ष° सर्वत्र ।

(छान्दो. ९.२५.२.)न्नित्याद्युक्त्वा "तस्य सर्वेषु लोकेषु कामचारो भवती"(छान्दो.९.२५.२.)ति फलमुच्यते, तच्च मोक्षानन्तरमसंम्भाव्यतः स भावो मोक्षो वात्रोच्यत इतिसंशयः, तत्र कामचारोक्तेर्मुक्तिपूर्वदशायां तन्माहात्म्यनिरूपणार्थत्वा'दमृत'शब्दाच्च मुक्तिरेव 'भूम'पदेनोच्यत इति पूर्वः पक्षः, तत्र 'भूम'शब्देन स भाव एवोच्यत इतिसिद्धान्तः, तत्र दुःखदर्शनानुपपत्त्या सर्वाधिकत्वलक्षणं भूमत्वमनुपपन्नमितिशङ्कां परिहरति ।

भूम्नः क्रतुवज्ज्यायस्त्वं तथा हि दर्शयति ॥ ५७ ॥ (३. ३. १९.)

भूम्नः सर्वात्मभावस्य ज्यायस्त्वं सर्वसान्मन्तव्यं, तत्रोक्तानुपपत्तिपरिहारार्थं दृष्टान्तमाह क्रतुवदिति, दर्शपूर्णमासप्रकरणे तैत्तिरीयके पठ्यते "परमेष्ठिनो वा एष यज्ञोग्र आसीत् तेन स परमां काष्ठामगच्छ"(तै. सं. १.६.९.)दित्युपक्रम्य "य एवं विद्वान् दर्शपूर्णमासौ यजते परमामेव काष्ठां गच्छती"(तै. सं. १. ६. ९.)ति, यथा व्रतादिदुःखात्मकत्वेपि परमकाष्ठालक्षणफलगमकत्वेन दर्शपूर्णमासयोः सर्वक्रतुभ्योधिकत्वं वक्तु"मग्र आसी"दिति स्तूयते तथा दुःखहेतुत्वेप्यनन्यलभ्यसाक्षात्पुरुषोत्तमानन्दप्राप्तिहेतुत्वेन सुखरूपत्वमुच्यत इत्यन्येभ्यः सर्वेभ्यो ज्यायस्त्वं मन्तव्यमित्यर्थः, अत्रोपपत्तिमाह तथा हि दर्शयति, श्रुतिस्तु "स एवाधस्ता"(छान्दो.९.२५.१.)दित्याद्युक्त्वा"थ्यहङ्कारादेश" (छान्दो ९.२५.१.) इत्याद्युक्त्वा"थात्मादेश" (छान्दो. ९.२५.१.) इत्याद्युक्तवती, एतदग्रे चैतादृशस्या"त्मत एव" (छान्दो. ९.२६.१.) प्राणाशासरादि'सर्व'मिति च दर्शयति, एतत् सर्वात्मभाववत्येव सर्वमुपपद्यते न तु मुक्तस्य, वृत्तिभावाभेदात् प्राणाद्यभावाच्च, जीवन्मुक्तिदशायां प्राचीनानामेव सत्त्वा'दात्मतः प्राणा' इत्यादि न वदेत् ।

सुखरूपत्वस्य सर्वात्मभावे सम्भवेनेत्यर्थः, संशयबीजमाहुरग्रे चेत्यादिना, तत्र मुक्तौ, तन्माहात्म्येत्यादि, तथा च मुक्तिदशायां मुमुक्षोः सर्वलोककामचारयोग्यता भवतीत्यर्थवाद एवायं मुक्तिश्रुतेर्न तु कामचारश्रुतिः स्वार्थे प्रमाणामितिभावः, तत्र सर्वात्मभावदशायां, भूम्नो भूमपदवाच्यस्य, तत्र सर्वात्मभावरूपार्थकरणे, उक्तानुपपत्तिः सुखरूपत्वानुपपत्तिः, व्रतादि कर्माङ्गव्रतादि, तथा दर्शपूर्णमासवत्, दुःखहेतुत्वेपि भूमपदवाच्यसर्वात्मभावस्य विरहात्मकत्वेन दुःखरूपत्वेपि, सुखरूपत्वमसाधारणसुखसाधनत्वेन सुखरूपत्वमित्यर्थः, अत्रोपपत्तिमिति, भाविसुखजनकतामादाय सुखरूपत्वाङ्गीकाराद् भूमपदेन सर्वात्मभाव एवोच्यते न तु मोक्ष इत्यत्रोपपत्तिं, श्रुतिस्तु 'यो वै भूमा तत् सुख'मितिश्रुत्यर्थलाभोत्तरमेतच्छ्रुत्यनन्तरं पठ्यमाना श्रुतिः, 'स एवाधस्ता'दित्यादिना ब्रह्मातिरिक्तास्फूर्तिरुक्ता, 'अहङ्कारादेश' इत्यनेन किञ्चित्स्वात्मस्फूर्तावन्वेषणाद्युपायैर्भगवन्तं प्राप्स्यामीत्यन्वेषणाद्युपाय उक्तः, 'आत्मादेश' इत्यनेन स्वकृतयत्नवैफल्ये सम्पन्नेतिदीनतायां जातायां भगवदाविर्भावस्य स्वात्मनि जातत्वात् तदनन्तरं स्वयं भगवद्धर्माविःकरणमुच्यते, एतदग्र उक्तश्रुत्यग्रेतनश्रुतौ, आत्मत एवेति, एवकारेण प्रकारान्तरनिष्पन्नप्राणाशासरणादीनां निरास उक्तः, एतत् पूर्वोक्तवृत्तित्रितयरूपादेशत्रितयमादाय स्मरादिसर्वमित्यन्तं, सर्वात्मभाववत्येवेत्येवकारेण मुक्तस्य व्यवच्छेदः, वृत्तिभावाभेदादिति 'आत्मैव तदिदं सर्वं' 'एवं पश्यन्नेवं मन्वान एवं विजानन्नि'त्यनेन तदादेशो ब्रह्माकारवृत्तिरुक्ता, एव 'महङ्कारादेश' इत्यनेन स्वयत्नेनेष्टं साधयिष्य इतिवृत्तिरुक्ता, एवमात्मादेशो भगवत्कृत्यनुरूपानुकूला वृत्तिः, एवं तिस्रो वृत्तय उक्तास्तासां मुक्तेसम्भवादित्यर्थः, प्राणाद्यभावात् भूमलाभत 'आत्मत एव' प्राणाशास्मरादिसर्वमुक्तं तस्य मुक्तेसम्भवादित्यर्थः, ननु परममुक्त उक्तवृत्तिप्राणादीनामसम्भवेपि जीवन्मुक्तानामेव ते धर्मा भवन्तु न सर्वात्मभाववतामित्यत आहुर्जीवन्मुक्तीत्यादि, प्राचीनानां प्राचीनप्रारब्धार्जितानां, न वदे'दात्मत

---

१. तस्येत्यारभ्य मोक्षेत्यन्तं त्रुटितं पा । २. °भवि थपागो । ३. वा त्रुटितं क । ४. तत्र त्रुटितं पा । ५. पूर्वं° थपापुंगो । ६. श्रूयते थपापुं । ७. अथाहङ्कारादेश इत्याद्युक्तवान्तं त्रुटितं पा । ८. अग्रे सर्वत्र । ९. आत्मनः सर्वत्र । १०. तु त्रुटितं पा । ११. वृत्तिभेदाभावात् सर्वत्र ।

ननु लोकेपि शृङ्गाररसभाववति पुंसि नार्यां च त्वदुक्तभावसम्बन्धिव्यभिचारि-
यद्वा, भावाः श्रूयन्ते 'सैव सर्वत्र स एव सर्वत्रे'ति, एवं सति लौकिकसधर्मत्वान्न त्वदुक्तभाव-
स्यालौकिकज्ञानादिभ्य आधिक्यं वक्तुं शक्यमलौकिकविषयत्वाल्लौकिकत्वमपि न तथेति
भवति संशयः, तत्र रिपुत्वमनुजत्वादिज्ञानानामिव कामादिभावेन स्नेहस्यापि सम्भवा-
न्नास्यालौकिकत्वमिति पूर्वः पक्षः, सिद्धान्तस्त्वस्य भावस्य लौकिकेभ्यो ज्यायस्त्वं मन्तव्यं,
ननूक्तं लोकसाधारण्यं बाधकमितिशङ्कानिरासाय निदर्शनमाह क्रतुवदिति, यथा
दर्शादिषु दोहनाधिश्रयणातञ्चनव्रीह्यवघातादिपुरोडाशभक्षणादीनां लौकिकक्रियातुल्यत्वेन
दर्शनेपि न लौकिकत्वं लौकिकप्रमाणाप्राप्तत्वादलौकिकतत्प्राप्तत्वात् तथोक्तप्रमाणरूपवरण-
लभ्यत्वेन श्रुत्युक्तत्वान्न लौकिकत्वमस्य भावस्येतिदिक्, वस्तुतस्तु ग्रामसिंहस्य सिंहसरूपत्वेपि
न तादृग्रूपं वक्तुं शक्यं तथा लौकिकपुंसि नार्यां वा तदाभासो रसशास्त्रे निरूप्यते तदृष्टान्तेन
भगवद्भाववद्भक्तरीतिभावनार्थं, न त्वृषीणां लौकिके तात्पर्यं भवितुमर्हति, अत्रोपपत्ति-
माह तथा हीत्यादि, पूर्वोक्तभाववत 'आत्मनः' प्राणादिकं 'सर्वं' दर्शयति श्रुति"स्तस्य ह
वा एतस्यैवं पश्यत" (छान्दो.९.२६.१.) इत्यादिना, इतः पूर्वमपि "स वा एष एवं पश्य"
(छान्दो.९.२५.२.) न्नित्युपक्रम्या"त्मरतिरात्मक्रीड आत्ममिथुन आत्मानन्दः स स्वराड् भवति
सर्वेषु लोकेषु कामचारो भवती"(छान्दो.९.२५.२.)तिश्रुतिश्च, न हि लोक एवं सम्भवत्यात्म-
पदानां भगवद्वाचकत्वादिति सर्वोत्तमविषयकभावस्यैव तथात्वं युक्तमिति चोपपत्तिर्हिशब्देन
सूच्यते ॥ ५७ ॥ १९ ॥

इति तृतीयाध्याये तृतीयपादे एकोनविंशं भूम्न इत्यधिकरणम् ॥ १९ ॥

अथ मत्स्यादिरूपाणां भगवदव-
पूर्वाधिकरणैः सर्वात्मभावस्वरूपादिनिर्णयं कृतवान्, अथ मत्स्यादिरूपाणां भगवदव-
तारत्वमविशिष्टमिति सर्वेषां समस्योपासना कार्येति पार्थक्येनेति विचारयति, तत्रोपास्या-
भेदेपि रूपभेदादेकत्रोपासकस्यान्यत्रानुपासनलक्षणावज्ञासम्भवादस्या अप्यसिद्धिसम्भवादपि
समस्यैव सा कार्येति प्राप्ते सिद्धान्तमाह ।

एष प्राणा' इत्यत्रैवकारेणेतरासम्पादितप्राणादिमत्त्वं न वदेदित्यर्थः, उक्तरीत्या विवरणस्य पूर्वाधिकरणसिद्धप्रायत्वात्
प्रकारान्तरेण सूत्रार्थं वक्तुं वर्णकान्तरमाहुर्यद्वेत्यादि, अधिकरणमारचयितुं संशयादिकमाहुर्नन्वित्यादिना, त्वदुक्त-
भावेत्यादि, रसनिरूपकसात्विकभावाः, श्रूयन्ते भरतसूत्रादौ श्रूयन्त इत्यर्थः, सैव लौकिकरसरीतिरेव, सर्वत्र
सकलरसाधिकारिषु, स एव रसोपि लोकसिद्ध एव, एवं सति रसनिष्पत्तिप्रकारस्य सर्वत्रैकरूपत्वे सति, त्वदुक्त-
भावस्य सर्वात्मभावस्य, अलौकिकज्ञानादिभ्यः परममुक्तिजीवन्मुक्तितत्साधकज्ञानादिभ्य इत्यर्थः, अलौकिक-
विषयत्वात् सर्वात्मभाववदुक्तभावानां ब्रह्मविषयत्वान्न तथा वक्तुं शक्यं, भवति संशयो लौकिकसजातीय-
त्वालौकिकविषयत्वाभ्यां भवति संशय इत्यर्थः, पूर्वपक्षमाहुस्तत्रेत्यादिना, तत्र भगवति, तथा च भगवति
रिपुत्वमनुजत्वादिज्ञानानामिव स्नेहस्यापि लौकिकस्य सम्भवाल्लौकिकत्वं स्नेहस्येत्यर्थः, अस्य भावस्य
सर्वात्मभावस्य, निदर्शनमुक्तभावस्यालौकिकत्वसाधकदृष्टान्तं, तत् प्रमाणं, तथोक्तप्रमाणं तद्वदलौकिक-
प्रमाणं, अत्रोपपत्तिं सर्वात्मभावस्यालौकिकत्व उपपत्तिं, पूर्वोक्तभावो भूमपदवाच्यः सर्वात्मभावः, स्फुट-
मन्यत् ॥ ५७ ॥ १९ ॥

॥ इति तृतीयतृतीय एकोनविंशाधिकरणम् ॥ १९ ॥

१. सधर्मकत्वात् कंगो । २. मनुजत्वरिपु° सर्वत्र । ३. स्नेहभाव° सर्वत्र । ४. °रूपत्वेपि कंगो, °स्वरूपत्वेपि
यपा, अपि ख्तं पुं । ५. तादृप्यं वप्रपापुंगो । ६. अवतारत्वं कपपुं ।

नाना शब्दादिभेदात् ॥ ५८ ॥ (३. ३. २०.)

सर्वेष्ववतारेषु नानैवोपासना कार्या, तत्र हेतुः शब्दादिभेदादिति, तत्तत्स्वरूपवाचकशब्दानां मन्त्राणां चादिपदादाकारकर्मणां च भेदादित्यर्थः, एतेनैव मिथोविरुद्धानामाकारकर्मणामेकत्र भावनस्याशक्यत्वमयुक्तत्वं चेतिभावः सूचितः ॥ ५८ ॥ २० ॥

इति तृतीयाध्याये तृतीयपादे विंशं नानाशब्दादिभेदादित्यधिकरणम् ॥ २० ॥

पार्थक्येनोपासनानि कर्तव्यानीतिस्थिते विचार्यते, किमग्निहोत्रदर्शपूर्णमासादिवदेषां समुच्चय उत विकल्प इति, तत्र विधिफलयोः समानत्वात् समुच्चय इति प्राप्ते निर्णयमाह ।

विकल्पोविशिष्टफलात्[१] ॥ ५९ ॥ (३. ३. २१.)

उपासनानां विकल्प एव, तत्र हेतुरविशिष्टफलत्वात्, मुक्तिफलकत्वं हि सर्वेषामुपासनानामविशिष्टं, एवं सत्येकेनैव तत्सिद्धावपरस्याप्रयोजकत्वादग्निहोत्रादिवन्नित्यताबोधकश्रुत्यभावात् तदर्थिनो विकल्प एव ॥ ५९ ॥

काम्यास्तु[३] यथाकामं समुच्चीयेरन्न वा पूर्वहेत्वभावात् ॥ ६० ॥

येषु तूपासनेषु भिन्नानि[४] फलान्युच्यन्ते तत्र त्वनेकफलार्थिनस्तत्तत्फलकोपासनानि समुच्चीयेरन्नविशिष्टफलत्वाभावात्, यत्र त्वेकस्यैवोपासनस्य स्वकामितानेकत्वं[५] श्रूयते तत्र तथैव चेदुपासनं करोति तदा न समुच्चीयेरन्नपि, स्वकामितेष्वेकतरस्य तदन्यफलवैशिष्ट्येनाविशिष्टफलत्वाभावादिति पूर्वहेत्वभावादितिश्लिष्टप्रयोगाभिप्रायेणोक्तमिति ज्ञेयम् ।

अथवा कामैक्ये नियतफलकानि तानि न समुच्चीयेरन्, अत्र हेतुः स्पष्टः ॥६०॥२१॥

इति तृतीयाध्याये तृतीयपाद एकविंशं विकल्प इत्यधिकरणम् ॥ २१ ॥

नाना शब्दादिभेदात् ॥ ५८ ॥ पूर्वाधिकरणेन प्रसङ्गसङ्गतिं बोधयन्तः संशयादिकमाहुः पूर्वेत्यादिना, स्वरूपादीत्यादिपदेन सपरिकरं फलमूर्धन्यं सर्वात्मभावं निरूप्येत्यर्थः, अस्या अपीत्यादि, अन्यथानादरण एकस्या अपि फलासम्भवादित्यर्थः ॥ ५८ ॥ २० ॥

॥ इति तृतीयतृतीये विंशाधिकरणम् ॥ २० ॥

विकल्पोविशिष्टफलात् ॥ ५९ ॥ पूर्वोक्ताधिकरणार्थानुकूलत्वादग्रिमाधिकरणस्यार्थस्येत्युपोद्घातसङ्गत्याधिकरणमारचयितुमाहुः पार्थक्येनेत्यादि, समुच्चय एकस्य सर्वोपासनाकर्तव्यता, विधिफलयोरुपासनाविधिमुक्तिरूपफलयोः, समानत्वात् सर्वोपासकान् प्रत्यविशिष्टत्वादित्यर्थः, अविशिष्टेत्यादि, एकैकोपासनायामेव फलपर्याप्तिदर्शनादित्यर्थः, नन्वेवं सत्यग्निहोत्रादीनामप्येकैकस्य फलश्रवणात् समुच्चयो व्यर्थं इत्यत आहुरग्निहोत्रादिवदिति ॥ ५९ ॥

काम्यास्तु यथाकामं समुच्चीयेरन्न वा पूर्वहेत्वभावात् ॥ ६० ॥ येष्वक्षमयाद्युपासनेषु, अविशिष्टेत्यादि, अनेकफलानामेकोपासनातोसम्भवादित्यर्थः, तथैवानेकफलकामनयैव, न समुच्चीयेरन्निति, समानफलकोपासनान्तरं नानुष्ठेयमित्यर्थः, पूर्वहेत्वभावात् समुच्चये पूर्वमुक्तो यो हेतुः कामितयावत्फलसिद्धिरूपस्तदभावादसत्वादित्यर्थः, श्लिष्टप्रयोगो 'न वे'त्यनेन सूत्रे श्लिष्टप्रयोगः कृतः, कामनाभेदेन समुच्चयासमुच्चयौ सूत्राभिप्रेताविल्याशयेनाहुरथवेत्यादि, कामैक्येत्यादि, तथा च नानाकामनायां नानाफलकानां समुच्चयः कार्यस्तत्रैकस्यामुपासनायां नानाफलानामविशिष्टत्वाभावादेकफलकामनायां तु तस्य फलस्य तदुपासनायामविशिष्टत्वात् समुच्चयहेतोरभावादुपासनान्तराणि न समुच्चेयानीत्यर्थः, इदमेवाहुरत्र हेतुरित्यादिना ॥ ६० ॥ २१ ॥

॥ इति तृतीयतृतीय एकविंशाधिकरणम् ॥ २१ ॥

---

१. फल° क्वचित् । २. °फलत्वात् क्वचित् । ३. पादेस्मिन् पञ्चविंशतिरधिकरणानीति मत्वाधिकरणमालाकारैरत्र द्वाविंशमधिकरणमारब्धम् । ४. भिन्नानि भिन्नानि कैवपाठो । ५. अनेकफलकत्वं कैवपाठो ।

प्रधानेषु निर्णयमुक्त्वाङ्गेषु तमाह, एकार्थसाधकानामुपासनानां भेदेनाङ्गभेदेऽप्येकतरोपासने फलैक्यादङ्गानि तत्र समुच्चीयेरन्न वेतिसंशये निर्णयमाह ।

अङ्गेषु यथाश्रयभावात् ॥ ६१ ॥ (३. ३. २२.)

उपासनाङ्गानां तदेवाश्रयः, तथा च यदङ्गं यदुपासनाश्रितं तत्रैव तस्य भाव इत्यर्थः॥६१॥ अत्र हेतुमाह ।

शिष्टेश्च ॥ ६२ ॥

तदुपासनं तत्तदङ्गविशिष्टमेव वेदे शिष्यत इति तथेत्यर्थः, चकारादतिरिक्तकरणे प्रायश्चित्तोक्तिरपि बाधिकेति सूच्यते ॥ ६२ ॥ २२ ॥

इति तृतीयाध्याये तृतीयपादे द्वाविंशमङ्गेष्वित्यधिकरणम् ॥ २२ ॥

कर्ममार्गीयोपासने निर्णयमुक्त्वा ज्ञानमार्गीयोपासने तमाह ।

समाहारात् ॥ ६३ ॥ (३. ३. २३.)

अथर्वोपनिषत्सु नृसिंहोपासनादिषु मत्स्यकूर्मादिरूपत्वेनापि स्तुतिः श्रूयते, श्रीभागवते च "नमस्ते रघुवर्याय"(श्रीमद्भा. १०.३०.२.)त्यादिरूपा स्तुतिर्व्रजनाथे, एवं सति रूपभेदेपि भगवदवतारस्याविशिष्टत्वादेकस्मिन् रूपे रूपान्तरसमाहारो दृश्यत इति सर्वरूपत्वेनैकत्रोपासनमपि साध्वित्यर्थः ॥ ६३ ॥

गुणसाधारण्यश्रुतेश्च ॥ ६४ ॥

ऐश्वर्यवीर्यादिगुणानां सर्वेष्ववतारेषु साधारण्यं श्रूयते, तेन धर्मिधर्माणामैक्यात् पूर्वोक्तं साध्वित्यर्थः ॥ ६४ ॥ २३ ॥

इति तृतीयाध्याये तृतीयपादे त्रयोविंशं समाहाराधिकरणम् ॥ २३ ॥

इति तृतीयाध्याये तृतीयपादे त्रयोविंशं समाहाराधिकरणम् ॥ २३ ॥

नन्वेवमुपासनं नित्यमुत वैकल्पिकमितिसंशयः, उक्तरीत्या नित्यत्वे प्राप्ते तन्निषेधमाह नेति ।

अङ्गेषु यथाश्रयभावः ॥ ६१ ॥ प्रसङ्गसङ्गत्याधिकरणान्तरमाहुः प्रधानेष्वित्यादि, निर्णयं समुच्चयासमुच्चयनिर्णयं, तं निर्णयं, फलैक्यात् तादृशोपासनानां फलैक्यात्, तत्रान्योपासनाङ्गान्यन्यत्रोपासने, तत्रैवेत्येवकारेणान्यत्र समुच्चयाभावो बोधितः ॥ ६१ ॥

शिष्टेश्च ॥ ६२ ॥ अत्रान्योपासनाङ्गानामन्यत्रासमुच्चये ॥ ६२ ॥ २२ ॥

॥ इति तृतीयतृतीये द्वाविंशाधिकरणम् ॥ २२ ॥

समाहारात् ॥ ६३ ॥ कर्ममार्गीयोपासने समाध्यङ्गकोपासने, तमाह सूत्रकारो निर्णयमाहेत्यर्थः, स्तुतिः श्रूयते, तथा हि 'यो वै नृसिंहो देवो भगवान् यश्च ब्रह्मा तस्मै नमो नम' इति श्रीरामोपासनायां च 'यो वै रामचन्द्रः स भगवान् ये च मत्स्यकूर्माद्यवतारास्तस्मै नमो नम' इत्येवं श्रूयत इत्यर्थः, एकस्मिन् रूपे परब्रह्मस्वरूप इत्यर्थः, तथा च परब्रह्मत्वेनोपासनायां परब्रह्मणि सर्वरूपोपसंहारेणाप्युपासने बाधकाभावोवतारित्वावच्छेदकधर्मावच्छिन्नेवताराताव-च्छेदकप्रत्येकरूपेणोपासनायां तु न सर्वरूपसमुच्चय इत्यर्थः, अत्रावतारिणि नानाविरुद्धधर्मैरुपासना कार्या न वेति-संशयः, शब्दभेदेनोपासनाभेदस्य पूर्वमुक्तत्वाच्च कार्येति पूर्वः पक्षः, समाहारात् सर्वेषां धर्मिण्येकीभावात् कार्येति सूत्रेण समाधानम् ॥ ६३ ॥

गुणसाधारण्यश्रुतेश्च ॥ ६४ ॥ धर्मिरूपेणानेकावताराणामुपासने हेत्वन्तरमिदम् ॥ ६४ ॥ २३ ॥

॥ इति तृतीयतृतीये त्रयोविंशाधिकरणम् ॥ २३ ॥

---

१. °भावः प्रदीपे ।

न वा तत्सहभावाश्रुतेः ॥ ६५ ॥ (३. ३. २४.)

किन्तु वा, विकल्प एवैवमुपासन ऐच्छिकस्तत्र हेतुमाह सहभावाश्रुतेरिति, नियमतस्तेषां रूपाणां सहभावश्रवणं चेत् स्यात् तदा स्यात् तथोपासनस्य नित्यता, न त्वेवमतो विकल्प एवेत्यर्थः ॥ ६५ ॥

दर्शनाच्च ॥ ६६ ॥

योपि रूपान्तरसमाहारपूर्वकमुपास्ते सोप्येकं रूपमुपास्यत्वेन मत्वा तत् तथोपास्त इति फलं तस्यैकस्यैव रूपस्य दर्शनं भवति न तु सर्वेषामितोपि हेतोर्विकल्प एवेत्यर्थः, एतद्दृष्टान्तेन यस्मिन् रूपे यादृग्धर्मवत्त्वं श्रूयते तादृग्धर्मविशिष्टमेवैकं[1] रूपमुपास्यमितिव्यासहृदयमिति ज्ञायते, उपासनानिर्णयान्ते दर्शनात्मकहेतूक्त्या सर्वोपासनानां भगवत्साक्षात्कारः फलमिति ज्ञाप्यते[2], माहात्म्यज्ञापनार्थं परं सर्वावताररूपत्वं यथार्थमेव कैश्चिज्ज्ञाप्यते, यथार्थत्वात् तदप्यविरोधीति[3] ज्ञेयम् ॥ २४ ॥

इति तृतीयाध्याये तृतीयपादे चतुर्विंशं न वा तत्सहभावाश्रुतेरित्यधिकरणम् ॥२४॥

इति श्रीवेदव्यासमतवर्तिश्रीवल्लभाचार्यविरचिते[4] श्रीमद्ब्रह्मसूत्राणुभाष्ये तृतीयाध्यायस्य तृतीयः पादः ॥

न वा तत्सहभावाश्रुतेः ॥ ६५ ॥ प्रसङ्गसङ्गत्याधिकरणमवतारयन्ति नन्वित्यादि, एवमुपासनमेकस्मिन्नवतारे परब्रह्मत्वेनोपासनीये सर्वावतारस्वरूपाणां क्रमेण समाहारेणाभेदेनोपासनं, नित्यं दर्शपूर्णमासाग्निष्टोमानां क्रमिकानुष्ठानवत् सर्वेषां क्रमिकसमाहारेणोपासनं नित्यं, वैकल्पिकमैच्छिकविकल्पेनानुष्ठेयं समाहारांश इत्यर्थः, नित्यत्वे प्राप्ते सर्वावतारेषु गुणानां साधारण्यादुपासने सर्वाभेदांशे नित्यत्वे प्राप्त इत्यर्थः, सौत्रवाशब्दस्यार्थः किन्त्विति, सिद्धान्तमाहुर्विकल्प इत्यनेन, ऐच्छिक इतरावताराभेदांश ऐच्छिको विकल्प इत्यर्थः, नियमत इति, तथा च दर्शपूर्णमासाग्निष्टोमादीनां नित्यतया यथैकस्मिन् समुच्चयः क्रमेण कर्तव्यताबोधकोक्ति तथात्रापि क्रमेण सर्वरूपाभेदेनोपासन यदि वाचनिकं स्यात् तदा तथोपासनं नित्यं स्यादित्यर्थः ॥ ६५ ॥

दर्शनाच्च ॥ ६६ ॥ मत्वा निश्चित्य, तदेकं रूपं, तथा सर्वभेदेन, एकस्यैव धर्मित्वेन मुख्योपास्यतया सम्मतस्यैव, माहात्म्येत्यादि, परब्रह्मणः सर्वात्मरूपमाहात्म्यस्य भक्तिपूर्वार्धस्वरूपताज्ञापनायेत्यर्थः, कैश्चिदुपनिषद्वाक्यैः ॥ ६६ ॥ २४ ॥

इति तृतीयतृतीये चतुर्विंशाधिकरणम् ॥ २४ ॥

इति श्रीमद्गोस्वामिश्रीवल्लभजीसुतगोपालजीकृते ब्रह्मसूत्राणुभाष्यपदप्रदीपे तृतीयाध्यायस्य तृतीयश्चरणः ॥ ३ ॥

---

१. एकैकं के । २. ध्वन्यते कपापुगो । ३. अविरोधात् कपु । ४. इति श्रीविष्णुस्वामि° पुउं ।

अथ तृतीयाध्यायस्य चतुर्थः पादः ।

उपासनाभेदेऽप्युपास्याभेदाच्छाखान्तरोक्तधर्माणामप्युपसंहारः कर्तुमुचित इति पूर्वपादे निरूपितमिति तन्न्यायेनोत्तरकाण्डप्रतिपाद्यब्रह्मफलकसर्वात्मभावेपि पूर्वकाण्डप्रतिपादितकर्मणामुपसंहारः प्राप्नोति न वेत्यधुना विचार्यते, विधिपक्षे तत्सहकृतस्यास्य फलसाधकत्वमिति सिध्यति, निषेधपक्षे तु केवलस्येतीममेव पक्षं सिद्धान्तत्वेनाह पुरुषार्थ इत्यादिना, सिद्धान्ते ज्ञाते तत्र पूर्वपक्षसम्भव इत्यादौ तमेवाह ।

पुरुषार्थोतःशब्दादिति बादरायणः ॥ १ ॥ (३. ४. १.)

अतः सर्वात्मभावादेव केवलात् पुरुषार्थः सिध्यति । कुतः? शब्दात्, श्रुतेरित्यर्थः, श्रुतिस्तु "नायमात्मा प्रवचनेने"(कठोप. २. २२.)त्युपक्रम्य "यमेवैष वृणुत" (कठोप. २. २२.) इत्यादिका "ब्रह्मविदाप्नोति पर" (तै. ब्र.) मित्यादिका "तमेवं विद्वानमृत इह भवति"[1] (नृ. पू. १. ६.) सनत्कुमारनारदसंवादे "यत्र नान्यत् पश्यती" (छान्दो. ९. २४. १.)त्याद्यात्मिका छान्दोग्यश्रुतिश्च, एतदादिश्रुतिषु पूर्वोक्तरीत्या केवलस्यैव भगवद्भावस्य फलसाधकत्वं श्रूयत इति तथा, अत्र "फलमत उपपत्ते" (ब्र. सू.३.२.३८.) रित्यत्रैवोपपत्तिं[2] हेतुत्वेनानुक्त्वा श्रुतिपदं चानुक्त्वा शब्दपदं यदुक्तवांस्तेन श्रुतिस्मृत्यात्मकः सर्वोपि प्रमाणशब्दो हेतुत्वेन व्यासाभिमत इति ज्ञायते, तेन "केवलेन हि भावेन गोप्यो गावः खगा मृगाः येन्ये मूढधियो नागाः सिद्धा मामीयुरञ्जसा यन्न योगेन साङ्ख्येन दानव्रततपोध्वरैः व्याख्यास्वाध्यायसन्न्यासैः प्राप्नुयाद् यत्नवानपी" (श्रीमद्भाग. ११.१२.८–९.) त्यादिरूपा स्मृतिरपि सङ्गृह्यते, एतेन श्रुत्यादिप्रमाणवादिनामिदमेवाभिमतं तद्विरुद्धवादिनामितोन्यदिति तेषामप्रामाणिकत्वं ज्ञाप्यते, अत एव स्वनाम गृहीतं, स्वस्य वेदव्यासकर्तृत्वेन तत्रैव यतो भरः ।

अपरं च, वैदिकसिद्धान्ते भगवत्स्वरूपस्यैव स्वतन्त्रपुरुषार्थत्वात् प्राप्ततत्स्वरूपाणां मुक्त्यनिच्छाकथना"न्मुक्तोपसृप्यव्यपदेशाच्च" (ब्र. सू. १. ३. २.) मुक्तेरपरमपुरुषार्थत्वात्[3] सा भवतु नामान्यैः साधनैः, वस्तुतः परमपुरुषार्थो य उक्तरूपः स तु सर्वात्मभावेनैवेतिज्ञापनाय फलपदमनुक्त्वा पुरुषार्थपदमुक्तं, एवं सत्यस्य सूत्रस्यार्थान्तरमपि व्यासाभिमतमिति ज्ञायते, तथा सत्ययं श्लिष्टः प्रयोगः, तथा हि पुरुषार्थो भगवानेव, कुतः? अतःशब्दात्, अतःपदविशिष्टश्रुतिवाक्यादित्यर्थः, तैत्तिरीयोपनिषत्सु पठ्यते "तःपरं नान्यदणीयस२ हि परात् परं यन्महतो महान्तं यदेकमव्यक्तमनन्तरूपं विश्वं पुराणं तमसः परस्ता"(महानारा. १. १.)दिति ॥ १ ॥

पुरुषार्थोत शब्दादिति बादरायणः ॥१॥ प्रसङ्गसङ्गत्या चरणान्तरमारचयितुमाहुरुपासनेत्यादि, उपास्याभेदाद् ब्रह्मत्वात्, उपसंहारः समुच्चयेनानुष्ठान, नतु पूर्वकाण्डोक्तकर्माणि, अस्य सर्वात्मभावस्य, केवलस्य पूर्वकाण्डीयकर्मासहकृतस्य सर्वात्मभावस्य परब्रह्मप्रापकत्वं, अत एवोक्तेर्थे प्रामाण्यातिशयादेव, तत्रैव वेदप्रामाण्य एव, मुक्त्यनिच्छा नृसिंहादिरूपैर्मुक्तिवरदाने कृतेपि भक्तानामग्रहणेच्छा, अन्यैः सर्वात्मभावातिरिक्तैः, य उक्तरूपः 'सोश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिते'त्यनेनोक्तपुरुषोत्तमप्राप्तिरूप, एवं सत्युक्तार्थस्य सूत्रतात्पर्यविषयत्वे सति, अत.पदविशिष्टां श्रुतिमाहुरत.परमित्यादिना, सा 'ह्यत पर नान्यदणीयस२ हि परात् पर यन्महतो महान्त यदेकमव्यक्तमनन्तरूप'मित्यादि ॥ १ ॥

---

१. भवतीति के । २ अत्रैवोप° क । ३. अपुरुषार्थत्वात् के ।

अथात्र प्रत्यवतिष्ठते ।

शेषत्वात् पुरुषार्थवादो यथान्येष्विति जैमिनिः ॥ २ ॥

विष्णोरिज्यत्वेन कर्मशेषत्वात् तत्स्वरूपज्ञानपूर्वको यागः फलातिशयहेतुरिति तन्माहात्म्यमुच्यत इत्यर्थवादरूपं तत्, अत्र दृष्टान्तमाह यथान्येष्विति, अन्येषु द्रव्यसंस्कारकर्मसु "यस्य पर्णमयी जुहूर्भवति न पापꣳ श्लोकꣳशृणोति" (तै. सं. ३. ५. ७.) "यदाङ्क्ते चक्षुरेव भ्रातृव्यस्य वृङ्क्ते यत् प्रयाजानुयाजा इज्यन्ते कर्म वा एतद् यज्ञस्य क्रियते वर्म यजमानस्य भ्रातृव्याभिभूत्या" (तै. सं. २. ६. १.) इत्येवंजातीयका फलश्रुतिरर्थवादस्तद्वदित्यर्थः ॥२॥

ननु "तमेव विदित्वा मुनिर्भवत्येतमेव प्रव्राजिनो लोकमीप्सन्तः प्रव्रजन्ति" (बृह. ६. ४. २२.) तदग्रे च "ते ह स्म पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थाय भिक्षाचर्यं चरन्ती" (बृह. ६. ४. २२.) तिश्रुतिर्भगवज्ज्ञानवतः सर्वत्यागं वदतीति न त्वदुक्तं साधीय इत्यत उत्तरं पठति ।

आचारदर्शनात् ॥ ३ ॥

ब्रह्मविदामपि वसिष्ठादीनामग्निहोत्रादिकरणं जैमिनिः पश्यति तदाचारं प्रामाणिकं च मनुत इति तन्मतमनुवदन्निममप्यनूक्तवान् व्यासः, ब्रह्मविदां त्यागावश्यकत्वे गार्हस्थ्यमेतेषां न स्यादितिभावः, उक्तश्रुतिस्तु कर्मण्यशक्तानां तेषां त्यागमनुवदति ॥ ३ ॥

तच्छ्रुतेः ॥ ४ ॥

"लोकैषणायाश्च व्युत्थाये"(बृह. ६.४.२२.)तिश्रुतेर्लोकसङ्ग्रहार्थं तत्करणमिति न वक्तुं शक्यं, ब्रह्मविदः कर्माचारनिरूपकश्रुतेरित्यर्थः, सा च "जनको ह वैदेहो बहुदक्षिणेन यज्ञेनेजे" (बृह. ४. ११.) इत्यादिरूपा, तथा च ज्ञानेनैवार्थसिद्धिश्चेत् स्यात् तदा तद्वत आयाससाध्ये कर्मणि प्रवृत्तिर्न स्यादितिभावः ॥ ४ ॥

शेषत्वात् तु पुरुषार्थवादो यथान्येष्विति जैमिनिः ॥ २ ॥ सूत्रमवतारयन्त्यथात्रेत्यादि, पूर्वसिद्धान्तसूत्रे सर्वात्मभावस्यैव साधनत्वं पुरुषोत्तमप्राप्तेरेव फलत्वमित्युक्तं छान्दोग्ये च कर्माङ्गोपासनानामेव पूर्वमुत्क्रान्तत्वादन्योपासनानामपि कर्मशेषतयैव फलोपयोगित्वं, इत्थं च पुरुषोत्तमस्यापि कर्मशेषतयैव फलप्रदत्वं न तु सर्वात्मभावमात्रात् कर्मनैरपेक्ष्यतयेति जैमिनिः प्रत्यवतिष्ठत इत्यर्थः, कर्मशेषत्वाद् विष्णोरिज्यात्मकयज्ञशेषत्वादित्यर्थः, तद् विष्णुः, तन्माहात्म्यं फलप्रदत्वायुक्तिभिर्विष्णुमाहात्म्यं, तच्छ्रुतिषु विष्णुमाहात्म्यकथनं, द्रव्यप्रशंसामाहुः 'प्रयाजे'त्यादिना, 'यत् प्रयाजानुयाजा इज्यन्ते 'कर्म वा एतद् यज्ञस्य क्रियते वर्म यजमानस्य भ्रातृव्याभिभूत्या' इत्यादि, इदं च जैमिनिना चतुर्थतृतीयपाद उक्तं 'द्रव्यसंस्कारकर्मसु परार्थत्वात् फलश्रुतिरर्थवादः स्या'दिति ॥ २ ॥

आचारदर्शनात् ॥३॥ सूत्रचतुष्टयावतरणमाहुर्ननु 'तमेवे'त्यादिना, श्रुतिभिर्व्युत्थाय त्यागं कृत्वा, त्वदुक्तं जैमिन्युक्तं, उत्तरं जैमिन्यभिप्रेतमुत्तरमाचारदर्शनात्, तन्मतं जैमिनिमतं, कर्मण्यशक्तानामन्धपङ्ग्वादीनामित्यर्थः ॥ ३ ॥

तच्छ्रुतेः ॥ ४ ॥ ननु लोकैषणाश्रुते'स्तमेवे'त्यादिश्रुतेश्च कर्मानधिकारिपरत्वात् कर्मकरणश्रुतेरपि लोकसङ्ग्रहार्थत्वमेव स्यात्र तु पारमार्थिकत्वफलार्थत्वमत आहुर्लोकेत्यादि, श्रुतेः श्रुतेरेवेत्यर्थः, सा च श्रुतिश्च, तद्वतो ब्रह्मज्ञानवतः ॥ ४ ॥

---

१. °तिष्ठन्ते कं। २. न त पापुं। ३. लोकं पा। ४. यद् इमं कं। ५. °नू° कपुगो। ६. वर्म द वा कंपु, वर्म वा कखरा। ७. वर्म क, इमं कंपु। ८. अथ मिश्रा° कंपरागो। ९. पश्यतीति बपापुंगो। १०. प्रामाणिकमिति कखंबरापुगो। ११. प्रदीप एव सुगंन्यत्र।

समन्वारम्भणात् ॥ ५ ॥

"तं विद्याकर्मणी समन्वारभेते" (बृह. ६. ४. २.) इतिश्रुतिः फलारम्भे विद्याकर्मणोः
साहित्यं दर्शयतीति न स्वातन्त्र्यं विद्यायाम् ॥ ५ ॥

तद्वतो विधानात् ॥ ६ ॥

"ब्रह्मिष्ठो ब्रह्मा दर्शपूर्णमासयोस्तं वृणीत" (आप.श्रौत.३.१८.१.) इतिकल्पश्रुत्या ब्रह्मविदो
ब्रह्मत्वेन वरणं विधीयत इति ब्रह्मज्ञानस्यार्त्विज्याधिकारसम्पादकत्वात् कर्मशेषत्वमेवेत्यर्थः ॥६॥
ननु "यदहरेव विरजेत् तदहरेव प्रव्रजेद् गृहाद् वा प्रव्रजेद् वनाद्"(जाबा. ४.)वेत्यादि-
श्रुतिभ्यो विहितत्वाविशेषात् कर्मतत्त्यागयोरैच्छिको विकल्पोऽङ्गीकार्योऽतो न शेपिशेषभाव
इत्यत उत्तरं पठति।

नियमाच्च ॥ ७ ॥

"आश्विनं धूम्रललाममालभेत यो दुर्ब्राह्मणः सोमं पिपासे" (तै. सं. २. १. १०.) "ऐन्द्राग्नं
पुनरुत्सृष्टमालभेत य आ तृतीयात् पुरुषात् सोमं न पिबेद् विच्छिन्नो वा एतस्य सोमपीथो यो
ब्राह्मणः सन्ना तृतीयात् पुरुषात् सोमं न पिबति" (तै. सं. २. १. १५.) "यावज्जीवमग्निहोत्रं
जुहुया" ( ) दित्यादिश्रुतिभ्यो यथा कर्मकरणे नियमः श्रूयते न तथा तत्त्याग
इति नोक्तपक्षः साधुरित्यर्थः, चकारा "न्नियतस्य तु सन्न्यासः कर्मणो नोपपद्यते मोहात् तस्य
परित्यागस्तामसः परिकीर्तित" (भग. १८. ७.) इत्यादिरूपा स्मृतिः समुच्चीयते ॥ ७ ॥
त्यागविधिरशक्तविषय इत्युक्तमिति प्राप्ते प्रतिवदति।

अधिकोपदेशात् तु बादरायणस्यैवं तद्दर्शनात् ॥ ८ ॥

तुशब्दः पूर्वपक्षं व्यवच्छिनत्ति, यदुक्तं "शेषत्वात् पुरुषार्थवाद" (ब्र. सू. ३. ४. २.) इति
तन्नोपपद्यते, कुतः? अधिकोपदेशात्, कर्मसाम्यमपि न वक्तुं शक्यं यत्र तत्र तच्छेषत्वं दूरापास्तं,
यत ईश्वरः कर्मणः सकाशादधिक उपदिश्यते, तथा हि "स वा अयमात्मा सर्वस्य वशी सर्वस्येशानः
सर्वस्याधिपतिः सर्वमिदं प्रशास्ति यदिदं किञ्च स न साधुना कर्मणा भूयान्नो एवासाधुना
कनीया"(बृह. ६. ४. २२.)नित्युपक्रम्याग्रे पठ्यते "तमेतं वेदानुवचनेन विविदिषन्ति ब्रह्मचर्येण
तपसा श्रद्धया यज्ञेनानाशकेन चैतमेव विदित्वा मुनिर्भवत्येतमेव प्रव्राजिनो लोकमभीप्सन्तः
प्रव्रज"(बृह. ६. ४. २२.)न्तीत्यादि[6], एवं सति यज्ज्ञानसाधनत्वं यज्ञे तस्य यज्ञशेषत्वं कथं
स्यात्? किन्तु यज्ञस्य तद्वेदनशेषत्वं, एतेनेज्यत्वेन तच्छेषत्वं प्रत्युक्तं वेदितव्यं, तज्ज्ञानस्य

समन्वारम्भणात् ॥ ५ ॥ तं फलार्थकर्मारम्भम् ॥ ५ ॥
तद्वतो विधानात् ॥ ६ ॥ स्फुटार्थमिदम् ॥ ६ ॥
नियमाच्च ॥ ७ ॥ न शेपिशेषभावो न ज्ञानस्य कर्माङ्गत्वमित्यर्थः, उत्तरं पठति सूत्रकारो जैमिन्युत्तर-
मनुवदतीत्यर्थः, कर्मकरणनियममुपपादय'न्त्याश्विनमि'त्यादिना, नोक्तपक्षो ज्ञानस्य स्वातन्त्र्येण पुरुषार्थसाधक-
त्वपक्षः, नियतस्य नियततया नित्यतया वेदबोधितस्य ॥ ७ ॥
अधिकोपदेशात् तु बादरायणस्यैवं तद्दर्शनात् ॥ ८ ॥ इति प्राप्त इति पूर्वसूत्रैः पूर्वपक्षे प्राप्ते,
प्रतिवदति सूत्रकारः समाधत्त इत्यर्थः, पूर्वपक्षं जैमिनिपूर्वपक्षं, यत्र ब्रह्मणि, तच्छेषत्वं कर्मशेषत्वं,
यज्ज्ञानसाधनत्वं यज्ञादिकर्मणि ब्रह्मज्ञानशेषत्वं, तस्य ब्रह्मणो ज्ञानस्य, एतेन यज्ञादिना साधनानां
ब्रह्मज्ञाने शेषत्वाङ्गीकारेण, तच्छेषत्वमिज्यादियागशेषत्वं, ब्रह्मज्ञानस्य कर्माङ्गत्वाभावे युक्तिमाहुस्तज्ज्ञानस्ये-

---

१. °शेषमे° क। २. यथा तृतीयात् कै। ३. उद्दिश्यते क पु। ४. न सः कै। ५. भवतु कै। ६. °दिना पुं।

यागपूर्वाङ्गत्वात् तद्विशिष्टस्य ब्रह्मज्ञानसाधनत्वात्, न च पूर्वं सामान्यत इज्यज्ञानमासीद् यज्ञेन विशेषतो ज्ञाने सति पुनर्यज्ञकरणे पूर्णं कर्मफलं भावीति न तदशेषत्वमिति वाच्यं, "तमेव विदित्वा मुनिर्भवत्येतमेव प्रव्राजिनो लोकमभीप्सन्तः प्रव्रजन्ती"(बृह. ६. ४. २२.)तिश्रुतेस्तद्वेदनस्य गार्हस्थ्यविरोधित्वेन तदसम्भवात्, यश्च साध्वसाधुकर्मफलसम्बन्धरहितस्तस्य कर्तृत्वेन तथात्वमनुपपन्नमतो जीवात्मन एव तथात्वं न तु परस्य, न चैतयोर्वास्तवाभेदान्नैवमिति वाच्यं, वास्तवाभेदाज्जीवेप्युक्तश्रुतिभ्यस्तथात्वस्य सुवचत्वात्, वास्तवाभेदस्य पूर्वमेव निरस्तत्वात् तमादाय ये पूर्वपक्षास्ते पूर्वपक्षा एवेत्यलमुक्त्या, "न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुः परेण नाकं निहितं गुहायां विभ्राजते यद् यतयो विशन्ती"(महा.नारा.१०.५.)तिश्रुत्या 'कर्मप्रजाधनै'र्मोक्षाप्राप्तिमुक्त्वा 'त्यागेन' तत्प्राप्तिरुच्यते, त्यागविषयस्यान्यस्यानुक्त्या सान्निध्यात् 'कर्मा'दीनामेव त्यागोभिप्रेतः, तथा च 'मुक्तोपसृप्य'त्वाद् भगवत उक्तसाधनेन मुक्ताः सन्तो'नाकं' 'परेण' विद्यमानमपि भक्त्या 'गुहायां' 'विभ्राजते' तत्, "यस्मात् परं नापरम"(महा.नारा.१०.५.)त्यादिनोपक्रान्तत्वात् पुरुषोत्तमस्वरूपं 'यतयो' विरहभावेन तद्विना स्थातुमशक्तास्तत्प्राप्त्यर्थं यतमाना 'विशन्ती'ति भक्तिमार्गीयाणां फलमुक्तं, अग्रे 'वेदान्तविज्ञाने'(महा.नारा.१०.६.)त्यृचा ज्ञानमार्गीयाणां फलमुक्तं, अन्यथा पौनरुक्त्यं स्यात्, एवं कर्मज्ञानाभ्यामधिको भक्तिमार्गस्तत्प्राप्यः पुरुषोत्तमश्च श्रुतावुपदिश्यत इति तदेकप्रमाणवादिनो बादरायणस्य मतमप्येवं जैमिनिमता-

त्यादिना, तद्विशिष्टस्य तस्येज्यत्वेन यद् ब्रह्मज्ञानं तद्विशिष्टस्य कर्मण इत्यर्थः, इत्थं च ब्रह्मज्ञानाङ्गकर्मणो ब्रह्मज्ञानस्य कारणतायामात्माश्रयप्रसङ्गोन्योन्याश्रयप्रसङ्गो चेतिभावः, कर्मरूपमेकमन्तराकृत्य ब्रह्मज्ञानस्य स्वस्मिन् सापेक्षत्वाद्, ननु 'यदेव विद्यया श्रद्धयोपनिषदा वा करोति तदेव वीर्यवत्तरं भवती'तिश्रुतेः पूर्वं यज्ञाङ्गभूतं ब्रह्मज्ञानं शाब्दं तादृशज्ञानाङ्गकयज्ञोत्तरं जातं ज्ञानं ब्रह्मसाक्षात्काररूपं तत्साक्षात्काराङ्गकयज्ञकरणानन्तरं च मोक्षो जनकादीनामिति पूर्वोत्तरयोर्ज्ञानयोर्भेदात् स्वस्मिन् सापेक्षाभावान्नात्माश्रयदोष इत्यत आहुर्न चेत्यादि, पूर्वं मोक्षव्यवहितयज्ञात् पूर्वं, सामान्यतः शाब्दरूपमिज्यज्ञानं ब्रह्मज्ञानं, यज्ञेन द्वितीययज्ञेन स्वल्पव्यवहितेन, विशेषतो ज्ञाने ब्रह्मसाक्षात्काररूपे ज्ञाने, न तद्शेषत्वं ब्रह्मज्ञानस्य न कर्मशेषत्वमित्यर्थः, तदसम्भवाद् ब्रह्मज्ञानिनः कर्मकरणासम्भवादित्यर्थः, न'त्वहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्तत' इतिवाक्यैर्भगवत एव यज्ञकरणसम्भवाद् भगवज्ज्ञानस्य च कर्माङ्गत्वसम्भवाद् ब्रह्मज्ञानस्य कर्माङ्गत्वमव्याहतमेवेत्यत आहुर्यश्चेत्यादिना, यश्चेश्वरश्च, तस्येश्वरस्य, कर्तृत्वेन यज्ञादिकर्मकर्तृत्वेन, तथात्वं मोक्षकामनया क्रियमाणयागे मोक्षकामनावतो ब्रह्मज्ञानस्य यज्ञाङ्गत्वं, अनुपपन्नं तत्करणस्य लोकसङ्ग्रहार्थत्वेन मोक्षार्थकरणमनुपपन्नमित्यर्थः, तथात्वमिति, तथात्वं मोक्षार्थं यज्ञकरणं, यज्ञे जीवीयब्रह्मज्ञानस्याङ्गत्ववचनं कर्तव्यमित्यर्थः, तच्च दूषितं 'तदसम्भवा'दितिपूर्वग्रन्थेनेतिभाव', एतयोर्जीवेश्वरयोः, नैवं जीवीयब्रह्मज्ञानस्य कर्माङ्गशेषत्वं नेत्यर्थ', इति न वाच्यमितिसमुदितार्थः, वादिपक्षहेतुभूतं वास्तवाभेदं निरूपयन्ति वास्तवेत्यादिना, उक्तश्रुतिभ्यो जीवस्य ब्रह्माभेदबोधकश्रुतिभ्यः, तथात्वस्य ब्रह्मतज्ज्ञानस्येव जीवीयब्रह्मज्ञानस्यापि कर्मशेषत्वस्य, वास्तवाभेदं निरूपयन्ति वास्तवाभेदस्येत्यादिना, वास्तवाभेदो नाम घटाकाशमहाकाशयोरिवौपाधिकभेदाभाव', स च पूर्वमेव द्वितीयाध्यायतृतीयचरणे'ंशो नाना व्यपदेशादि'त्यधिकरणे निरस्त इतिभाव', भक्त्यैव पुरुषोत्तमप्राप्तिरितिविशेषप्रतिपादिकां बृहन्नारायणोपनिषद 'णोरणीयानि'त्यनुवाकस्थां श्रुतिमाहु'र्न कर्मणा न प्रजया धनेन त्यागेनैकेमृतत्वमानशु'रित्यादिकां, नाकं मोक्षसुखं, परेण कृतं सम्पादितमिति तृतीयार्थं, तद् भक्तिलभ्यं पुरुषोत्तमस्वरूपं, यस्मात् परं'ब्रह्मविदाप्नोति पर'मित्यादिश्रुतिबोधनात् परमित्यर्थः फलमुक्तं तादृशयतीनां फलमुक्तमित्यर्थं, अग्र एतत्फलनिरूपकश्रुतेरग्रे, अन्यथोभाभ्यां श्रुतिभ्यामेकफलनिरूपणे, तदेकेत्यादि, श्रुत्येकप्रमाणवादिन इत्यर्थ', बादरायणस्येति, अनेन

१. °स्य तस्य गो। २. भवतीति वैंयपागो। ३. अनीप्सन्त वैंपु। ४. साधू इति प्रमत्तः पाठ क्वचिद्। ५. °मुक्त्वा बपा। ६. तद् कैंगो। ७. °विषयस्यानुक्त्या यैंगो। ८. सान्निध्यकर्मा° गो। ९. यद् "यस्मात् बपा। १०. °प्रमाण° कै।

इधिकमित्यर्थः, एवं श्रुत्वा परमतं निरस्य शिष्यैर्विश्वासार्थं स्वानुभवमपि प्रमाणयति तद्दर्शना-
दिति, उक्ताधिक्यवत्त्वेनैव भगवतो भक्तिमार्गस्य चानुभवादित्यर्थः, श्रुतयोधिकमात्मानं
दर्शयन्तीति न व्याख्यानं, उपदेशपदेन पौनरुक्त्यापत्तेः, तन्मतमनिरस्य तस्मात् स्वमत आधिक्य-
मात्रोक्त्या निष्कामकर्मणश्चित्तशुद्धिहेतुत्वेन परम्परया ज्ञानमार्गोपयोगाङ्गीकारः सूच्यते, पुष्टि-
भक्तिमार्गे तु सोपि न, "यन्न योगेन" (श्रीमद्भाग. ११. १२. ९.)तिवाक्यात्, एवं सति क्व
कर्मशेषत्वगन्धोपि ब्रह्मणीतिभावः ॥ ८ ॥

तुल्यं दर्शनम् ॥ ९ ॥

यदुक्तं 'माचारदर्शनात् कर्मशेषत्वं ब्रह्मण' इति तदपि न साधीयः, तुल्यं यतो दर्शनं,
ब्रह्मविदां शुकतृतीयजन्मवदार्षभादीनां त्यागदर्शनात्, एतेन यद्विदां कर्मत्यागस्तस्य कर्मशेषत्वं
कथं शङ्कितुमपि शक्यमितिभावः सूच्यते, एतेन 'कर्मण्यशक्तान् प्रति त्यागविधि'रिति निरस्तं,
शुकादीनामतथात्वात् ॥ ९ ॥

ननु "जनको ह वैदेह" (बृह. ५. १. १.) इतिश्रुतिसाहाय्यादाचारदर्शनं त्यागदर्शनाद-
धिकबलमित्यत उत्तरं पठति ।

असार्वत्रिकी ॥ १० ॥

ब्रह्मविदां सर्वेषामेतदाचारं चेन्निरूपयेच्छ्रुतिस्तदा त्वदुक्तं स्यात्, न त्वेवं, यत एतादृशी
श्रुतिर्ब्रह्मवित्सु सर्वेषु न श्रूयते, तथा हि, "एतद्ध स्म वा एँतद्विद्वांस आहुर्ऋषयः कावषेयाः किमर्था
वयमध्येष्यामहे किमर्था वयं यक्ष्यामहे एतद्ध स्म वै तत् पूर्वे विद्वांसोग्निहोत्रं न जुहवाञ्चक्रिर
एतं वै तमात्मानं विदित्वा ब्राह्मणाः पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थायाथ
भिक्षाचर्यं चरन्त्येतावदरे खल्वमृतत्वमिति होक्त्वा याज्ञवल्क्यः प्रवव्राज" (बृह. ६. ५. १५.)
जेत्यादिश्रुतयो बह्वचस्तद्विदां कर्मत्यागमेवानुवदन्ति, अतस्त्यागपक्ष एँव बलवान् ॥ १० ॥

सूत्रे बादरायणपदतात्पर्यमुक्तं, एवं पूर्वोक्तरीत्या श्रुत्युक्तपरत्वव्याख्यानेन, परमतं परपदेन शारीराज्जीवात् परत्व-
मितिश्रुत्यर्थवक्तुर्मतं, उक्तेत्यादि, उक्तौ यौ कर्मज्ञानमार्गौ तयोः फले च तदपेक्षयाधिक्यवत्त्वेनेत्यर्थः, श्रुतयो 'न
कर्मणा' 'परेण नाकं' 'ब्रह्मविदाप्नोति पर'मित्याद्याः श्रुतयः, अधिकमक्षरापेक्षयाधिकं, आत्मानं पुरुषोत्तमं,
न व्याख्यानं शारीरजीवापेक्षयात्मन आधिक्यं श्रुत्या बोध्यत इति 'न कर्मणे'त्यादिश्रुत्याप्रेतन'वेदान्तविज्ञाने'ति-
श्रुत्या च मुक्तिरेव प्रतिपाद्यत इति च व्याख्यानं न वाच्यमित्यर्थः, तत्र हेतुमाहुरुपदेशपदेनेत्यनेन, तथा
च 'न कर्मणे'त्यादिश्रुतिष्वप्युपदेशोप्रेतन'वेदान्तविज्ञाने'तिश्रुतावपि मोक्षोपदेश इतिहेतोरिदं व्याख्यानं न
समीचीनमित्यर्थः, तन्मतमनुपदमुक्तं वादिमतं, अनिरस्य सूत्रकारेणानिरस्य, परम्परयेत्यादि, चित्तशुद्धिद्वारा
ज्ञानोत्पादनेन मोक्षे कर्मोपयोगाङ्गीकार इत्यर्थः, सोपि चित्तशुद्धिद्वारा कर्मोपयोगोपि, कर्मशेषत्वगन्धः
परब्रह्मणः कर्मशेषत्वसम्भावना ॥ ८ ॥

तुल्यं दर्शनम् ॥ ९ ॥ ब्रह्मण इतिपदेन ब्रह्म ब्रह्मविद्या चेतिद्वयं बोध्यं, आर्षभादीनामृषभप्रभृतीना-
मित्यर्थो बोद्धव्यः, त्यागदर्शनात् कर्मत्यागदर्शनात्, यद्विदां ब्रह्मविद्यावतां, तस्य ब्रह्मविद्याया ब्रह्मणश्चेत्यर्थः,
एतेन ब्रह्मविद्यावद्भिः शुकादिभिरतिसमर्थैः कर्मत्यागेन, अतथात्वात् समर्थत्वाभावात् ॥ ९ ॥

असार्वत्रिकी ॥ १० ॥ सूत्रमवतारयन्ति नन्वित्यादिना, एतादृशी जनकाचारप्रदर्शकश्रुतिसदृशी,
एतद्विद्वांसो ब्रह्मविद्यावन्तः, त्यागपक्ष एवेति, एवकारेणाचारपक्षस्य बलं व्यवच्छिद्यते ॥ १० ॥

---

१. श्रुत्वा पा अशुद्धम् । २. शिष्येति लुप्तं पा । ३. शिष्य उक्ताधिक्य° पा अशुद्धम् । ४. परम्परा°
क्यपापुंगो । ५. °कारोत्र कैखपागो । ६. न त्वेवं के । ७. तद् कखपापु । ८. आहु ऋषयः सर्वत्र ।
९. जुहवा° घपुं । १०. लुप्तं घैखपागो । ११. एवं कं अशुद्धम् ।

ननु ब्रह्मवित्त्वाविशेषेप्येकेषां कर्मकृतिरेकेषां तत्त्याग इतिविभागः कुत इत्याशङ्क्य तत्र हेतुमाह।

विभागः शतवत् ॥ ११ ॥

"एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ती"(बृह. ६. ३. ३२.)तिश्रुतेर्मानुषानन्दमारभ्य ब्रह्मानन्दपर्यन्तं ये गणिता आनन्दास्ते सर्वे पुरुषोत्तमानन्दात्मका एव, एवं सति येषु यावानानन्दो दत्तोस्ति तावन्तं तं निरूपयन्त्यधिकारतारतम्येन तद्दानमितिज्ञापनाय शतोत्तरं शतोत्तरमानन्दं श्रुतिर्न्यरूपयत्, अत एव पुरुषायुःसङ्ख्यासमानसङ्ख्ययैवोत्कर्ष उक्तः, तेन पुरुषधर्मस्याधिकारस्यैवोत्कर्षः सूच्यते, एवं प्रकृतेप्यन्यभावराहित्यतारतम्येन भगवद्भावतारतम्यं, अत्र त्वनुग्रह एवाधिकाररूप इति तदुत्कर्षे त्यागस्तदनुत्कर्षे नेत्यर्थः ॥ ११ ॥

यच्चोक्तं "तद्वतो विधाना" (ब्र. सू. ३. ४. ६.)दिति तत्राह।

अध्ययनमात्रवतः ॥ १२ ॥

यदुक्तं "ब्रह्मिष्ठो ब्रह्मे"(आप.श्रौत.३.१८.१.)त्यादि तत्र 'ब्रह्म'शब्देन वेद एवोच्यते न तु परः, तथा च तं ब्रह्मत्वेनाविकृतशब्दरूपत्वं ज्ञात्वा सततं तदध्ययनमात्रं यः करोति न तु तेन किञ्चित् कामयते तस्याधिकारो ब्रह्मत्वार्त्विज्य इत्युच्यत इति न ब्रह्मज्ञानस्य कर्मशेषत्वं, प्रत्ययस्यातिशायनार्थकत्वादतिशयेन ब्रह्मरूपस्तदैव भवतीति युक्तं तस्य तदार्त्विज्यं, एवं सति ब्रह्मपदं ब्राह्मण्यपरमपि सङ्गच्छते।

अथ वा वेदाध्ययनमात्रवतः कर्मण्यधिकारो न तु ब्रह्मविदोपीत्यर्थः, न च तदन्तःपातित्वेन वेदान्तानामप्यध्ययनस्यावश्यकत्वे तत्प्रतिपाद्यब्रह्मज्ञानस्याप्यवर्जनीयत्वात् तद्वत एव तत्राधिकार इति वाच्यं, शब्दपरोक्षज्ञानस्य ब्रह्मज्ञानत्वाभावात्, न हि 'सिता मधुरे'तिशाब्दज्ञानमात्रवांस्तन्माधुर्यज्ञो भवति, तथा सति पित्तोपशमादिकं तत्कार्यमपि स्यात्, नत्वेवं, अत एव छान्दोग्ये सनत्कुमारेण 'यद् वेत्थ तेन मोपसीदे'(छान्दो. ९. १. १.)त्युक्तो नारद ऋग्वेदमारभ्य सर्पदेवजनविद्यापर्यन्तं स्वाधीतमुक्त्वाह "सोहं मन्त्रविदेवास्मि नात्मवि"(छान्दो. ९. १. ३.)दित्यतोपरोक्षब्रह्मज्ञानमेव ब्रह्मज्ञानमुच्यते, अत एव तैत्तिरीयोपनिषत्सु

विभागः शतवत् ॥ ११ ॥ सूत्रमवतारयन्ति नन्वित्यादि, एकेषां जनकादीनां, एकेषां शुकर्षभादीनां, तत्र विभागे, गणिता आनन्दवल्ल्यां गणिताः, निरूपयन्ती श्रुतिर्भगवद्दत्तानन्दमधिकारिभेदेन निरूपयन्तीत्यर्थः, निरूपयन्तीति स्त्रियां प्रथमा, अत एव कर्मकरणतत्त्यागविभागयोरधिकारविभागाधीनत्वादेव, उत्कर्ष उक्तः आयुरुत्कर्षेणानन्दोत्कर्ष उक्त इत्यर्थः, एवं प्रकृतेपि कर्मत्यागविभागेपि, अपकृष्टाधिकारेत्याग इत्यर्थः, एतदेवोपपादयन्त्यन्यभावेत्यादिना, तथा च भगवदतिरिक्तभावराहित्ये कर्मत्यागोन्यभावसत्त्वेत्याग इत्यधिकारविभागेन विभागो बोध्यो ज्ञानमार्गे, अत्र तु भगवन्मार्गे तु, तदुत्कर्षेनुग्रहोत्कर्षे, त्यागः कर्मत्यागः ॥ ११ ॥

अध्ययनमात्रवतः ॥ १२ ॥ सूत्रमवतारयन्ति यच्चोक्तमित्यनेन, तद्वतो ब्रह्मिष्ठत्ववतो ब्रह्मणः, विधानात् कर्मकरणार्त्विज्यविधानात्, न तु परो ब्रह्मविद्यावांश्चतुर्मुख', तं ब्रह्मपदवाच्यं वेदं, तेन वेदाध्ययनेन, प्रत्ययस्य ब्रह्मिष्ठेत्यत्रत्येष्ठन्प्रत्ययस्येत्यर्थः, तादृशाध्ययनवतो ब्रह्मत्वेन वरणयोग्यस्य दुर्लभत्वात् कर्मविलोपप्रसङ्गादाहुरथ वेत्यादि, तद्वत एव शाब्दपरोक्षरूपब्रह्मविद्यावत एव, तत्र कर्मणि, एवं च ब्रह्मतद्विद्यावतोः कर्मलोपत्यमनाकुलमेवेत्यर्थ', ब्रह्मज्ञानत्वाभावाच्छाब्दपरोक्षस्य प्रथमाध्याय एव खण्डितत्वेन ब्रह्मज्ञानत्वासम्भवादित्यर्थः, 'तुष्य'त्वितिन्यायाद् दूषणसौकर्याच्च दूषणान्तरमाहुर्न हीत्यादिना, तथा सति शाब्देन सितारसप्रत्यक्षे सति, अत एव शाब्देनार्थापरोक्षस्यासम्भवादेव, मन्त्रविदेवात्मप्रतिपादकशब्दजन्यशाब्दबोधवान्, एवकारेणात्मप्रत्यक्षं व्यव-

१. °त्यागोपेपि कंगो अशुद्धम्। २. सर्वपुर° फं अशुद्धम्। ३. °यत्वधि° पु। ४. छसं वपापुं। ५. च छसं पा, सर्वं कं। ६. °क्षया° फं। ७. °यजन° कंगो। ८. स्वाधीनं कपुं।

"वेदान्तविज्ञानसुनिश्चितार्था" (महा. नारा. १०. ६.) इति पठ्यते, 'विज्ञान'मनुभव एव न तु ज्ञानमात्रं, अतो दूरापास्तं कर्मशेषत्वं ब्रह्मणः, "तं विद्याकर्मणी" (बृह. ६. ४. २.) इत्यादिस्तु संसार्यात्मनः पूर्वदेहत्यागसामयिकं वृत्तान्तं निरूपयति न तु ब्रह्मविदं इति 'समन्वारम्भणा' (ब्र. सू. ३. ४. ७.)दितिसूत्रमुपेक्षितमाचार्येण ॥ १२ ॥

यच्चोक्तं "नियमाच्चे"ति तत्राह ।

नाविशेषात् ॥ १३ ॥

"आश्विन" (तैत्ति. सं. २. १. १०.)मित्यादिश्रुतिभ्यः कर्मकृतौ यथा नियमः श्रूयते न तथा त्याग इति यदुक्तं तन्न, कुतः ? अविशेषात्, "न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशु" (महा. नारा. १०. ५.)रितिश्रुतिः कर्मादिनामृतत्वाप्राप्तिमुक्त्वा तत्त्यागेन तां वदन्ती कर्मत्यागस्यावश्यकत्वं वदतीति तस्मान्न विशेषो यत इत्यर्थः, तथा चा"मृतत्वमानशु"रिति-पदात् मुमुक्षोः कर्मत्यागेनियमोमुमुक्षोस्तत्कृतिनियम इतिव्यवस्थेतिभावः ।

अथ वा ननु क्रमप्राप्ते तुरीयाश्रमे हि कर्मत्यागो द्वितीये तस्मिन् कर्मकरणनियमस्तत्र च कर्तुरङ्गत्वेन तत्स्वरूपज्ञानमावश्यकं तच्च वेदान्तैरेवेति कथं न कर्मशेषत्वमित्युत्सूत्रमाशङ्क्य निषेधति नेति, "यदहरेव विरजे"(जाबा. ४.)दितिश्रुते"स्तावत् कर्माणि कुर्वीत न निर्विद्येत याव"(श्रीमद्भाग. ११. २०. ९.)तेतिभगवद्वाक्याच्च त्यागे वैराग्यस्य च प्रयोजकत्वादाश्रमविशेषविशेषाभावादप्रयोजकत्वादित्यर्थः, यत्रापि क्वचित् क्रमप्राप्तिस्तत्रापि न तज्ज्ञानं ब्रह्मज्ञानमिति पूर्वसूत्र एवोक्तमितिभावः, एतेन वेदाध्ययनादिकमप्यप्रयोजकमिति ज्ञापितमतएव शुकस्य वैराग्यातिशयादुपनयनादेरप्यनपेक्षोच्यते, एवं सूत्रद्वयेन कर्माधिकारसम्पादकत्वेन ब्रह्मज्ञानस्य तच्छेषत्वं निरस्तम् ॥ १३ ॥

च्छिद्यते, अनुभवः प्रत्यक्षं, एवकारेण शाब्दं व्यवच्छिद्यते, अत उपनिषज्जन्यशाब्दबोधस्य ब्रह्मविद्यात्वाभावात्, तं विद्या कर्मविद्या न तु ब्रह्मविद्या, समन्वारभेते पञ्चाग्निविद्यया कर्मफलालौकिकदेहप्राप्त्यर्थं द्युलोकादौ गच्छन्तं, अनुगच्छतः ॥ १२ ॥

नाविशेषात् ॥ १३ ॥ सूत्रमवतारयन्ति यच्चोक्तमित्यादिना, 'नियमाच्चे'तिसूत्रे नियम उक्तस्तत्राहेत्यर्थः, आश्विनमित्यादि, 'आश्विनं धूम्रललाममालभेते'त्यादिश्रुतिभ्य इत्यर्थः, कर्मकृतावित्यादि, तथा च यथा नियमात् कर्मकृतेरावश्यकता तथा नियमाभावान्न त्यागावश्यकतेतिपूर्वपक्षः, तन्नेति, त्यागे नियमाभाव इत्युक्तं तन्नेत्यर्थः, अविशेषान्नियमेनानुष्ठानांशे कर्मत्यागयोर्विशेषाभावादित्यर्थः, त्यागे नियमेनानुष्ठेयत्वमुपपादयन्ति 'न कर्मणे'-त्यादिना, नन्वौपनिषद्ब्रह्मात्मज्ञानस्य कर्मशेषत्वाभावेऽप्यौपनिषदजीवात्मज्ञानस्य कर्मशेषत्वमावश्यकमित्युपपाद्य निषेधितुमाहुरथ वेत्यादि, तस्मिन् गृहाश्रम इत्यर्थः, तत्र कर्मकरणे, आवश्यकं 'ज्ञात्वा कर्माणि कुर्वीते'तिवाक्यात् कर्तुः स्वात्मज्ञानमावश्यकमित्यर्थः, कथं नेत्यादि, औपनिषदजीवात्मज्ञानस्य कर्मशेषत्वमित्यर्थः, नेति, नाविशेषादित्यर्थः, एतत्पक्षे यतिगृहस्थयोः सति वैराग्ये विशेषाभावात् कर्मनैरपेक्ष्येणैव ब्रह्मविद्यासम्भवात् कर्मणामप्रयोजकत्वान्न कर्मापेक्षेतिभावः, एतदेवोपपादयन्ति 'यदहरेवे'त्यादिना, यत्रापि कर्मभिश्चित्तशुद्धिसत्त्वे ज्ञानोदयस्थले, तज्ज्ञानं कर्माङ्गभूतोपनिषदर्थशाब्दं ज्ञानं, ब्रह्मज्ञानं ब्रह्मसाक्षात्काररूपं विद्यात्मकं ज्ञानं न भवतीत्यर्थः, पूर्वसूत्रे-त्यादि, तथा च ब्रह्मणस्तद्विद्याया वा न क्वापि कर्माङ्गत्वमित्यर्थः, एतेन वैराग्यहेतुककर्मत्यागमात्रस्यैव विद्याहेतुत्वेन, तच्छेषत्वं कर्मशेषत्वम् ॥ १३ ॥

---

१. ब्रह्मविद् पा अशुद्धम् । २. °कृतो कवपागो । ३. °त्यागा° पा अशुद्धम् । ४. लुप्तं कै ।

अथ ग्रहिलतया 'ब्रह्मिष्ठ' इत्यत्र 'ब्रह्म'पदेन पर एवोच्यत इति वदसि तत्रापि वदामः

स्तुतयेनुमतिर्वा ॥ १४ ॥

दर्शपूर्णमासावेतादृशौ यत्र ब्रह्मविदार्त्विज्याधिकारीति तत्स्तुत्यर्थं 'ब्रह्मिष्ठो ब्रह्मे'त्यनेन ब्रह्मविदोप्यार्त्विज्येनुमतिःक्रियते, न तु तस्याधिकारित्वमभिप्रेतमुक्तानुपपत्तेरित्यर्थः ॥ १४ ॥

कामकारेण चैके ॥ १५ ॥

न"ष्वेष नित्यो महिमा ब्राह्मणस्य न कर्मणा वर्धते नो कनीया"(बृह. ६. ४. २३.)निति श्रुत्या ब्रह्मविदः कर्मकृतगुणदोषौ निषिध्येते, स च प्राप्तिपूर्वक इति ब्रह्मविदः कर्मकरणमावश्यकमिति प्राप्त उच्यते कामकारेणेति ।

करणं कारः, कामेनेच्छया करणं कामकारः, तथा च परानुग्रहार्थमिच्छामात्रेण न तु विधिवशाद् यत् करणं तत् कामकार इत्युच्यते, तथा चैवंकृते कर्मणि तत्कृतगुणदोषप्रसक्तौ तत्प्रतिषेधमेके शाखिन "एष नित्य"(बृह. ६. ४. २३.)इत्यादि पठन्ति, न ह्येतावता कर्मकृत्यधिकारप्राप्तिरितिभावः ।

अथ वा कामेन कारो यस्य स तथा, तादृशेन कर्मणा प्राप्तवृद्धिह्रासयोः सम्बन्धाभावं ब्रह्मविद्येके पठन्तीत्यर्थः, चकारेणेश्वराज्ञया लोकसङ्ग्रहार्थं कृतं कर्म समुच्चीयते "सर्वस्य वशी सर्वस्येशान" (बृह. ६. ४. २२.) इतिश्रुतेस्तथा ॥ १५ ॥

उपमर्दं च ॥ १६ ॥

अनेन कर्माधिकाराभावे हेत्वन्तरमुच्यते, द्वैतभाने हि यथाकथञ्चित् कर्मकृतिसम्भावनापि यस्य त्वखण्डब्रह्माद्वैतभानं ब्रह्मेत्येव न त्विदं ब्रह्मेति सखण्डं, अत्रोद्देश्यत्वेन प्रपञ्चस्यापि भानात् सखण्डत्वं, तथा चाखण्डतज्ज्ञाने कर्मतदधिकारादेरुपमर्दं चैके शाखिनः पठन्तीति न ब्रह्मज्ञानस्य कर्मशेषत्वसम्भावनापीत्यर्थः, श्रुतिस्तु "यत्र त्वस्य सर्वमात्मैवाभूत् तत् केन कं पश्ये" (बृह. ६. ५. १५.) दित्यादिरूपा ॥ १६ ॥

स्तुतयेनुमतिर्वा ॥ १४ ॥ पूर्वोक्ते पङ्क्ति सूत्रैर्जैमिनीयमत निराकृत्य किञ्चिदाशङ्क्य निराकरोतीत्याशयेन सूत्रमवतारयन्त्यथेत्यादि, सूत्र व्याकुर्वन्ति दर्शेत्यादिना, एतादृशावुत्कृष्टावित्यर्थ , तत्स्तुत्यर्थं दर्शपूर्णमासस्तुत्यर्थं, उक्तानुपपत्तेर्नियमेन ब्रह्मनिष्ठानां कर्मत्यागबोधकवाक्यशेषश्रुतेरनुपपत्तेरित्यर्थ ॥ १४ ॥

कामकारेण चैके ॥ १५ ॥ ब्राह्मणस्य ब्रह्मविद , परानुग्रहार्थं परस्य कस्यचित् प्रार्थनया तदनुग्रहार्थं 'सर्वभूतहिते रत'त्वात् करणमित्यर्थं ,तत्कृतेति, कर्मकरणकृतगुणदोषप्रसक्तौ, तत्प्रतिषेधं गुणदोषप्रसक्तिप्रतिषेधं, नित्य इत्यादि, न'ष्वेष नित्यो महिमा ब्राह्मणस्ये'त्यादि पठन्तीत्यर्थं , एतावता निष्कामत्वप्राप्त्यर्थं कर्मकृतिमात्रेण, पूर्वोक्तव्याख्याने स्वकृतेर्दोषासमर्पकत्वेपि स्वकृतकर्मणो दोषासमर्पकत्व नोपलभ्यतेत आहुरथ वेत्यादि, स तथा कामकारत्वेनेत्यर्थं , सम्बन्धाभावं कदाचित् कर्मकरणेपि ब्रह्मविदः फलकामनाभावात् फलसम्बन्धाभावमित्यर्थः, तथा भगवद्वश्यतयाज्ञया कर्मकरणमित्यर्थं ॥ १५ ॥

उपमर्दं च ॥ १६ ॥ अनेनेतत्सूत्रेण, कर्मेत्यादि, ब्रह्मविद कर्माधिकाराभावे, सखण्डं ब्रह्म इदमत्र स्यापि भानात् सखण्डमित्यर्थः, अत्रेद ब्रह्मेतिज्ञाने, सम्भावनापीत्यादि, तथा च शाब्दरूपसखण्डब्रह्मज्ञाने कर्मसम्भावनासत्वेपि साक्षात्काररूपाखण्डब्रह्मज्ञाने कर्मसम्भावनापि नेत्यर्थः ॥ १६ ॥

---

१ °मिति ग। २ °कार° पुंगो। ३ °परितिमिरि° सर्वेत्र। ४. राग्द्दत्व कै।

ऊर्ध्वरेतस्सु च शब्दे हि ॥ १७ ॥

अत्रेदं विचार्यते, ब्रह्मचर्यानन्तरं गार्हस्थ्यमपि श्रुत्या बोध्यते, "ब्रह्मचर्यादेव प्रव्रजे"
(जावा. ४.) दित्यादिश्रुतिभिर्ब्रह्मचारिण एवं प्रव्रजनमपि बोध्यते, एवं सत्यविरोधाय
"यदहरे" (जावा. ४.) वेतिश्रुतेश्च रागितद्रहितभेदेन विषयभेदो वाच्यः, तत्र ब्रह्मचर्याविशे-
षेपि भगवदनुग्रहविशेषजचित्तशुद्धिविशेषजवेदान्तार्थपरिज्ञानमेव हेतुर्वाच्यः, "वेदान्तविज्ञा-
नसुनिश्चितार्थाः सन्यासयोगाद् यतयः शुद्धसत्त्वा" (महा. नारा. १०. ६.) इतिश्रुतिरिम-
मेवार्थमाह, तथा चैतादृशा एवोर्ध्वरेतस इत्युच्यन्ते, एवं सत्यूर्ध्वरेतस्सु कर्माभाव उक्तरीत्या
त्वयाप्युरीकार्य इति ज्ञानरहितानां कर्मण्यधिकारस्तद्वतां सन्यास इति त्वदुक्ताद् विपरीतोर्थः
सिध्यतीति क्व कर्मशेषत्वसम्भावना ज्ञाने? ननु सन्यासेपि तदाश्रमीणं कर्मास्तीति वैराग्य-
सहकृतं ज्ञानं तच्छेषभूतं तदसहकृतं तदग्निहोत्रादिशेषभूतमिति न वैपरीत्यमिति प्राप्त आह
शब्दे हीति, ज्ञानस्वरूपं तत्फलं च न युक्तिसिद्धं किन्तु वेदमात्रसिद्धं, तत्र तु "तमेवं
विद्वानमृत इह भवति" (नृ. पू. १. ६.) "ब्रह्मविदाप्नोति परं" (तै. ब्र.) "य एनं विदु-
रमृतास्ते भव" (बृह. ६. ४. १४.) न्तीत्यादिवाक्यैर्ब्रह्मज्ञानस्य मोक्ष एव फलं श्रूयते, सर्वसाधनानां
साक्षात्परम्पराभेदेन तत्रैव पर्यवसानात्, अतो धर्मिग्राहकमानविरोधात् सन्यासाश्रमिणः कर्मशेष-
त्वमपि न वक्तुं शक्यमित्यर्थः, नन्वेवं सन्यासवैयर्थ्यमिति चेद्, न, ब्रह्मविदतिरिक्तसङ्गस्य
भगवद्विसारकत्वेनावश्यत्याज्यत्वेन श्रुत्या कथनाद्, अत एव "वेदान्तविज्ञानसुनिश्चितार्था"
(महा. नारा. १०. ६.) इत्युक्त्वा "सन्यासयोगाद् यतयः शुद्धसत्त्वा" इत्युक्तं, अत्र पञ्चम्या-
न्तःकरणे संस्कारविशेषाधायकत्वं च प्रतीयते सन्यासस्य, स च संस्कारः फलोपकार्यङ्गमित्या-
वश्यकः सन्न्यासो मर्यादामार्गे, पुष्टिमार्गे त्वन्यैव व्यवस्था, "न ज्ञानं न च वैराग्यं प्रायः
श्रेयो भवेदि" (श्रीमद्भाग. ११. २०. ३१.) हेतिवाक्यात् ।

परामर्शं जैमिनिरचोदना चापवदति हि ॥ १८ ॥

ऊर्ध्वरेतस्सु च ज्ञानोक्तेस्तस्य मुक्तिफलकत्वोक्तेः "किं प्रजया करिष्यामो येषां नोय-
मात्मा नायं लोक" (बृह. ६. ४. २२.) इत्यादिश्रुतेश्च ब्रह्मप्राप्तावेव सर्वस्याः श्रुतेस्तात्पर्यमिति
सिध्यति, तस्या एव सर्वक्लेशापायपूर्वकपरमानन्दरूपत्वात्, न तु कर्मणि, दुःखात्मकसंसार-

ऊर्ध्वरेतस्सु च शब्दे हि ॥ १७ ॥ पूर्वसूत्रनिर्णीतार्थादधिकनिर्णयार्थं सूत्रमवतारयन्त्यत्रेदमित्यादिना,
अत्रैतत्सूत्रविषयवाक्ये, रागीत्यादि, तथा च रागिणो ब्रह्मचर्यानन्तरं गार्हस्थ्यं विरक्तस्य सन्यास इति 'यदहरेव
विरजेत् तदहरेव प्रव्रजे'दितिश्रुतेर्विषयभेदेन व्यवस्था कार्येत्यर्थः, तत्र रागिविरागिणोः, हेतुर्वाच्यो वैराग्ये हेतुर्वाच्यः,
इममेवानुग्रहादिसम्पत्तिं सन्यासे हेतुत्वेनाहेत्यर्थः, उक्तरीत्या गार्हस्थ्याभावाद्, विपरीतो ब्रह्मविद्यायाः
कर्माङ्गत्वाभावः, तच्छेषभूतं सन्यासाश्रमीणकर्माङ्गत्वं, तदसहकृतं वैराग्यजज्ञानासहकृतं ब्रह्मचर्यं, तत्र तु वेदे
तु, धर्मिग्राहकेत्यादि, सकलसाधनानां ज्ञाने पर्यवसानाज्ज्ञानरूपधर्मिणः साक्षान्मोक्षकारणत्वश्रुतेर्ज्ञानस्य कर्मशेष-
त्वाङ्गीकारे तद्विरोध इत्यर्थः, एवं ज्ञानमात्रस्य मोक्षसाधकत्वे, अत्र श्रुतौ, पञ्चम्या 'सन्यासयोगा'दितिपञ्चम्या,
स च रजस्तमोमिश्रीभावदूरीकरणेन शुद्धसत्त्वात्मकः, अन्यैवेत्यादि, केवलानुग्रहाधीना फलव्यवस्थेत्यर्थः ॥ १७ ॥
परामर्शं जैमिनिरचोदना चापवदति हि ॥ १८ ॥ ऊर्ध्वरेतसां कर्मत्यागादेव मुक्तिरितिपूर्वोक्तं दृढीकर्तुं
सूत्रमिदमिति जैमिनिपूर्वपक्षं सिद्धान्तपुरःसरं वदन्तः सूत्रमवतारयन्त्यूर्ध्वेत्यादिना, तस्य ज्ञानस्य, 'किं प्रजया
करिष्यामो' 'न कर्मणे'त्यादिश्रुतेरित्यर्थः, तस्या एव ब्रह्मप्राप्तेरेव, न तु कर्मणि सर्वश्रुतीनां कर्मफले तात्पर्यं

१. एव च बपा । २. ऊरी° पा । ३. एत° सर्वत्र । ४. एवं बपा । ५. पञ्चम्या अन्तः° प ।
६. °मर्श सर्वत्र ७. मुक्ति° पु ८. अयं बपागो ।

हेतुत्वात् तस्य, जीवश्रेयोनिमित्तमेव श्रुतिप्राकट्यात्, अन्यथा निषेधविधिर्न स्यात्, तथा च कर्मविधिनापि परम्परया मोक्ष एव फलत्वेन परामृश्यत इति सिद्धं, तं परामर्षं कर्मस्वातन्त्र्यवादी जैमिनिरपवदति बाधत इत्यर्थः, मोहकशास्त्रप्रवर्तकः स इतीश्वरमेव न मनुते यतोऽतस्तत्प्राप्तिस्तस्य मते दूरापास्ता, कर्मानधिकारिणामन्धादीनां सन्न्यासविधिविषयत्वमन्यथा "वीरहा वा एष देवानां योऽग्निमुद्वासयत" (तै. सं. १. १. ५. २.) इतिनिषेधविधिर्न स्यात्, अतो "*ब्रह्मचर्यं समाप्य गृही भवेद् गृहाद् वनी भूत्वा प्रव्रजेद् यदि वेतरथा ब्रह्मचर्यादेव* प्रव्रजेद् गृहाद् वनाद्" (जाबा. ४.) वेतिश्रुतेरप्यङ्गहीन एव स विषयः, यत आयुर्भागविभागेनाश्रमाणां विधानं, तुरीये तस्मिन् देहेन्द्रियादिवैकल्यं नियतं अतः कर्मण्येव श्रुतेस्तात्पर्यं, अपि च ज्ञानकर्मणोरलौकिकफलसाधकत्वे तत्त्वेन विहितत्वमेव प्रयोजकं, अपरोक्षब्रह्मज्ञानं च न विधेयं, साक्षात्स्वकृत्यसाध्यत्वात्, चोदनाबोधकलिङाद्यभावाच्च ज्ञानस्य न मुक्तिसाधकत्वं वक्तुं शक्यं, "य एनं विदु" (बृह. ६. ४. १४.) रित्यादिस्तु यागेष्विज्यविष्णुस्तुतिपरेत्याशयेनाह चोदना चेति, जैमिनिवत् तत्सहायभूतेयमचोदना च परामर्षमपवदतीति सम्बन्धः, तथा च विधिसम्बधात् कर्मैवानुष्ठेयं न तु मुक्तिसाधनमप्यतथात्वादिति स्थितम् ॥१८॥

अनुष्ठेयं बादरायणः साम्यश्रुतेः ॥ १९ ॥

बादरायण आचार्यो जैमिनेरपि गुरुस्तदेव कर्तव्यमिति शिष्यसम्मतमनुष्ठेयं कर्मापवदतीति पूर्वेण सम्बन्धः, तत्र हेतुः साम्यश्रुतेः, "यथा वीरहा वा एष देवाना" (तै. सं. १. ५. २.) मितिश्रुत्या कर्मत्यागकर्तुर्निन्दा श्रूयत एवमेव भगवज्ज्ञानरहितस्यापि सा श्रूयते यतः, तथा हि "असुर्या नाम ते लोका अन्धेन तमसावृताः तांस्ते प्रेत्याभिगच्छन्त्यविद्वांसोऽबुधा जनाः" (ईशा. ३.), एतदग्रे च "ये तद् विदुरमृतास्ते भवन्त्यथेतरे दुःखमेवोपय" (बृह. ६. ४. १४.) न्तीत्यादिरूपा, एतच्च निन्दामात्रेण साम्यमुक्तमापाततः, वस्तुतस्तु "तमेतं वेदानुवचनेन विविदिषन्ति ब्रह्मचर्येण तपसा श्रद्धया यज्ञेनानाशकेन चैतमेव विदित्वा मुनिर्भवत्येतमेव प्रव्राजिनो लोकमीप्सन्तः प्रव्रज" (बृह. ६. ४. २२.) न्तीतिश्रुत्या ज्ञानसाधनत्वेनैवाश्रमकर्मकरणोक्ते-

नेत्यर्थं, संसारहेतुत्वात् कर्मणां प्ररोहैकस्वभावत्वादित्यर्थः, 'तमेवं वेदानुवचनेने'त्यादिनिष्कामकरणादेर्मुक्तौ तात्पर्यावसायादेवं गम्यत इत्यर्थ., जीवश्रेयो मुक्तिरूपं, अन्यथा श्रुतीनां जीवश्रेयोर्थत्वाभावे, निषेधविधि'र्न कलिञ्जं भक्षये'दित्यादिरूपो नरकनिवारणार्थः, परम्परया चित्तशुद्ध्या ज्ञानद्वारा, तं परम्परया मोक्षोपयोगिनं, अपवदति यतो 'न कर्मणे'त्यादिश्रुतिरचोदनात्वादर्थवादोऽतोऽपवदतीत्यर्थ', मोहकेत्यादि, तदुक्तं पाद्मोत्तरखण्डे मोहकशास्त्रगणनाप्रस्तावे 'द्विजन्मना जैमिनिना पूर्ववेदमपार्थतः निरीश्वरेण वादेन कृतं शास्त्रं महत्तर'मिति पराशरोपपुराणे'प्यक्षपादप्रणीते च काणादे साङ्ख्ययोगयो' स्त्याज्यः श्रुतिविरुद्धोंश. श्रुत्येकशरणैर्नृभिः जैमिनीये' चेत्युक्तमितिहेतोर्मोहकत्वमुक्तं, तत्प्राप्तिरीश्वरप्राप्ति', जैमिनिमते सन्न्यासाधिकारिण आहुः कर्मेत्यादिना, अन्यथा कर्मसमर्थानां कर्मत्यागं कृत्वा सन्न्यासकरणे, अतः समर्थस्य कर्मकरणावश्यकत्वात्, स सन्न्यासाधिकारी, सूत्रे चोदना चेतिभागं व्याकर्तुमाहुरपि चेत्यादि, तत्त्वेनालौकिकफलसाधकत्वेन, लिङाद्यभावाज्ज्ञानस्य मुक्तिसाधकताबोधकश्रुतिषु लिङादिविधेरभावादित्यर्थः, स्तुतिपरा अर्थवादरूपेत्यर्थः ॥ १८ ॥

अनुष्ठेयं बादरायणः साम्यश्रुतेः ॥ १९ ॥ जैमिनिसिद्धान्तनिरासकं सूत्रं विवृण्वन्ति बादरायण इत्यादिना, तदेव कर्मैव, पूर्वेण पूर्वसूत्रस्थेन, सकलाश्रमधर्माणां ज्ञानार्थत्वप्रतिपादिकां श्रुतिमाहुर्वस्तुतस्त्वित्यारभ्य 'तमेतं वेदानुवचनेन विविदिषन्ति ब्रह्मचर्येण तपसा श्रद्धया यज्ञेनानाशकेन चैतमेव विदित्वा मुनिर्भवत्येतमेव

१. परम्परामोक्ष सर्वत्र । २. परामृश्यते सर्वत्र । ३. सिद्धान्तं क । ४. परामर्शं सर्वत्र । ५. श्रुतिर्नेमं वरापुगो । ६. °साधकत्वेन विहित° कपनापुगो । ७. °लिङा° वैरागो । ८. एवं पु । ९. असूर्या. क । १०. °रि कपुडु । ११. °दाप° पा । १२ °न° क । १३. °ख° पाञ्चकदोष°, °मशीप्सन्त. पु ।

णोक्तेश्च न स्वातन्त्र्यं कर्मणो वक्तुं शक्यं, अत एव शुकस्य न ब्रह्मचर्यादिकमपि, फलस्य
जातत्वेन तत्साधनानपेक्षणात्, न च स्वर्गपदश्रवणान्नैवमिति वाच्यं, त्वदभिमतलोकात्म-
स्वर्गे "यन्न दुःखेन सम्भिन्न" (आप. श्रौ.) मितिवाक्यशेषोक्तस्वर्गपदप्रवृत्तिनिमित्त-
धर्माभावादात्मसुखस्यैव तादृशत्वात् तस्यैव तत्रोक्तेः, एवं सति "तमेतं वेदानुवचनेने"
(बृह. ६.४.१४.) तिश्रुत्यैकवाक्यतापि सम्पद्यते, अन्यथा तु विरोध एव, ननु दृष्ट-
फलका अपि कारीरीचित्रादियागाः श्रूयन्त इति नैवंनिर्णय इति चेत्, उच्यते, नित्य-
कर्मणो हि ज्ञानसाधनत्वमुच्यते, व्रीहिपश्वादीनां तन्निर्वाहकत्वात् तच्छेपत्वेन तेषां विधानं,
एवं सति "वीरहे"तिश्रुतिः साग्निकस्य गृहिण आलस्यादिदोषेण तदुद्वासने दोषमाह न त्वा-
श्रमान्तरपरिग्रह इति मन्तव्यं, अन्यथा तदुच्छेदस्तद्विधिवैयर्थ्यं च स्यात्, न चानधिकृत-
मादाय तत्समाहितिरिति वाच्यं, अत्र पृच्छामोऽन्धपङ्ग्वादिभिः प्रव्रजनं कार्यमितिविधि-
रस्त्याहोस्विद् यावज्जीवमग्निहोत्रविधायकप्रव्रजनविधायकवाक्ययोर्विरोधाभावाय विषयो भिन्नः
कल्प्यते ? नाद्यः, अश्रुतेः, न द्वितीयः, "यदहरेव विरजे" (जाबा. ४.) दितिश्रुत्या
वैराग्यवतः प्रव्रजनविधानात् तेनैव विषयभेदसिद्धौ तत्कल्पनानवकाशात्, तेन "नापुत्रस्य
लोकोस्ती" (ऐ.ब्रा. ७.१३.१२.) तिश्रुतिरप्यविद्वद्विषयिणीति न विरोधः, "विद्वांसः प्रजां न
कामयन्त" (बृह. ६.४.२२.) इतिश्रुतेः, एतेनर्णत्रयापाकरणमपि प्रत्युक्तं वेदितव्यं, अ-
विद्वद्विषयत्वात्, यदप्युक्तम"चोदना चे" (ब्र. सू. ३.४.१८.) तिसूत्रावयवेन चोदनाप्रोधक-
लिङाद्यभावो बाधक इति, तदपि न साधीयः, श्रुतिसाम्यादेव, श्रूयते हि "तस्मादेवंविच्छान्तो
दान्त उपरतस्तितिक्षुः श्रद्धावित्तो भूत्वात्मन्येवात्मानं पश्ये" (बृह. ६.४.१४.) दिति,
न च प्रमाणवस्तुपरतन्त्रत्वान्न ज्ञानस्य विधेयतेति वाच्यं, इतरज्ञानस्य तथात्वेपि जीवात्म-
लक्षणेऽधिष्ठाने परमात्मनो भगवतो दर्शनस्यान्यतोऽप्राप्तत्वात्, श्रद्धान्तसाधनैस्तद्दर्शने स्वरूप-
योग्यतासम्पत्तावात्मन्यधिष्ठाने परमात्मदर्शनानुकूलप्रयत्नविधानसम्भवाच्छ्रवणविधिना श्रुति-
वाक्यजशाब्दज्ञानानुकूलप्रयत्नविधानवत्, एवमेव हि यागविधिनापि क्रियारूपयागस्य स्वानु-

---

फलार्थकर्मणामनपेक्षत्वादेव ज्ञानार्थत्वबोधनं, अत एव 'प्रव्राजिनो लोकमभीप्सन्तः प्रव्रजन्ती'तिश्रुत्या कर्मणां नैवं ज्योतिष्टोमविधायकवाक्ये स्वर्गपदश्रवणात्,
फलस्यात्मलाभरूपफलस्य, स्वर्गपदश्रवणाद्दर्शपूर्णमासि ज्योतिष्टोमविधायकवाक्ये स्वर्गपदश्रवणात्, प्रवृत्तिनिमित्तेत्यादि 'यन्न दुःखेने'ति-
कर्मणो ज्ञानद्वारा न मोक्षोपयोगित्वं, लोकात्मस्वर्ग इदं लोकात्मस्वर्गे, प्रवृत्तिनिमित्तधर्मवत्त्वात्, तस्यैवात्मसुखस्यैव, तत्रो-
वाक्योक्तप्रवृत्तिनिमित्तधर्माभावादित्यर्थः, तादृशत्वात् तादृशप्रवृत्तिनिमित्तधर्मवत्त्वात्, अन्यथा कर्मणामिन्द्रलोकार्थत्वोक्तौ,
क्तिविधिवाक्यस्थस्वर्गपदे, एवं सति कर्मणामात्मसुखसाधकत्वोक्तिसत्त्वे, एवं सति कर्ममात्रस्य श्रौतस्य ज्ञानार्थत्वे सिद्धे सति,
नैवमित्यादि, सकलकर्मणां न ज्ञानार्थत्वनिर्णय इत्यर्थः, अन्यथा गृहिणः कर्मकरणावश्यकत्वे, तदुच्छेदो
वीरहेतिश्रुति'वीरहा एष देवानां योऽग्निमुद्वासयती'तिश्रुतिः, तद्विधीति तयोर्विध्योरित्यर्थः, अनधिकृतं कर्मानधिकृतान्ध-
'यदहरेवे'ति 'गृहाद्वे'तिश्रुत्युक्तसन्न्यासोच्छेदः, तत्कल्पनं यावज्जीवाग्निहोत्रविरोधकल्पनं, तेन 'न कर्मणा न प्रजये'तिश्रुत्या विदुषः
पङ्ग्वादिकं, तच्छ्रुतिविरोधः, तत्कल्पनं यावज्जीवाग्निहोत्रविरोधकल्पनं, ऋणत्रयेत्यादि 'ऋणत्रयमपाकृत्य मनो मोक्षे निवेशये'दिति-
कर्मत्यागनिर्वचनेन 'विद्वांसो न कामयन्त' इत्यनेन च, श्रुतिसाम्याज्ज्ञानकर्मपक्षद्वयेपि विधिसाम्यादित्यर्थः, ज्ञानविधिमाहु-
श्रप्युक्तमित्यर्थः, बाधको ज्ञानपक्षे बाधकः, श्रुतिसाम्याज्ज्ञानकर्मपक्षद्वयेपि विधिसाम्यादित्यर्थः, प्रमाणेत्यादि, पुरुषप्रयत्ना-
'स्तस्मादेवंविच्छान्तो दान्त उपरतस्तितिक्षुः श्रद्धावित्तो भूत्वात्मन्येवात्मानं पश्ये'दिति, तथात्वेपि पुरुषप्रयत्नसाध्यत्वेपि, अन्यतो वेदाति-
साध्यत्वादितिभावार्थः, इतरज्ञानस्य ब्रह्मातिरिक्तज्ञानस्य,

---

१. स्वर्गकामपद° चप्रपापुपुंगो । २. लोकात्मक° सर्वेष्यादर्शाः । ३. °वचनेति° कैगो । ४. °वाक्यप्रवर्तन° के
°वाक्यप्रव्रजन° बपागो । ५. बोधकः तेगो । ६. °ज्ञानस्य तस्य के ।

कूलप्रयत्नाधीनत्वेन स प्रयत्न एव विधीयतेन्याप्राप्तत्वान्न तु क्रिया, तत्प्रयत्ने सति तस्याः स्वत एव सम्भवात् ।

अथवा ननु यथा "वीरहे" (तै. सं. १.१.५.२.) तिश्रुत्या कर्मत्यागो निन्द्यते तथैवा "सूर्या नाम ते लोका अन्धेन तमसा वृताः तांस्ते प्रेत्याभि गच्छन्त्यविद्वांसोवुधा जनाः" (ईशा. ३.) "ये तद्विदुरमृतास्ते भवन्त्यथेतरे दुःखमेवोपयन्ती" (बृह. ६.४.२४.) त्यादिश्रुत्या भगवज्ज्ञानाभावो निन्द्यते, एवं सति कर्मज्ञानानुकूलप्रयत्नयोर्विधेयत्वे मिथो विरोधादधिकारिभेदेन विधेयत्वं वाच्यं, न च "तावत् कर्माणि कुर्वीत न निर्विद्येत यावते" (भाग. ११.२०.९.) तिभगवद्वाक्याद् रागिणः कर्म विधीयते तद्रहितस्य ज्ञानमिति वाच्यं, "जनको ह वैदेहो बहुदक्षिणेन यज्ञेनेज" (बृह. २.१.१.) इतिश्रुतेर्नीरागत्वेन प्रसिद्धस्यापि तस्य कर्मणि प्रवृत्तिर्या सा न स्यादधिकाराभावात्, अथ जनकदृष्टान्तेन कर्मणोङ्गित्वं ज्ञानस्य तदङ्गत्वं वाच्यं, तथा च ज्ञानवता कर्मानुष्ठेयमिति प्राप्ते प्रतिवदति,

अनुष्ठेयं बादरायणः साम्यश्रुतेः ॥ १९ ॥

ज्ञानमङ्गं तदङ्गित्वेनानुष्ठेयं कर्मेतिमतं बादरायणोपवदतीति पूर्वेण सम्बन्धः, तत्र हेतुमाह साम्यश्रुतेरिति, स्वतोपुरुषार्थं कर्म फलार्थिनैवानुष्ठेयं, तथा "चैष नित्यो महिमे" (बृह. ६.४.२४.) तिश्रुत्या ज्ञानवति विहितनिषिद्धयोः कर्मणोः फलाजनकत्वेन साम्यं श्रूयत इति फलार्थिप्रवृत्त्यसम्भवेन ज्ञानिनस्तथात्वाभावेन कर्मोच्छेदप्रसक्त्या न ज्ञानस्याङ्गत्वं वक्तुं शक्यं, कृपीवलस्य व्रीहीणां वपने भर्जनस्येव, तथा च ज्ञानिनः प्रवृत्त्यसम्भवेनान्येषां चा "थेतरे दुःखमेवोपयन्ती" (बृह. ६.४.१४.) तिनिन्दाश्रवणेन तथात्वात् सर्वार्थतत्त्वज्ञा श्रुतिर्ज्ञानबहिर्भूतं कर्म कथं विदध्यादिति ज्ञानस्य पुरुषार्थासाधकत्वोक्तिमसहमानेनाचार्येण प्रौढ्या निरूपितम् ॥ १९ ॥

एवं सति पूर्वकाण्डवैयर्थ्यमापततीति तत्तात्पर्यमाह ।

विधिर्वा धारणवत् ॥ २० ॥

यथा योगशास्त्रे मनःसमाधेरेव साध्यत्वात् तत्साधनत्वेनैव मानसा मूर्तेर्धारणं विधीयते न तु स्वतन्त्रतया फलसाधकत्वेन मनःसमाधौ तत्त्यागात्, "ततः किञ्चन न स्मरेत्"

रिक्तप्रमाणत', न तु क्रिया, तस्याः प्रयत्नासाध्यत्वादित्यर्थः, तत्प्रयत्नेति क्रियानुकूलप्रयत्ने, विधिसाम्यमुपपाद्य निषेधसाम्यमुपपादयन्त्यथवेत्यादिना, कर्मत्यागनिन्दिका श्रुति'र्वीरहे'तीति, ज्ञानाभावनिन्दिका'सूर्या नाम ते लोका अन्धेन तमसा वृताः तांस्ते प्रेत्याभिगच्छन्त्यविद्वांसोवुधा जनाः' 'ये तद् विदुरमृतास्ते भवन्त्यथेतरे दुःखमेवोपयन्ती'ति, मिथो विरोधात् कामतदभावरूपशाम्त्योरधिकारिविशेषणयोर्विरोधादित्यर्थः, अनुष्ठेयं बादरायणः साम्यश्रुतेः ॥ १९ ॥ सूत्रमवतारयन्ति 'न च तावत् कर्माणी'त्यादि, अधिकाराभावाजनकस्य निर्वेदसत्त्वेन सर्वदा भावरूपाधिकाराभावात्, प्रतिवदति सूत्रकारो दूषयति, पूर्वेण पूर्वसूत्रस्थेन, तत्र दूषणे, साम्यश्रुतिं प्रतिपादयन्ति स्वतोपुरुषार्थमित्यादिना, तथात्वाभावेन कर्मफलार्थित्वाभावेन, भर्जनस्येतिव्यतिरेकदृष्टान्तः, यथा च व्रीह्यावापे यथा भर्जनं नाङ्गमेवं कर्मण्यपि न ज्ञानमङ्गमित्यर्थः, अन्येषां ज्ञानिभिन्नानाम् ॥ १९ ॥

विधिर्वा धारणवत् ॥ २० ॥ सूत्रमवतारयन्त्येवमित्यादिना, एवं सति ज्ञानितद्भिन्नाभ्यां कर्मकरणासम्भवे सति, तत्साधनत्वेन ततो मन समाधिसाधनत्वेन, तत्त्यागान्मन समाधिसिद्धौ मूर्तिधारणत्यागवचनात्, ततो

---

१. श्रीनाथद्वारे श्रीमत्प्रभुचरणहस्ताक्षराणि इत आरभ्योपलभ्यन्त आभाष्यान्तं कपुस्तकं च शुद्धप्रायमिति रश्मिमन्यप्रकाशकः । २. °पि गच्छन्ति क । ३. °वापि° के । ४. प्राप्तं क, प्राप्ती के । ५. °पि यन्ति मा । ६. °ष्ये° के ।

"तच्चापि चित्तवडिशं शनकैर्वियुङ्क्त" (भाग. ३.२८.३४.) मित्यादि-
(भाग. ११.१४.४४.) "तच्चापि चित्तवडिशं शनकैर्वियुक्त" कर्मविधिरुच्यते न तु स्वतन्त्रतया
वाक्येभ्यस्तथा, तथा भक्तिसाधनत्वेनैवानुष्ठेयमितितात्पर्येण तन्मध्यपातित्वेन धारणस्य
फलसाधकत्वेन, ननु तत्र समाधिमधिकृत्य यमादीन्युक्तानीति दृष्टान्तवैषम्यमिति चेत्, न,
तथात्वं युज्यते प्रकृते ज्ञानं भक्तिं वाधिकृत्य न कर्म विहितमिति चेतरपदाज् ज्ञानमध्य-
उक्तानुपपत्त्या सानिन्द्यमेव कर्म श्रुतिर्विदधातीत्यवश्यं वाच्यं, निन्दायां स्वरूपोपकारि-
पातिन एव तद्विषयस्य प्राप्तेरावश्यकत्वात्, तथा च भगवज्ज्ञानस्येतरनिरपेक्षत्वेन श्रेयोभिर्विविधैश्चान्यैः
त्वमस्य कर्मणो वाच्यं, तथा चोक्तं "दानव्रततपोहोमजपस्वाध्यायसंयमैः (बृह. ६.४.२३.)
कृष्णे भक्तिर्हि साध्यत" (भाग. १०.४५.२४.) इति, "एष नित्यो महिमे" "तस्यैव
तिश्रुतिरपि यज्ज्ञाने सति विहितनिषिद्धकर्मफलासम्बन्धस्तद्वित् स्यादित्यनुक्त्वा मुख्यत्वात्
पदवित् स्या" (बृह. ६.४.२३.) दिति यदुक्तवती तेन पदयोर्भक्तिमार्गरूपत्वेन नन्दन्ति
तज्ज्ञानानुकूलप्रयत्नमेव पूर्वं विदधे, तेन "शृण्वन्ति गायन्ति गृणन्त्यभीक्ष्णशः स्मरन्ति (भाग. १.९.२६.)
तवेहितं जनास्त एव पश्यन्त्यचिरेण तावकं भवप्रवाहोपरमं पदाम्बुज" "तस्यैव"
मितिवाक्याच्च वर्णाश्रमधर्मा आत्मधर्माश्च पदज्ञानसाधनत्वेन कर्तव्या इति सिद्धं, दीनभावेन
तच्छन्दस्य प्रसिद्धार्थकत्वाल्लोकवेदप्रसिद्धस्य पुरुषोत्तमस्यैव तत्रापि "पदवि"देव जातायां स्वत
भक्तिमार्गीयज्ञानवानेव "स्यादेवे""त्येव"कारः सर्वत्रानुषज्यते, तथा सति भक्तौ पश्चादुक्तवतीति
एव भगवज्ज्ञानं भवतीति ज्ञापयितुं "तं विदित्वे" (बृह. ६.४.२४.) ति भक्तिसाधनत्वमेव
तदाशयो ज्ञायते, अत एव पूर्वं कर्म निरूपितं साधनत्वात्, स्यादेतद्, कर्मणां
चेत् कर्मणः श्रुतेरभिप्रेतं तदा भगवद्विदि तत्फलासम्बन्ध इत्यनुपपन्नमिति चेत्, मैवं, तिश्रुतेः
हि भक्त्युत्पत्तौ स्वरूपयोग्यतासम्पादकत्वमेव "नायमात्मे" (कठोप. २.२२.) न तु पौष्टिक-
कर्मज्ञानाभ्यामलभ्यत्वाद् भगवतः, स्वरूपयोग्यतापेक्षापि मार्यादिकस्य भक्तिस्तया पुरुषो-
त्तम एव वाशब्द उक्तो नियमवाची, तथा सति भगवदनुग्रहश्चेत् तदा

मनःसमाधिसिद्ध्यनन्तरं, तथा मूर्तिधारणस्यान्यार्थत्वं मानसमूर्तिधारणस्य यथान्यार्थत्वं तथेत्यर्थः, तत्र योगशास्त्रे,
धारणस्य मूर्तिधारणस्य, तथात्वं मनोधारणार्थत्वं, प्रकृते कर्मणो ज्ञानभक्तिसाधनत्वे, उक्तानुपपत्त्ये'ष महिमा
ब्राह्मणस्ये'तिश्रुत्या ज्ञानिनि कर्मणां फलाजनकत्वोक्त्या कर्म निन्दितं, ज्ञानिभिन्ने वा 'येतरे दुःखमेवोपयन्ती'ति-
श्रुत्या कर्माधिकारो निन्दितः, इत्थं च तदुभयनिन्दया कृत्वा वानुपपत्तिः कर्मणस्तत्रेत्यर्थः, सानिन्द्यं श्रुत्यानिन्दित-
स्थलीयं, इतरपदाद्'येतरे'इत्यनेन ज्ञानिभिन्ननिन्दाबोधकेतरपदात्, ज्ञानमध्येत्यादि, तथा च प्राप्तज्ञानस्य 'न
कर्मणे'तिश्रुत्या कर्मत्यागोक्तेर्ज्ञानस्वरूपयोग्यस्यैव कर्मश्रुतिविषयस्यावश्यम्प्राप्तेरित्यर्थः, एतदेव निगमयन्ति तथा
चेत्यादिना, भगवज्ज्ञानस्य शुकर्षभादिनिष्ठज्ञानस्य, इतरनिरपेक्षत्वेन फलजनने कर्मादिसहकार्याकाङ्क्षाराहित्येन,
स्वरूपोपकारित्वं स्वरूपयोग्यस्याधिकारिणो ज्ञानेन्तःकरणशोधनद्वारोपयोगित्वमेवं जनकस्य कर्मणा विद्योप-
कारकतया ज्ञानस्वरूपोपकारित्वमवसेयमित्यर्थः, इत्थं च 'तमेतं वेदानुवचनेने'तिश्रुत्यर्थः समर्थितः, फलासम्बन्धः
फलासम्बन्धो भवतीत्युक्तेत्यर्थः, तद्विद् ब्रह्मवित्, विदधे तज्ज्ञानानुकूल 'पदवित् स्या'दित्यनेन विदध इत्यर्थः,
तस्यैव तच्छब्दस्येति, 'एष नित्यो महिमा ब्राह्मणस्ये'तिश्रुतौ 'तस्यैव पदवित् स्या'दित्यत्र 'तस्ये'तिशब्दस्येत्यर्थः,
साधनत्वात् निष्कामकर्मणां परम्परया भक्तिसाधनत्वात्, स्यादेतदिति, एतद् वक्ष्यमाणं, तत्फलासम्बन्धः
कर्मफलासम्बन्धो ज्ञानिनि, श्रुतावुक्तमनुपपन्नमित्यर्थः, वाशब्द उक्तो 'न मेधये'तिश्रुतौ वाशब्द उक्तः,
सूत्रे वा, अनियमवाचीत्यनुग्रहसत्त्वे प्रवचनादिकं भक्तिर्नापेक्षतेनुग्रहाभावे तु मर्यादाभक्तिः प्रवचनादिकमपेक्षत

---

१. तथा सति वपागो । २. फलं कें । ३. उच्यते कैंवपापुगो । ४. स्या° सर्वेप्यादर्शाः । ५. °रूपत्वात् तत्र च पदयोरेव सेव्यत्वेन मुख्यत्वात् कैंवपापुंगोश्री । ६. विदधते कैंवपागो । ७. तस्यैत° कपु । ८. °साधनमेव क । ९. त्यै वेंगो ।

ख्यानेष्वेवेत्यप्रयोजको हेतुरिति चेत्, मैवं, आचार्याशयानवगमात्, तथा हि 'पूर्वं तुष्यतु दुर्जन' इतिन्यायेनाख्यानानां शंसनशेषत्वमुपेक्ष्योच्यते, न ह्याख्यानेष्वेव ज्ञानं निरूप्यते किन्त्वन्यत्रापि, तथा हि तैत्तिरीयके पठ्यते "ब्रह्मविदाप्नोति परं तदेषाभ्युक्ता सत्यं ज्ञानमनन्तं ब्रह्म" (तै. ब्र. १.) त्युपक्रम्य माहात्म्यविशेषज्ञानार्थमाकाशादिकर्तृत्वमुक्त्वानन्दमयत्वं रसरूपत्वमप्युक्त्वा "भीषास्मा" (तै. ब्र.) दित्यादिना सर्वनियामकत्वं चोक्त्वा भगवानेव पूर्णानन्द इतिज्ञापनायानन्दगणनां कृत्वानन्दमयं पुरुषोत्तमं प्राप्तेनानुभूयमानानन्दस्वरूपं "यतो वाचो निवर्तन्ते अप्राप्य मनसा सहे" (तै. ब्र.) त्यादिनोक्त्वा तद्विदो माहात्म्यमुच्यत "एतꣳ ह वाव न तपति किमहं साधु नाकरवं किमहं पापमकरव" (तै. ब्र.) मिति, अत्र ज्ञानवान् सच्चिद्रूपं देशकालापरिच्छिन्नं सर्वकर्तारं निरवध्यानन्दात्मकं सर्वनियामकं मनोवागगोचरं पुरुषोत्तमं प्राप्नोति, कर्म तु स्वयं क्लेशात्मकं तद्वांश्च "एवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ती" (बृह. ६. ३. ३२.) तिश्रुतेः क्षुद्रतरानन्दजनकस्वर्गपश्वादिफलमाप्नोतीति विहितनिषिद्धकर्मणोश्चाप्रयोजकत्वं तस्मिन्नुच्यत इति कर्मणः सकाशाज् ज्ञानस्य निरवधिरेव विशेष उच्यत इति न धर्म्यसिद्धिर्न वा कर्मशेषत्वं ज्ञानस्य सिध्यति ॥ २२ ॥

तथाप्याख्यानप्रतिपादितविद्यानामसिद्धिरेवेति चेत् तत्राह ।

तथा चैकवाक्यतोपबन्धात् ॥ २३ ॥

यथा केवलश्रुतेर्विद्याप्राधान्यं तथैवोपाख्यानश्रुतेरित्यर्थः, चकारेण प्रश्नोत्तरैर्निर्णीतार्थप्रतिपादनं, महतामेवात्र प्रवृत्तिः, सापि बह्वायासपूर्विकेति विद्यामाहात्म्यज्ञापनं प्ररोचनं चाधिकमुपाख्यानानामुपाख्यानं विनैव विद्यानिरूपिकायाः श्रुतेः सकाशादित्युच्यते, तत्र हेतुरेकवाक्यतोपबन्धादिति, "आचार्यवान् पुरुषो वेदे" (छान्दो. ८.१४.२.) तिश्रुत्यैकवाक्यताज्ञानमाख्यानं विना न भवतीति तदर्थमुपबन्धाद् गुरुशिष्यकथोपबन्धादित्यर्थः ।

अथवोपाख्यानरहितायां श्रुतौ यथा ज्ञानं निरूप्यते तथै"वाधीहि भगव इति होपससाद सनत्कुमारं नारद" (छान्दो. ९.१.१.) इत्याद्याख्यानेष्वपि निरूप्यते इत्यनाख्यान-

---

ज्ञानेष्वेव, एवकारेण मन्त्रब्राह्मणार्थज्ञानस्यान्यस्य व्यवच्छेदः, मैवमाख्यानार्थज्ञानमात्रे विशेषितत्वनिर्वचनमिति नेत्यर्थः, तत्र हेतुराचार्येत्यादि, शंसनशेषत्वं ब्रह्मज्ञानोपयोगिज्ञानप्रतिपादनशेषत्वं, आख्यानेष्वेवेत्येवकारव्यवच्छेद्यार्थमुपादेयत्वेनोपपादयन्ति न हीत्यादिना, आनन्दगणनां शतानन्दाधिकत्वयानन्दगणनामित्यर्थः, प्राप्तेन भक्तेन इत्येवेत्यर्थः, तद्विदः पुरुषोत्तमविद, अत्र भगवन्मार्गे, ज्ञानवान् पुरुषोत्तमज्ञानवान्, आप्नोतीत्यस्य तद्वानित्यत्रान्वयः, अप्रयोजकत्वं फलाजनकत्वं, तस्मिन् पूर्वोक्तज्ञानवति, न वा धर्म्यसिद्धिर्ज्ञानसिद्धेः श्रुतावुक्तत्वान्न धर्म्यसिद्धिः ॥ २२ ॥

तथा चैकवाक्यतोपबन्धात् ॥ २३ ॥ सूत्रमवतारयन्ति तथापीत्यादिना, असिद्धिराख्यानानां कर्मशेषत्वाभावस्यासिद्धिः, केवलश्रुते 'रधीहि भगव इति होपससादे'त्यादिश्रुतेः, उपाख्यानश्रुतेर्माहात्म्यबोधकश्रुते', प्रश्नोत्तरैर्महतां नारदसनत्कुमारादीनां, अत्रोपनिषन्मार्गे, सा महतां प्रवृत्ति', अधिकं केवलविद्याबोधकश्रुत्यपेक्षयाधिक, एकवाक्यताज्ञानं केवलविद्याबोधकश्रुतीनामेकवाक्यताज्ञानं, ननु गुरुशिष्याख्यानरहितकेवलज्ञानप्रतिपादक'ब्रह्मविदाप्नोतिपर'मित्यादिश्रुतीनामाख्यानाकाङ्क्षा न स्याख्यानवतीनामपीतराकाङ्क्षेतिकेवलज्ञानप्रतिपादकश्रुतीनामाख्यानवतीषु दोषत्वं स्यादत आहुरथवेत्यादि, निरूप्यते ज्ञानं निरूप्यते, तथा चैकवाक्यतया समानैक-

---

१. °शेषित्व° मपु । २. श्रुपेक्षित्वा बपापुगो । ३. स्वरूपत्वमु° कं, °रूपत्वमु° मगो । ४. °माप्नोति कपु । ५. °श्रुतीनामि° सर्वेष्वादर्शाः ।

ज्ञानस्वरूपोपबन्धात् प्रतिपादनादित्यर्थः, नैकट्यवाचिनोप-
श्रुत्यैकवाक्यतयैवाख्याने
भेदेन वस्तुसती या तत्तद्गुरुतत्तच्छिष्यकथा तत्सामीप्यमत्रोच्यते, अन्यथा सामीप्यासम्भवा-
इतः कल्पितत्वशङ्कानिरासः, नन्वेवमपि पारिप्लवार्थत्वेन बाधकं पश्याम इति चेत्, उच्यते,
अश्वमेधप्रकरणे "मनुर्वैवस्वतो राजे" (आप. श्रौ.) त्यादीन्याख्यानानि यत्र पठितानि तत्र
सामान्यतस्तेषां विनियोगः "सर्वाण्याख्यानानि पारिप्लवे शंसती"त्यनेनोक्त इति 'सर्व'शब्द-
तदाख्यानपर एव नत्वाख्यानान्तरपरोपि, प्रकरणस्य नियामकत्वात्, एवं सति यदा पारि-
प्लवाख्यकर्मप्रस्तावस्तदा विशेषविनियोग उक्तः "पारिप्लवमाचक्षीते" (आप. श्रौ.) ति, तत्र
प्रथमेहनि "मनुर्वैवस्वतो राजे" (आप. श्रौ.) ति द्वितीयेहनी"न्द्रो वैवस्वत" (आप. श्रौ.)
इति तृतीयेहनि "यमो वैवस्वतो राजे" (आप. श्रौ.) त्याद्याख्यानविशेषा वाक्यशेषे विनि-
युज्यन्ते, आख्यानसामान्यपरत्वे त्वहोविशेष उपाख्यानविशेषविधानं न स्यात्, अत एव
पारिप्लवमित्येकवचनमतो नाख्यानान्तरगन्धसम्बन्धोपि, प्रापकाभावात् ॥ २३ ॥

अत एवाग्नीन्धनाद्यनपेक्षा ॥ २४ ॥

एवं "पुरुपार्थोतःशब्दा" (ब्र. सू. ३.२.१.) दित्युपक्रम्य ज्ञानस्य फलसाधने कर्मान-
पेक्षत्वमुपपाद्य तत्रैवोपपत्त्यन्तरमाह, यतो ज्ञानी ज्ञानेन स्वयमेव यज्ञात्मको जातोत एव
जरामर्याग्निहोत्रेग्निस्तदिन्धनं समिदादि तदादय आज्यादयस्तेषामनपेक्षोक्ता श्रुतौ, तैत्तिरीयके
पठ्यते "तस्यैवंविदुषो यज्ञस्यात्मा यजमानः श्रद्धा पत्नी शरीरमिध्ममुरो वेदिर्लोमानि बर्हिर्वेदः
शिखा हृदयं यूपः काम आज्यं मन्युः पशुस्तपोग्नि" (नारा. ८०.) रित्यादि, एतेन यदन्यस्य
यज्ञतासम्पादकं तस्य स्वकार्यसाधने कथं यज्ञापेक्षा भवेदितिभावः सूच्यते ॥ २४ ॥ १ ॥

॥ इति तृतीयाध्याये चतुर्थपादे प्रथमं पुरुपार्थोतःशब्दादिति प्रथमाधिकरणम् ॥१॥

कर्मिणो ज्ञानस्वोभाभ्यां निरूपणात्तैकस्याप्यन्यशेषत्वमिति फलितं, अन्यथा तत्तद्गुरुतत्तच्छिष्याणामवस्तुत्वाङ्गीकारे,
अतः पूर्वोक्तानां वास्तवत्वेनोपनिबद्धत्वात्, आशङ्कान्तरमाहुर्नन्वेवमित्यादिना, पारिप्लवार्थत्वेन 'सर्वाण्याख्या-
नानि पारिप्लवे शंसती'त्यनेन, बाधकं सर्वाख्यानानामश्वमेधीयपारिप्लवपदार्थाङ्गत्वात्र ब्रह्मविद्योपयोग इति
बाधकं, उच्यते समाधानमुच्यत इत्यर्थः, सर्वाण्याख्यानानि 'मनुर्वैवस्वत' इत्यादीनि सर्वाणीत्यर्थः, तदाख्यान-
पर एवाश्वमेधप्रकरणे पठितानि यानि 'मनुर्वैवस्वत'इत्याद्याख्यानानि तत्परस्सर्वशब्दस्तेन प्रकरणेन सर्वशब्दसङ्को-
चात् ब्रह्मविद्योपाख्यानानामश्वमेधीयपारिप्लवशेषत्वमिति फलितं, विशेषविनियोगो यस्मिन् दिने यदाख्यानमुक्तं
तद्वितीयपारिप्लवे तदाख्यानविनियोग इत्यर्थः, विशेषविधानं न स्यादिति, तथा च 'सर्वेभ्यो ब्राह्मणेभ्यो दधि
दीयतां कौण्डिन्येभ्यस्तक्र'मितिविशेषविधानाद् यथा कौण्डिन्येभ्यो दधिनिवृत्तिस्तथेतरोपाख्यानानां पारिप्लवे निवृत्ति-
रन्यथा विशेषवाक्यविशेषवैयर्थ्यापत्तेरितिभावः, अत एव यत एवैकैकस्मिन् पारिप्लव एकैकमाख्यानं नियतमुक्तं
तत एवेत्यर्थः ॥ २३ ॥

अत एवाग्नीन्धनाद्यनपेक्षा ॥ २४ ॥ सूत्रार्थमाहुर्यत इत्यादिना, तेषां यज्ञोपस्कराणां, उक्ता ज्ञानि-
ष्ठा, पठ्यते श्रुतिः पठ्यते, 'तस्यैवंविदुषो यज्ञस्यात्मा यजमानः श्रद्धा पत्नी शरीरमिध्ममुरो वेदिर्लोमानि बर्हि-
र्वेद शिखा हृदयं यूपः काम आज्यं मन्युः पशुस्तपोग्नि'रित्यादि, तस्य ज्ञानस्य ॥ २४ ॥ १ ॥

इति तृतीयचतुर्थे प्रथमाधिकरणम् ॥ १ ॥

---

१ °स्वरूपबन्धात् पा । २. °देशेन कै । ३. वस्तु प्रतीयात् क । ४. °त्वे न बाधकं बपा, बोधकं कैगो ।
५. °त्याख्यान° क । ६. चामी° बप्रपापुगो । ७. °दायेति पापुस्तकेशुद्धमेव ।

त्तमज्ञानं तदा कर्मतत्फलसम्बन्धगन्धोपि नेति किमनुपपन्नं? एतेन "तमेव विदित्वा मुनिर्भवति" (बृह. ६.४.२२.) "अग्राह्यो न हि गृह्यत" (बृह. २.९.२६.) इत्यादिश्रुतीनां मिथो विरोधः परिहृतः, भक्त्या ग्राह्यत्वात् तदितरसाधनाग्राह्यत्वात्, अत एव "विविदिषन्ति" न तु विदन्त्यपीत्याशयवती "तमेतं वेदानुवचनेने" (बृह. ६.४.२२.) तिश्रुतिः पठ्यते, न चानुपदमेव "तमेव विदित्वा मुनिर्भवती" (बृह. ६.४.२२.) त्युक्तेः सान्निध्यादुक्तसाधनैरेव वेदनमभिप्रेतमिति वाच्यं, वेदानुवचनादीनां सर्वेषां वेदनसाधनत्वे सर्वेषां तत्कर्तॄणां वेदनसम्भवेन मुनिर्भवती' (बृह. ६.४.२२.) त्येकत्वं तद्विदि न वदेत्, अतो ज्ञानं कस्यचिदेकस्य भवतीति ज्ञानस्य दुर्लभत्वं ज्ञाप्यते, "मनुष्याणां सहस्रेषु कश्चिद् यतति सिद्धये यततामपि सिद्धानां कश्चिन्मां वेत्ति तत्त्वत" (भ. गी. ७. ३.) इतिभगवद्वाक्याच्च, तर्हि वेदानुवचनादिषु निःशङ्का प्रवृत्तिः कथम्? इत्थम्, "स वा अयमात्मे" (बृह. ६.४.२२.) त्यादिकया पूर्वश्रुत्या भगवन्माहात्म्यं श्रुत्वा यथाकथञ्चित् तद्वेदनौत्सुक्ये सति सत्सङ्गाभावेन भक्तिमार्गापरिचयात् कर्ममार्गमात्रमाश्रमधर्मत्वेनालौकिकार्थसाधकत्वेनापि पूर्वं ज्ञातमस्तीति तदेव भगवद्वेदनेपि साधनमिति मन्यमानास्तदेव कुर्वन्ति, ननु वैदिकसाधनानां वैयर्थ्यं कथमिति चेत्, न, श्रमकृतत्वेपि जन्मान्तरीयाक्षरज्ञानोपयोगिसंस्काराधायकत्वेनावैयर्थ्यात् ॥ २० ॥

स्तुतिमात्रमुपादानादिति चेन्नापूर्वत्वात् ॥ २१ ॥

ननु साम्यश्रुतेर्हेतोः कर्मशेषत्वं ज्ञानस्य यदपास्तं तन्नोपपद्यते, साम्योक्तेर्ज्ञानस्तुतिपरत्वात्[1], अपि च तया ज्ञानिनोपि कर्मोपादानात् कर्मकृतिस्वीकारादितियावत्, अन्यथा ज्ञानिनां कर्मकृत्यभावेन तत्कृतगुणदोषाप्रसक्त्या तन्निषेधानुपपत्तिः स्यात्, तेषामपि तत्कृतगुणदोषसम्बन्धोस्त्येवेतिज्ञापनाय मात्रपदं, निषेधेनेतरसाधारण्यं परिह्रियते, तथा च ज्ञानिनोपि कर्मकरणात् कर्मशेषत्वं ज्ञानस्य निःप्रत्यूहमिति चेन्नैवं वक्तुं युक्तं, पदज्ञानस्य कर्मफलासम्बन्धफलकत्वस्यापूर्वत्वाद् विधेयत्वमेव, न हि यस्य कर्मणो ज्ञानस्य वा यत् फलं तदुक्तेरपि स्तुतिरेवेति युक्तं, तयोरुच्छेदापत्तेः, विधिर्हि प्रवर्तकः, तस्य पुरुषप्रवृत्त्युप-

---

इत्येवंविधानियमवाचीत्यर्थः, एतेन पूर्वोक्तरीत्या विषयव्यवस्थाकरणेन, अत एव साक्षात्साधनाग्राह्यत्वादेव, तत्कर्तॄणां प्रवचनादिकर्तॄणां, तद्विदि ब्रह्मविदि, तर्हि सर्वेषां ज्ञानप्राप्तिनिश्चयाभावे, तदेव कुर्वन्तीति, तथा चापातत औत्सुक्यादेव कुर्वन्तीति फलितं, इत्थं च पूर्वकाण्डस्योत्तरकाण्डशेषत्वं निर्णीतमितिभावः ॥ २० ॥

स्तुतिमात्रमुपादानादिति चेन्नापूर्वत्वात् ॥२१॥ पूर्वोक्तविषय एव किञ्चिदाशङ्क्य परिहरतीत्याशयेन सूत्रे पूर्वपक्षभागमाहुर्नन्वित्यादिना, साम्यश्रुतेर्ज्ञानकर्मणोर्यौ विधिनिषेधौ तयोः श्रुतौ साम्यदर्शनादित्यर्थः, श्रुतिपरत्वादित्यर्थः, स्तुतिपरत्वादिति, तथा च ज्ञानांशेर्थवाद एव न वास्तवं कर्मसाम्यमित्यर्थः, तयार्थवादरूपज्ञानस्तुत्या, स्वीकाराज् ज्ञानांशे विधेरर्थवादत्वात् कर्मांशस्यावगमाज्ज्ञानस्य कर्मस्वीकारावश्यकत्वादित्यर्थः, अन्यथा ज्ञानिनां धर्मकरणाप्राप्तौ, तत्कृतेति, कर्मकृतिजनितगुणदोषौ, मात्रपदं सूत्रे मात्रपदं तादृशार्थसूचकं, निषेधेन ज्ञानिनां कर्मकृतगुणदोषनिषेधेन, इतरसाधारण्यमज्ञानिनो यथा गुणदोषस्तथा ज्ञानिनोपीतिसाधारण्यं, पदज्ञानस्य पूर्वश्रुत्युक्तभगवत्पदज्ञानस्य, कर्मफलेत्यादि, कर्मफलस्यासम्बन्धतादात्म्यं यस्मिंस्तादृशफलत्वस्य पदज्ञानसम्बन्धिन इत्यर्थः, विधेयत्वमेवेत्येवकारेणार्थवादाविषयत्वं बोध्यते, तदुक्तेरिति, तथा च ज्ञानकर्मणोः फलसम्बन्धबोधकवाक्यमात्रस्य स्तुतिपरत्वे पदज्ञानस्य फलसम्बन्धबोधकमपि स्तुतिपरमेवेतिभावः, तयोर्ज्ञानकर्मविध्योः, उच्छेदापत्तेः सर्वत्राधिकारिविधिषु फलबोधनादुच्छेदापत्तेरित्यर्थः, तस्य विधेः प्रवृत्त्युपयोगीत्यादि, इष्टभावनारूपार्थ-

---

१. °फलं के । २. अयमि° पा । ३. °रूपत्वात् कयपापुपुंगो । ४. तथा कयपापुपुंगो । ५. तदुक्ति° कयपापुपुंगो ।

बोध्यर्थकथनेनैव चारितार्थ्यादन्यार्थकथनस्य स्तुतित्वमस्तु नाम, न ह्येवं प्रकृते, मुमुक्षोः कर्म-
बन्धाभावप्रेप्सोस्तत्साधनत्वज्ञान एव प्रवृत्तिसम्भवात्, यच्च कर्मफलसम्बन्धनिषेधानुपपत्त्या
कर्मसम्बन्ध इत्युक्तं तन्न साधीयः, न हि तरणौ तमःकार्याभाव इत्युक्ते तत्प्राप्तिरपि सम्भवति।
अथवा पुरुषोत्तमज्ञानमुख्यफलस्यातिमहत्त्वेन साक्षाद् वक्तुमशक्यत्वं ज्ञापयन्ती
स्तुतिकन्यायेन परम्परया तदाहानयर्चा "तं विदित्वा ब्राह्मणो भवती"तिश्रुते "ब्राह्मण"पदेन
ब्रह्मविदुच्यते, तथा चाद्यपदेन बुद्धिस्थब्राह्मणमाहात्म्योद्देशे कृते स क इत्याकाङ्क्षायामाह
"तं" ब्राह्मणं "विदित्वा" विहितनिषिद्धफलासम्बन्धी "भवती"तिलक्षण इत्यर्थः, साक्षाद्-
भगवद्विदः किमु वाच्यमितिभावः, अत"स्तस्यैव" तच्छन्दस्य पूर्वपरामर्शित्वाद् ब्राह्मणस्यैव
भगवद्विदो भक्तस्यैव "पदवित् स्यात्" (बृह. ६.४.२३.) तज्ज्ञानानुकूलप्रयत्नवान् स्यात्,
तद् भजेतेतियावत्, तथा च यत्र भगवद्विद्विषयकज्ञानस्याप्युक्तरीत्या न कर्मशेषत्वं वक्तुं शक्यं
तत्र भगवज्ज्ञानस्य तथात्वं दूरदूरतरमिति सर्वं सुस्थम्॥ २१॥

अथ प्रकारान्तरेण शङ्कते "भृगुर्वै वारुणिः वरुणं पितरमुपससार" (तै.भृ.) "अधीहि
भगवं" इति होपससाद सनत्कुमारं नारदः, (छान्दो.९.१.१.) "प्रतर्दनो ह वै दैवोदासिरिन्द्रस्य
प्रियं धामोपजगाम" (कौ. ३.१.) त्याद्युपाख्यानैर्हि ब्रह्मविद्या निरूप्यते, "सर्वाण्याख्यानानि
पारिप्लवे शंसन्ती" (आप. श्रौ.) तिश्रुत्या शंसनशेषत्वं तेषामवगम्यते, शंसने शब्दमात्रस्य
प्राधान्येनार्थज्ञानस्यातथात्वादुपदेशान्ताख्यानप्रतिपाद्यं ज्ञानं मन्त्रार्थवदप्रयोजकमिति कर्म-
शेषत्वमपि न वक्तुं शक्यं प्राधान्यं तु दूरापास्तं धर्मिण एवासिद्धेरित्याह पारिप्लवार्था इति।

पारिप्लवार्था इति चेन्न विशेषितत्वात्॥ २२॥

उक्तरीत्या सर्वा उपाख्यानश्रुतयः कर्मशेषभूता इत्यर्थः, अत्राचार्य एवमपि कर्मशेषत्वं
ज्ञानस्य न सम्भवतीत्याह नेति, कुतः? विशेषितत्वात्, कर्मणः सकाशात् ज्ञानं वि-
शेषितमधिकधर्मविशिष्टत्वेनोक्तमिति न ज्ञानस्य कर्मशेषत्वमित्यर्थः, ननु विशेषितत्वमुपा-

कथनेनेत्यर्थः, अन्यार्थेत्यादि, विधिभिन्नार्थकथनस्येत्यर्थः, न ह्येवमित्यादि, प्रकृते 'पदवित् स्या'दितिमुमुक्षुप्रवृत्ति
बोधकविधावेवं प्रवृत्तिप्रयोजकेष्टसाधकत्वान्यकथनं न हीत्यर्थः, तदेवोपपादयन्ति मुमुक्षोरित्यादिना, तत्साधन-
त्वेति, बन्धाभावसाधनत्वं, निषेधेत्यादि, निषेधस्य प्राप्तिपूर्वकत्वादितिभावः, तरणौ सूर्ये विद्यमान इत्यर्थः,
तत्प्राप्तिः सूर्ये विद्यमाने तमःकार्यप्राप्तिः, 'आनन्दं ब्रह्मणो विद्वान् न बिभेति कुतश्चने' त्युक्ताकुतोभयफलकस्य
पुरुषोत्तमज्ञानस्य कर्मबन्धाभावफलकत्वमप्रयोजकमित्याशयेनाहुरथवेत्यादि, मुख्यफलस्याकुतोभयरूपफलस्य,
अनयर्चेत्यादि, आद्यपदेन 'त'मित्याद्यपदेन, इतिलक्षण इत्यनेन ब्रह्मविदः स्वरूपमुक्तं, साक्षादित्यादि,
तथा च ब्रह्मविज्ञानादेतादृशे फले सति साक्षात्पुरुषोत्तमविदः किं माहात्म्यं वाच्यमित्यर्थः, तच्छन्दस्य 'तस्यैव
पदवित् स्या'दितिश्रुतिस्थतच्छब्दस्य॥ २१॥

पारिप्लवार्था इति चेन्न विशेषितत्वात्॥ २२॥ एतन्निसूत्र्यारम्भेणाशङ्काविशेषं परिहर्तुमाहुरथेत्यादि,
पारिप्लवे अङ्गभावे, तेषामुपाख्यानानां, शंसन उपाख्यानाङ्के शंसने, अतथात्वादुपाख्यानानामर्थज्ञान-
स्याप्रयोजकत्वात्, प्राधान्यमुपाख्यानार्थज्ञानानां प्राधान्यं, धर्मिणो ज्ञानरूपस्य धर्मिणः, उक्तरीत्येज्यस्तुति-
त्वेनेज्यायामुपयोगित्वेन, अत्रैतत्सूत्रे, एवमप्युक्तप्रकारेणापि, ज्ञानस्योपाख्यानतात्पर्यविषयीभूतब्रह्मज्ञानस्य,
अधिकधर्मेत्यादि, आनन्दविषयताविशिष्टत्वेनेत्यर्थः, ज्ञानस्योपाख्यानार्थज्ञानस्य, उपाख्यानेष्वेवाख्यानार्थ-

१. °ज्ञानफल° कें। २. °यार्च कें। ३. स च कें। ४. यथा कें। ५. °वद्विषय° कपुं, भक्तविद्विषय° वपा।
६. दूरतर कपु°। ७. एतस्याग्रे 'भावशब्दाच्चे'ति सूत्रं पठ्यत एकदेशिभिस्तत्तु प्रयोजनाभावादेवोपेक्षितं श्रीमद्भाष्यकारै-
रथवा लेखकदोषादेव त्रुटितम्। ८. भगवत कें। ९. होपा० कें। १०. शंसन्ति पा। ११. °ज्ञानस्य तथा° क। १२. °द्धि°
केनागो। १३. न च पं। १४. °षितमा° पा। १५. आख्यानेषु सर्वेष्वादर्शाः।

मार्कण्डेयेनाप्युक्तं, एषा ज्ञानमार्गीयज्ञानवतो व्यवस्थेति ज्ञेयं भक्तिमार्गीयस्यैवमापदसम्भवा "दनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यह" (श्रीमद्भग. ९. २२.)मिति भगवद्वाक्यात्, "मामेव ये प्रपद्यन्ते मायामेतां तरन्ति त" (श्रीमद्भग.७.१४.) इत्यत्रैवकारेण पुरुषोत्तमज्ञानवत एव मायातरणोक्तेरक्षरमात्रज्ञानवतां तथात्वमुचितम् ॥ २७ ॥

अबाधाच्च ॥ २८ ॥

आपदि तथान्नभक्षणेन ज्ञाने चित्ताशुद्ध्यसम्भवेन तज्जनितप्रतिबन्धाभावाच्च न दोष इत्यर्थः ॥ २८ ॥

अपि[१] स्मर्यते ॥ २९ ॥

आपद्यविदुषोपि दुष्टान्नभक्षणे पापाभावो यत्र स्मर्यते तत्र विदुषि श्रुत्यनुमते का शङ्केत्यर्थः, स्मृतिस्तु "जीवितात्ययमापन्नो योन्नमत्ति यतस्ततः लिप्यते न स पापेन पद्मपत्रमिवाम्भसे" (मनु. १०. १०४.) ति।

अथवा विदुषोऽष्टकर्मासम्बन्धो "ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथे"ति (श्रीमद्भग. ४.३७.) स्मर्यतेपीत्यर्थः ॥ २९ ॥

शब्दश्चातोकामकारे ॥ ३० ॥

यतो ज्ञानाग्निरेव सर्वकर्मदहनसमर्थ इति फलदशायां कामकारेपि न दोषोत एव साधनदशायां तदभावेन "तस्मादेवंविच्छान्तो दान्त उपरतस्तितिक्षु"(बृह. ६.४.२३.)रित्यादिरूपः शब्दः कामकारनिवर्तकः श्रूयत इत्यर्थः ॥ ३० ॥ २ ॥

॥ इति तृतीयाध्याये चतुर्थपादे द्वितीयं सर्वापेक्षेत्यधिकरणम् ॥ २ ॥

एवं ज्ञानस्य कर्मनाशकत्वे सिद्धे जातज्ञानस्याश्रमकर्म कर्तव्यं न वेति चिन्त्यते तत्र फलस्य जातत्वात् कृतस्यापि नाश्यत्वेनाप्रयोजकत्वान्न कर्तव्यमिति पूर्वः पक्षस्तत्र सिद्धान्तमाह।

विहितत्वाच्चाश्रमकर्मापि ॥ ३१ ॥

यथा ज्ञानिनाप्यनापदि शिष्टान्नमेवान्नं भक्षणीयं विहितत्वात् तथाश्रमकर्मापि कर्तव्यमेव नित्यं विहितत्वादित्यर्थः, यथानापद्यशिष्टान्नभक्षणं दोषाय निषिद्धत्वात्, एतच्चोपपादितं "सर्वान्नानुमति"(ब्र. सू. ३.४.२७.)रित्यत्र, तथा नित्यत्यागोपि प्रत्यवायजनक इति तत् कर्तव्यमेवेतिभावः ॥ ३१ ॥

उक्तो भक्तानां त्वेतदुभयान्यत्वात् तेषामापद्यनुद्धार एवेत्यत आहुर्भक्तीत्यादि, तथा च 'योगक्षेमं वहाम्यह'मिति भगवत्प्रतिज्ञातस्तेषामापद एव नायान्त्यागतासु वा स एव सत्यप्रतिज्ञो रक्षक इति न भक्तानामापत्तिचिन्तेत्यर्थः ॥ २७ ॥

अबाधाच्च ॥ २८ ॥ अत्र भाष्यं स्फुटार्थम् ॥ २८ ॥

अपि स्मर्यते ॥ २९ ॥ स्मृतिस्तु सूत्रोक्ता स्मृतिस्तु 'जीवितात्ययमापन्नो योन्नमत्ति यतस्ततः लिप्यते न स पापेन पद्मपत्रमिवाम्भसे'ति, अष्टकर्मासम्बन्धः, सन्ध्यासाङ्गाष्टश्राद्धादिकर्माकरणे दोषासम्बन्ध इत्यर्थः, तत्र सौत्रं हेतुमाहुर्ज्ञानाग्निरिति ॥ २९ ॥

शब्दश्चातोकामकारे ॥ ३० ॥ कामकारे ज्ञानिन आपत्तौ निषिद्धाचरणे, तदभावेन निषिद्धाचारस्यासम्भवेन, कामकारनिवर्तको निषिद्धाचारनिवर्तको वैधाचारप्रवर्तकश्चेत्यर्थः ॥ ३० ॥ २ ॥

॥ इति तृतीयचतुर्थे द्वितीयाधिकरणम् ॥ २ ॥

विहितत्वाच्चाश्रमकर्मापि ॥ ३१ ॥ नाश्यत्वेन 'ज्ञानाग्नि'रितिवाक्योक्ताश्रयत्वेनेत्यर्थः, अप्रयोजकत्वाद् विहितकरणस्याप्रयोजकत्वात् ॥ ३१ ॥

---

१. अपि च क। ४. दुष्टा° यर्थेत्र। ५. कर्म° कपु। ६. पूर्वप° के। ७. त्यागोपि के।

यच्चोक्तं 'कृतस्यापि नाश्यत्वेनाप्रयोजकत्वान्न कर्तव्य'मिति तत्राह ।

सहकारित्वेन च ॥ ३२ ॥

शमदमादीनामन्तरङ्गसाधनानां सहकारीण्याश्रमकर्माणीत्येतद्रहितैः शमादिभिरपि ज्ञानं
स्थिरीकर्तुं शक्यमिति तानि कर्तव्यान्येवेत्यर्थः, संसारवासनाजनकत्वस्वभावो यः कर्मणां स
ज्ञानेन नाश्यत इति न सहकारित्वेनुपपत्तिः काचिदिति भावः ॥ ३२ ॥

एवं ज्ञानमार्गीयज्ञानस्थैर्यसाधनमुक्त्वा भक्तिमार्गीयसाधनानां भगवच्छ्रवणादीनामित
आधिक्यमावश्यकतां चाह ।

सर्वथापि त एवोभयलिङ्गात् ॥ ३३ ॥

भगवच्छ्रवणकीर्तनादयः साधनान्तरवद् विहितत्वेन कर्तव्या एव यद्यपि तथापि सर्व-
थाप्यन्येषां युगपदुपस्थितौ तदनुरोधमकृत्वापि त एव भगवद्धर्मा एव कर्तव्या इत्यर्थः, कुतः?
श्रुतिलिङ्गात् स्मृतिलिङ्गाच्च, श्रुतिलिङ्गं तु "तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत ब्राह्मणः
नानुध्यायाद् बहूञ् छब्दान् वाचो विग्लापनं हि त" (बृह. ६.४.२१.) दिति "तमेवैकं
जानथात्मानमन्या वाचो विमुञ्चथामृतस्यैष सेतु" (मुण्ड. २.२.५.) रित्यपि, अत्रैवकारेण
भगवदतिरिक्तं प्रतिषिध्य तद्विषयकज्ञानानुकूलं प्रयत्नं श्रवणात्मकं 'विज्ञाये'ति विधाय स्मरणमपि
तन्मात्रविषयकमेव 'प्रज्ञां कुर्वीते'तिवचनेन विधाय तदेकनिष्ठताहेतुभूतानामेव शब्दानामावर्तन-
मर्थानुसन्धानमपि कर्तव्यं नान्येषामिति 'नानुध्यायाद् बहूनि'त्यनेनोक्तवती, अत्रा'न्वि'-
त्युपसर्गेण ध्यानस्य पश्चाद्भावित्वमुच्यते, तेन योग्यतया श्रवणकीर्तने एव तत्पूर्वभाविनी प्राप्येते,
स्मृतिस्तु "शृण्वन्ति गायन्ति गृणन्त्यभीक्ष्णशः स्मरन्ति नन्दन्ति तवेहितं जनाः त एव
पश्यन्त्यचिरेण तावकं भवप्रवाहोपरमं पदाम्बुज" (श्रीमद्भाग. १. ९. ३६.)मिति "महात्मानस्तु
मां पार्थ दैवीं प्रकृतिमाश्रिताः भजन्त्यनन्यमनसो ज्ञात्वा भूतादिमव्ययं सततं कीर्तयन्तो मां
यतन्तश्च दृढव्रताः नमस्यन्तश्च मां भक्त्या नित्ययुक्ता उपासत" (श्रीमद्भग. ९.१३–१४.) इति, एतेन
भगवद्धर्माणामात्मधर्मत्वेनान्तरङ्गत्वादाश्रमकर्मणो देहधर्मत्वेन बहिरङ्गत्वात् तदविरोधेनैव तत्
कर्तव्यमिति स्थितं, अत एव भगवद्धर्मान्यधर्मं प्रतिषिध्य तेषां सर्वेभ्य आधिक्यं ज्ञापयितुं "स
वा अयमात्मा सर्वस्य वशी"(बृह. ६.४.२२.)त्यादिना भगवन्माहात्म्यमुक्तम् ॥ ३३ ॥

सहकारित्वेन च ॥ ३२ ॥ तान्याश्रमकर्माणि, ननु ज्ञाने कर्मणां नाशसम्भवात् तत्करणं 'प्रक्षालनाद्धी'ति-
न्यायमनुसरतीत्यत आहुः संसारेत्यादि, तथा च संसारजनकसकामकर्मणामेव ज्ञाननाश्यत्वमिति चित्तशोधकानां
सहकारित्वे न काप्यनुपपत्तिरित्यर्थः ॥ ३२ ॥

सर्वथापि त एवोभयलिङ्गात् ॥ ३३ ॥ सूत्रमवतारयन्त्येवंज्ञानेत्यादिना, सूत्रभागार्थमाहुः सर्वथापी-
त्यादिना, उभयलिङ्गादितिसूत्रभागार्थमाहुः कुत इत्यादिना, श्रुती आहु'स्तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत ब्राह्मणः
नानुध्यायाद् बहून् छब्दान् वाचो विग्लापनं हि त'दिति 'तमेवैकं जानथात्मानमन्या वाचो विमुञ्चथामृतस्यैष
सेतु'रिति, एवकारेण 'तमेवे'त्येवकारेण, अत्र 'नानुध्याया'दित्यत्रेत्यर्थः ॥ ३३ ॥

---

१. ब्रह्मणः कं । २. विप्लावनमिति प्रदीपः । ३. मुञ्चथ कं । ४. °स्थि° यपागो ।

मार्कण्डेयेनाप्युक्तं, एषा ज्ञानमार्गीयज्ञानवतो व्यवस्थेति ज्ञेयं भक्तिमार्गीयस्यैवमापदसम्भवा-"दनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यह" (श्रीमद्भग. ९. २२.)मिति भगवद्वाक्यात्, "मामेव ये प्रपद्यन्ते मायामेतां तरन्ति त" (श्रीमद्भग. ७. १४.) इत्यत्रैव-कारेण पुरुषोत्तमज्ञानवत एव मायातरणोक्तेरक्षरमात्रज्ञानवतां तथात्वमुचितम् ॥ २७ ॥

अबाधाच्च ॥ २८ ॥

आपदि तथान्नभक्षणेन ज्ञाने चित्ताशुद्ध्यसम्भवेन तज्जनितप्रतिबन्धाभावाच्च न दोष इत्यर्थः ॥ २८ ॥

अपि[3] स्मर्यते ॥ २९ ॥

आपद्यविदुषोपि दुष्टान्नभक्षणे पापाभावो यत्र स्मर्यते तत्र विदुषि श्रुत्यनुमते का शङ्केत्यर्थः, स्मृतिस्तु "जीवितात्ययमापन्नो योन्नमत्ति यतस्ततः लिप्यते न स पापेन पद्मपत्रमिवाम्भसे" (मनु. १०. १०४.) ति ।

अथवा विदुषोऽष्टकर्मासम्बन्धो "ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथे"ति (श्रीमद्भग. ४. ३७.) स्मर्यतेपीत्यर्थः ॥ २९ ॥

शब्दश्चातोकामकारे ॥ ३० ॥

यतो ज्ञानाग्निरेव सर्वकर्मदहनसमर्थ इति फलदशायां कामकारेपि न दोषोत एव साधनदशायां तदभावेन "तस्मादेवंविच्छान्तो दान्त उपरतस्तितिक्षु"(बृह. ६.४.२३.)रित्यादिरूपः शब्दः कामकारनिवर्तकः श्रूयत इत्यर्थः ॥ ३० ॥ २ ॥

॥ इति तृतीयाध्याये चतुर्थपादे द्वितीयं सर्वापेक्षेत्यधिकरणम् ॥ २ ॥

एवं ज्ञानस्य कर्मनाशकत्वे सिद्धे जातज्ञानस्याश्रमकर्म कर्तव्यं न वेति चिन्त्यते तत्र फलस्य जातत्वात् कृतस्यापि नाश्यत्वेनाप्रयोजकत्वान्न कर्तव्यमिति पूर्वः पक्षस्तत्र सिद्धान्तमाह ।

विहितत्वाच्चाश्रमकर्मापि ॥ ३१ ॥

यथा ज्ञानिनाप्यनापदि शिष्टानामेवान्नं भक्षणीयं विहितत्वात् तथाश्रमकर्मापि कर्तव्यमेव नित्यं विहितत्वादित्यर्थः, यथानापद्यशिष्टान्नभक्षणं दोषाय निषिद्धत्वात्, एतच्चोपपादितं "सर्वान्नानुमति"(ब्र. सू. ३.४.२७.)रित्यत्र, तथा नित्यत्यागोपि प्रत्यवायजनक इति तत् कर्तव्यमेवेतिभावः ॥ ३१ ॥

उक्तो भक्तानां त्वेतदुभयान्यत्वात् तेषामापद्यनुद्धार एवेत्यत आहुर्भक्तीत्यादि, तथा च 'योगक्षेमं वहाम्यह'मिति भगवत्प्रतिज्ञातस्तेषामापद एव नायान्त्यागतासु वा स एव सत्यप्रतिज्ञो रक्षक इति न भक्तानामापच्चिन्तेत्यर्थः ॥ २७ ॥

अबाधाच्च ॥ २८ ॥ अत्र भाष्यं स्फुटार्थम् ॥ २८ ॥

अपि स्मर्यते ॥ २९ ॥ स्मृतिस्तु सूत्रोक्ता स्मृतिस्तु 'जीवितात्ययमापन्नो योन्नमत्ति यतस्ततः लिप्यते न स पापेन पद्मपत्रमिवाम्भसे'ति, अष्टकर्मासम्बन्धः, सन्ध्यासाङ्गाष्टश्राद्धादिकर्माकरणे दोषासम्बन्ध इत्यर्थं, तत्र सौत्रं हेतुमाहुर्ज्ञानाग्निरिति ॥ २९ ॥

शब्दश्चातोकामकारे ॥ ३० ॥ कामकारे ज्ञानिन आपत्तौ निषिद्धाचरणे, तदभावेन निषिद्धाचारस्यासम्भवेन, कामकारनिवर्तको निषिद्धाचारनिवर्तको वैधाचारप्रवर्तकश्चेत्यर्थः ॥ ३० ॥ २ ॥

॥ इति तृतीयचतुर्थे द्वितीयाधिकरणम् ॥ २ ॥

विहितत्वाच्चाश्रमकर्मापि ॥ ३१ ॥ नाश्यत्वेन 'ज्ञानाग्नि'रितिवाक्यबोधितनाश्यत्वेनेत्यर्थं', अप्रयोजकत्वात् विहितकरणस्याप्रयोजकत्वात् ॥ ३१ ॥

---

१. अक्षरमात्रे कैगो। २. छम क्ग। ३. अपि च क। ४. दुष्ट° सर्वत्र। ५. कर्म° कगु। ६. पूर्वप° कै। ७. तत्त्यागोपि कै।

द्रयादिकमप्यस्ति येन भजनानन्दानुभवः स्याद् भक्तानां तु देहेन्द्रियादिकमपि मायातत्कार्यरहित-
नानन्दरूपत्वेन च भगवदुपयोग्यतोपि तत् तथेत्यर्थः, न हि मुक्तात्मनां कश्चन भगवदुपयोगो-
ीतिभावः, तदुक्तं श्रीभागवते "न यत्र माया किमुतापरे हरेरनुव्रता यत्र सुरासुरार्चिता" (श्रीम-
द्भाग.२.९.१०.) इत्यादि "मुक्तोपसृप्यत्वं" चोच्यते, अत एव सप्तमस्कन्धे "देहेन्द्रियासुहीनानां
वैकुण्ठपुरवासिना" (श्रीमद्भाग.७.१.३४.)मित्युक्तं, 'पुरवासि'त्वे देहादेरावश्यकत्वान्निषेधो जडात्म-
कानामेवेत्यवगम्यते, 'इतरज् ज्याय' इतिपाठे तु पूर्वोक्ताश्रमकर्मपरामर्शोत इत्यनेनोक्तयोरेव वा,
एतेन "सोश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिते" (तै. ब्र.) तिश्रुत्युक्तफलवत्त्वं तस्य
च्यते ॥ ३८ ॥ ३ ॥

॥ इति तृतीयाध्याये चतुर्थपादे तृतीयं विहितत्वाचाश्रमकर्मेत्यधिकरणम् ॥ ३ ॥

अथेदं विचार्यते, तदीयानामपि कदाचित् सायुज्यमस्ति न वेति, तत्र भक्तिमार्गस्यापि साधनरूपत्वात् तस्य च मुक्तावेव पर्यवसानात् तदीयत्वस्य साधनदशायामुत्कृष्टावस्थारूपत्वात् तेषामपि मुक्तिरावश्यकी, तथा च कर्मफलतो न कश्चिद् विशेष इति प्राप्त उच्यते ।

तद्भूतस्य तु नातद्भावो जैमिनेरपि नियमातद्रूपाभावेभ्यः ॥ ३९ ॥

तद्भूतस्येत्यादि, तुशब्देन मर्यादामार्गीयव्यवच्छेदः, अत्र विश्वासदार्ढ्यायाहान्यस्य
का वार्ता कर्ममात्रनिरूपकस्य जैमिनेरपि यदि कदाचिद् भगवत्कृपयायं भावो भवेत् तदा
तद्भूतस्य पुष्टिमार्गीयभगवद्भावं प्राप्तस्य तस्यापि नातद्भाव उक्तभावतिरोधानं न कदाचिदपी-
त्यर्थः, अत्र हेतूनाह नियमादीन्, तैत्तिरीयके "ते ते धामान्युष्मसी" (तै. सं. १.३.६.) ति-
मत्रे "यत्र भूरिशृङ्गा अयासस्तदुरुगायस्य परमं पद" (तै. सं. १.३.६.) मित्युक्त्वा तदनन्तरं तत्र
कृतानि कर्माण्यपि "विष्णोः कर्माणि पश्यते" (तै. सं. १.३.६:) तिमन्त्रेण निरूप्य पुनः पूर्वोक्त-
लीलास्थानं "तद् विष्णोः परमं पद" (तै. सं. १.३.६.) मिति पदेनानूद्य तस्य नित्यत्वनिरूपणा-
योच्यते "सदा पश्यन्ति सूरय" (तै. सं. १.३.६.) इति, 'सूरयो' विद्वांसः पुरुषोत्तमज्ञानवन्त इति
यावत्, तच्च भक्त्यैवेति 'सूरि'पदेन भक्ता उच्यन्ते, तथा च भक्तानां सार्वदिकदर्शनं नियम्यते
'सदे'तिपदेन, एवं सति पुष्टिमार्गीयभगवद्भावं प्राप्तस्य मुक्तावुच्यमानायां तन्नियमो भज्येतेत्यर्थः,
यचोक्तं 'साधनावस्थायामुत्तमावस्थारूपत्वं' परं 'तदीयत्वस्य'फलं 'मुक्ति'रेवेति तत्राहातद्रूपेति,उक्त-

रूपमेव प्राप्तमस्तीत्यन्वयः, तज् ज्यायस्त्वं, तथा सिद्धं भवतीत्यर्थः, निषेधो देहादीनां निषेधः, उक्तयोराश्रम-
कर्ममुक्त्योः परामर्शो त्वित्यर्थः, एतेनोभयापेक्षया भक्तेरुत्कृष्टनिवर्तनेन, तस्य भक्तस्य ॥ ३८ ॥ ३ ॥

॥ इति तृतीयचतुर्थे तृतीयाधिकरणम् ॥ ३ ॥

॥ तद्भूतस्य तु नातद्भावो जैमिनेरपि नियमातद्रूपाभावेभ्यः ॥ ३९ ॥ अधिकरणमवतारयन्त्यथेत्यादि-
ना, तदीयानां ज्ञानमार्गीयाणां, तत्र ज्ञानभक्तिमार्गयोर्मध्ये, तस्य साधनस्य, तदीयत्वस्य साधनरूपभग-
वदीयत्वस्य, साधनदशायां श्रवणकीर्तनादिकर्तव्यतादशायां, उत्कृष्टेत्यादि, सुखरूपत्वेनानुभवेनोत्कृष्टत्वादित्यर्थः,
तेषां भक्तानां, न कश्चिद्विशेषो ज्ञानमार्गापेक्षया भक्तिमार्गे न कश्चिद्विशेष इत्यर्थः, सिद्धान्ते सूत्रं व्याकुर्वन्ति
तद्भूतस्येत्यादिना, व्यवच्छेदो मर्यादामार्गीये पुष्टिमार्गीयभगवद्भावव्यवच्छेदः, अयं भावः पुष्टिमार्गीयभगवद्भावः,
तस्यापि जैमिनेरपि, भगवदीयानां सदाभगवत्साक्षात्काररूपनियमात्मकं हेतुं निरूपयितुमाहुस्तैत्तिरीयकेत्यादि,
तत्र परमपदे, तस्य लीलास्थानस्य, तच्च भक्तैः प्राप्यं लीलास्थानं चेत्यर्थः, इति मुक्तानां दर्शनसाधनेन्द्रियाणा-
मभावात् सदादर्शननियमस्य भङ्ग इत्यर्थः, यच्चोक्तमेतदधिकरणपूर्वपक्ष उक्तमित्यर्थः, तद्रूपेतीति, तथा च तद्रूपा-
भावेभ्य इत्यस्य तद्रूपं भगवदीयत्वं तस्मादुत्कृष्टपदार्थानामभावेभ्य इति सूत्रभागार्थ इति फलितं, उक्तभगवदीय-
साधनावस्थारूपत्वात् तेषामपि यपा ।

१. निपश्चितेत्युक्तफलवत्त्वं वपागो । २. साधनावस्थायां यपुपुंगो,
३. इमं बपा । ४. पुष्टिमार्गीयस्य कै ।

प्राधान्येन भगवद्धर्मा एव कर्तव्या इत्यत्रोपोद्बलकान्तरमनेनोच्यते।

अनभिभवं च दर्शयति ॥ ३४ ॥

'सर्वं पाप्मानं तरति नैनं पाप्मा तरति सर्वं पाप्मानं तपति नैनं पाप्मा तपती' (बृह. ६.४.२३.) त्यादिना भगवद्धर्मानुरोधेनाश्रमकर्माकरणजदोषैरनभिभवं च श्रुतिर्दर्शयत्यतो भगवद्धर्मा एव सर्वेभ्य उत्तमा इत्यर्थः ॥ ३४ ॥

अन्तरा चापि तु तद्दृष्टेः ॥ ३५ ॥

भगवद्धर्मेभ्य आश्रमधर्मा हीना इत्यप्यल्पमुच्यतेपि तु तस्मिन् पुरुषोत्तमे धर्मिण्येव दृष्टिस्तात्पर्यं यस्य पुंसस्तस्याश्रमधर्मा अन्तरा च फलसिद्धौ व्यवधानरूपाश्चेति श्रुतिर्दर्शयतीति पूर्वेण सम्बन्धः, अन्तराशब्दोत्राव्ययात्मको व्यवधानवाचकः, तथा च श्रुति"रेतद्ध स वै ब्राह्मणा अनूचाना विद्वांसः प्रजां न कामयन्ते किं प्रजया करिष्यामो येषां नोयमात्मायं लोक" (बृह. ६. ४. २२.) इत्यृणापाकरणहेतुत्वेन लौकिकोत्कर्षहेतुत्वेनापि प्रजाया अभीष्टत्वेपि तदुत्पादनव्यासङ्गेन भगवदानन्दानुभवेन्तरायो भविष्यतीति तद्दृष्ट्या तत्रोपेक्षां दर्शयति ॥ ३५ ॥

अपि[3] स्मर्यते ॥ ३६ ॥

अपिशब्देनाश्रमधर्माणां तथात्वं किमु वाच्यं यतो ज्ञानतत्साधनवैराग्यादीनामप्यन्तरा'रूपत्वं स्मर्यते "तस्मान्मद्भक्तियुक्तस्य योगिनो वै मदात्मनः न ज्ञानं न च वैराग्यं प्रायः श्रेयो भवेदिहे"ति (श्रीमद्भाग. ११.२१.३१.) भगवद्वाक्यम् ॥ ३६ ॥

विशेषानुग्रहश्च ॥ ३७ ॥

'स्मर्यत' इति पूर्वेण सम्बन्धः, ज्ञानादेः सकाशाद् भक्तिमार्गे फलतोप्युत्कर्षमाह ज्ञानादिसाधनवत्स्वनुग्रहो मुक्तिपर्यन्त एव भक्तिमार्गे त्व"हं भक्तपराधीनो ह्यस्वतन्त्र इव द्विजे" (श्रीमद्भाग. ९.४.६३.)त्यादिवाक्यैर्विशेषरूपो मुक्त्यादिभ्योपि भक्तानां व्यावर्तको भगवदनुग्रहः स्मर्यत इत्यर्थः ॥ ३७ ॥

गूढाभिसन्धिमुद्घाटयन् फलितमर्थमाह।

अतस्त्वितरज्ज्यायो लिङ्गाच्च ॥ ३८ ॥

अत इति पूर्वोक्तश्रुतिस्मृतिपरामर्शः, तथा चेतरस्या मुक्तेरपि भक्तिमार्गीयतदीयत्वमेव ज्याय इत्यर्थः, अत्र हेत्वन्तरमाह लिङ्गाच्चेति, मुक्तानां तु मायाविनिर्मुक्तमात्मस्वरूपमेव न तु देहे-

---

अनभिभवं च दर्शयति ॥ ३४ ॥ सूत्रमवतारयन्ति प्राधान्येनेत्यादिना, स्फुटमन्यत् ॥ ३४ ॥

अन्तरा चापि तु तद्दृष्टेः ॥ ३५ ॥ सूत्रमवतारयन्ति भगवद्धर्मेभ्य इत्यादिना, अल्पमाश्रमकर्माल्पं, ततः किमत आहुरपि त्वित्यादि, अन्तरेत्यादि, तथा चान्तराशब्दो व्यवधायकार्थवाची कोशे सिद्ध इत्यर्थः, एतदर्थोपष्टम्भिकां श्रुतिमाहु'रेतद्ध स' इति, स्फुटमन्यत् ॥ ३५ ॥

अपि स्मर्यते ॥ ३६ ॥ एतत्सूत्रस्य पूर्वं व्याख्यातत्वेपि पुनः प्रयोजनान्तरपरतया व्याख्यातुमवतारयन्त्यपिशब्देनेत्यादिना, स्मृतिमाहुस्तस्मादित्यादिना ॥ ३६ ॥

विशेषानुग्रहश्च ॥ ३७ ॥ मुक्तिपर्यन्त एवेत्येवकारेण मुक्त्यधिकफलानुग्रहव्यवच्छेदः ॥ ३७ ॥

अतस्त्वितरज्ज्यायो लिङ्गाच्च ॥ ३८ ॥ सूत्रमवतारयन्ति गूढेत्यादिना, तदीयत्वं भगवदीयत्वं, आत्मस्व-

---

१. उत्तमानि साधनानि कैघपाधुंगो। २. तत् पूर्वं ब्राह्मणाः कैघपाधुंगो। ३. अपि च क। ४. °राय° बपागो।

न्द्रियादिकमप्यस्ति येन भजनानन्दानुभवः स्याद् भक्तानां तु देहेन्द्रियादिकमपि मायातत्कार्यरहितत्वेनानन्दरूपत्वेन च भगवदुपयोग्यतोपि तत् तथेत्यर्थः, न हि मुक्तात्मनां कथन भगवदुपयोगोस्तीतिभावः, तदुक्तं श्रीभागवते "न यत्र माया किमुतापरे हरेरनुव्रता यत्र सुरासुरार्चिता" (श्रीमद्भाग.२.९.१०.) इत्यादि "मुक्तोपसृप्यत्वं" चोच्यते, अत एव सप्तमस्कन्धे "देहेन्द्रियासुहीनानां वैकुण्ठपुरवासिना" (श्रीमद्भाग.७.१.३४.)मित्युक्तं, 'पुरवासि'त्वे देहादेरावश्यकत्वान्निषेधो जडात्मकानामेवेत्यवगम्यते, 'इतरज् ज्याय' इतिपाठे तु पूर्वोक्ताश्रमकर्मपरामर्शोत इत्यनेनोक्तयोरेव वा, एतेन "सोश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिते" (तै. ब्र.) तिश्रुत्युक्तफलवत्त्वं तस्य सूच्यते ॥ ३८ ॥ ३ ॥

॥ इति तृतीयाध्याये चतुर्थपादे तृतीयं विहितत्वाचाश्रमकर्मेत्यधिकरणम् ॥ ३ ॥

अथेदं विचार्यते, तदीयानामपि कदाचित् सायुज्यमस्ति न वेति, तत्र भक्तिमार्गस्यापि साधनरूपत्वात् तस्य च मुक्तावेव पर्यवसानात् तदीयत्वस्य साधनदशायामुत्कृष्टावस्थारूपत्वात् तेषामपि मुक्तिरावश्यकी, तथा च कर्मफलतो न कश्चिद् विशेष इति प्राप्त उच्यते ।

तद्भूतस्य तु नातद्भावो जैमिनेरपि नियमातद्रूपाभावेभ्यः ॥ ३९ ॥

तद्भूतस्येत्यादि, तुशब्देन मर्यादामार्गीयव्यवच्छेदः, अत्र विश्वासदार्ढ्यायाहान्यस्य का वार्ता कर्ममात्रनिरूपकस्य जैमिनेरपि यदि कदाचिद् भगवत्कृपयायं भावो भवेत् तदा तद्भूतस्य पुष्टिमार्गीयभगवद्भावं प्राप्तस्य तस्यापि नातद्भाव उक्तभावतिरोधानं न कदाचिदपीत्यर्थः, अत्र हेतूनाह नियमादीन्, तैत्तिरीयके "ते ते धामान्युश्मसी" (तै. सं. १.३.६.) तिमन्त्रे "यत्र भूरिशृङ्गा अयासस्तदुरुगायस्य परमं पद" (तै. सं. १.३.६.) मित्युक्त्वा तदनन्तरं तत्र कृतानि कर्माण्यपि "विष्णोः कर्माणि पश्यते" (तै. सं. १.३.६ः) तिमन्त्रेण निरूप्य पुनः पूर्वोक्तलीलास्थानं "तद् विष्णोः परमं पद" (तै. सं. १.३.६.) मिति पदेनानूद्य तस्य नित्यत्वनिरूपणायोच्यते "सदा पश्यन्ति सूरय" (तै. सं. १.३.६.) इति, 'सूरयो' विद्वांसः पुरुषोत्तमज्ञानवन्त इति यावत्, तच्च भक्त्यैवेति 'सूरि'पदेन भक्ता उच्यन्ते, तथा च भक्तानां सार्वदिकदर्शनं नियम्यते 'सदे'तिपदेन, एवं सति पुष्टिमार्गीयभगवद्भावं प्राप्तस्य मुक्तावुच्यमानायां तन्नियमो भज्येतेत्यर्थः, यच्चोक्तं 'साधनावस्थायामुत्तमावस्थारूपत्वं' परं 'तदीयत्वस्य'फलं 'मुक्ति'रेवेति तत्राहातद्रूपेति,उक्त-

---

रूपमेव प्राप्तमस्तीत्यन्वयः, तज् ज्यायस्त्वं, तथा सिद्धं भवतीत्यर्थः, निषेधो देहादीनां निषेधः, उक्तयोराश्रमकर्ममुक्त्योः परामर्शे त्वित्यर्थः, एतेनोभयापेक्षया भक्तेरुत्कृष्टनिवर्तनेन, तस्य भक्तस्य ॥ ३८ ॥ ३ ॥

॥ इति तृतीयचतुर्थे तृतीयाधिकरणम् ॥ ३ ॥

तद्भूतस्य तु नातद्भावो जैमिनेरपि नियमातद्रूपाभावेभ्यः ॥ ३९ ॥ अधिकरणमवतारयन्त्यथेत्यादिना, तदीयानां ज्ञानमार्गीयाणां, तत्र ज्ञानभक्तिमार्गयोर्मध्ये, तस्य साधनस्य, तदीयत्वस्य साधनरूपभगवदीयत्वस्य, साधनदशायां श्रवणकीर्तनादिकर्तव्यतादशायां, उत्कृष्टेत्यादि, सुखरूपत्वेनानुभयेनोत्कृष्टत्वादित्यर्थः, तेषां भक्तानां, न कश्चिद्विशेषो ज्ञानमार्गापेक्षया भक्तिमार्गे न कश्चिद्विशेष इत्यर्थः, सिद्धान्ते सूत्रं व्याकुर्वन्ति तद्भूतस्येत्यादिना, व्यवच्छेदो मर्यादामार्गीये पुष्टिमार्गीयभगवद्भावव्यवच्छेदः, अयं भावः पुष्टिमार्गीयभगवद्भावः, तस्यापि जैमिनेरपि, भगवदीयानां सदाभगवत्साक्षात्काररूपनियमात्मकं हेतुं निरूपयितुमाहुस्तैत्तिरीयकेत्यादि, तत्र परमपदे, तस्य लीलास्थानस्य, तच्च भक्तैः प्राप्यं लीलास्थानं चेत्यर्थः, इति मुक्तानां दर्शनसाधनेन्द्रियाणामभावात् सदादर्शननियमस्य भङ्ग इत्यर्थः, यच्चोक्तमेतदधिकरणपूर्वपक्ष उक्तमित्यर्थः, तद्रूपेतीति, तथा च तद्रूपाभावेभ्य इत्यस्य तद्रूपं भगवदीयत्वं तस्मादुत्कृष्टपदार्थानामभावेभ्य इति सूत्रभागार्थ इति फलितं, उक्तभगवदीय-

---

१. विपश्चितेत्युक्तफलवत्त्वं बपागो । २. साधनावस्थायां मपुपुंगो, साधनावस्थारूपत्वात् तेषामपि बपा । ३. छुप्तं बपा । ४. पुष्टिमार्गीयस्य कं ।

भगवदीयत्वं न साधनरूपमपि तु मुक्तेरपि फलरूपं, "मुक्तानामपि सिद्धानां नारायणपरायणः सुदुर्लभः प्रशान्तात्मे" (श्रीमद्भाग. ६.१४.५.) तिवाक्याद् "यदा सर्वे प्रमुच्यन्ते कामा येस्य हृदि श्रिताः अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुत" (बृह. ६.४.७.) इतिश्रुत्या'मृत'स्य मुक्तस्य ब्रह्मस्वरूपभोग उच्यते, स च "यमेवैष वृणुत" (कठ. २.२३.) इतिश्रुतेर्भगवदीयत्वसाध्य एवेति स्पष्टं फलत्वमस्यातोतद्रूपत्वं, किञ्च फलं हि साधनादुत्तमं भवति भगवदीयत्वादुत्तमस्यार्थस्याभावादपि न तु मुक्तिरुचिता, तदुक्तं श्रीभागवते पञ्चमस्कन्धे पूर्वं भक्तिस्वरूपं निरूप्य "तयैव परया निर्वृत्या ह्यपवर्गमात्यन्तिकं परमपुरुषार्थमपि स्वयमासादितं नो एवाद्रियन्ते भगवदीयत्वेनैव परिसमाप्तसर्वार्था" (श्रीमद्भाग. ५.६.७.) इति ॥ ३९ ॥ ४ ॥

॥ इति तृतीयाध्याये चतुर्थपादे चतुर्थं तद्भूतस्येत्यधिकरणम् ॥ ४ ॥

अथेदं विचार्यते, ध्रुवायेव च ब्रह्मादिलोकाधिकारं दत्वा तत्सम्बन्धिफलं ददाति न वेति।

न चाधिकारिकमपि पतनानुमानात् तदयोगात् ॥ ४० ॥

तत्र नेत्याह न चेति, तत्र हेतुः पतनानुमानादिति, "आब्रह्मभुवनाल्लोकाः पुनरावर्तिनोऽर्जुने" (श्रीमद्भग. ८.१६.) तिस्मृतेरित्यर्थः, फलस्य सावधित्वादितिभावः, किञ्च तादृशस्य भगवदीयस्य पतनायोगादपि न तथा।

अथवा तादृशस्य सदा भक्तिरसानुभवात् तदतिरिक्तस्यानपेक्षणादन्येषां फलानां सम्बन्धाभावादित्यर्थः ॥ ४० ॥

उपपूर्वमपि त्वेके भावमशनवत् तदुक्तम् ॥ ४१ ॥

एके भक्ता आधिकारिके फले पतनमात्रं न हेयत्वप्रयोजकमिति वदन्त्यपि तूपपूर्वं पतनमेव तदिति वदन्ति, भक्तिभावाच्युतेः, अधिकारसमाप्तौ भगवदनुग्रहाशापि कदाचित् सम्भवतीत्युपपतनं तत्, मुक्तौ त्वपुनरावृत्तेर्भक्तिरसाशापि नेति महापतनमेव सेतिभावः, तेन निषिद्धकर्मफलतुल्यत्वं ज्ञापितं भवति, अत एव श्रीभागवते "नारायणपरा लोके न कुतश्चन बिभ्यति स्वर्गापवर्गनरकेष्वपि तुल्यार्थदर्शिनः" (श्रीमद्भाग. ६.१८.२८.) इति गीयते, भक्तिमार्गे तु साक्षात्सङ्ग-

त्वस्य मुक्तापेक्षयाधिक्ये प्रमाणं प्रदर्शयन्ति मुक्तानामित्यादिना, अतो भक्तेर्मुक्त्यधिकत्वतः, अतद्रूपत्वं मुक्तिसाधनभिन्नत्वमित्यर्थः, न तु मुक्तिरुचिता भगवदीयस्य फलं मुक्तिर्नोचितेत्यर्थः ॥ ३९ ॥ ४ ॥

॥ इति तृतीयचतुर्थे चतुर्थाधिकरणम् ॥ ४ ॥

न चाधिकारिकमपि पतनानुमानात् तदयोगात् ॥ ४० ॥ सूत्रमवतारयन्त्यथेत्यादिना, ददाति पुष्टिमार्गीयभक्ताय ददातीत्यर्थः, पतनानुमानादिति पतनबोधकस्मृत्या पतनबोधकश्रुतेरनुमानादित्यर्थः, नन्वेवं सति भगवता ध्रुवाय कथमाधिकारिकफलं दत्तमत आहुः किञ्चेत्यादि, तादृशस्य भगवन्तं प्राप्तस्य पुष्टिमार्गीयभगवदीयस्य, ध्रुवस्य मर्यादामार्गीयत्वेन तथा फलदानमित्यर्थः, तदयोगादित्यस्यार्थमाहुः पतनायोगादिति, पतनायोगादित्यस्यार्थान्तरमाहुरथवेत्यादिना, तादृशस्य मुक्त्यभिलाषाशून्यस्य भगवदीयस्य ॥ ४० ॥

उपपूर्वमपि त्वेके भावमशनवत् तदुक्तम् ॥४१॥ आधिकारिकफले पतनविशेषतामप्रदर्शनायेदं सूत्रमित्यर्थकथनायाहुरेक इत्यादि, पतनमात्रं सर्वथा पतनमेव, उपपूर्वं पतनमुपपातनमित्यर्थः, सा मुक्तिः, तेन मुक्तेर्महापतनरूपत्वेन, मुक्तेर्महापतनरूपत्वे सम्मतिमाहुरत एवेत्यादिना, 'नारायणपरा लोके न कुतश्चन बिभ्यति स्वर्गाप-

१. प्रभिद्यन्ते कं। २. स्पष्टफलत्व० मंचपागो। ३. छुत सर्वत्र। ४. सर्वं कं। ५. ध्रुवमपि च, ध्रुवादये च पु। ६. °भवनात् च। ७. सावधिकत्वात् कंगो। ८. °शे सर्वत्र। ९. °ये सर्वत्र। १०. यजना० चंपा। ११. तु कं।

भावेपि तदीयं भावमात्रमप्यशनवत् साक्षाद्भगवत्स्वरूपभोगवदेव मन्यन्ते, तदुक्तं श्रीभागवते
"अथ ह वाव तवे" (श्रीमद्भाग. ६.९.३९.) त्यादिना, साक्षाद्भगवद्भोगो जीवस्यासम्भावित इति-
शङ्कानिरासायाह तदुक्तमिति, "सोश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिते" (तै. ब्र.) ति, "अत्र
ब्रह्म समश्नुत" (बृह. ६.४.७.) इत्यादिश्रुतिषु साक्षाद्ब्रह्मस्वरूपरसाशनमुक्तमित्यर्थः ॥ ४१ ॥ ५ ॥
॥ इति तृतीयाध्याये चतुर्थपादे पञ्चमं न चाधिकारिकमित्यधिकरणम् ॥ ५ ॥

बहिस्तूभयथापि स्मृतेराचाराच्च ॥ ४२ ॥

अथेदं चिन्त्यते प्रचुरभगवद्भावमात्रवतः साक्षात्स्वरूपभोगवतो वा गृहत्यागः कर्तव्यो न
वेति, फलस्य सिद्धत्वान्नेतिपक्षव्यवच्छेदाय "मद्वार्तायातयामानां न बन्धाय गृहा मताः" (श्रीम-
द्भाग. ४.३०.१९.) इतिवाक्याद् बन्धकत्वेन त्याज्य इतिपक्षव्यवच्छेदाय च तुशब्दः, भावमात्रे
साक्षात्प्रभुसम्बन्धे चोभयथापि गृहाद् बहिर्गमनं गृहत्याग इति यावत्, स आवश्यकः, तत्र
प्रमाणमाह स्मृतेरित्यादि, "त्वं तु सर्वं परित्यज्य स्नेहं स्वजनबन्धुषु मय्यावेश्य मनः सम्यक्
समदृग् विचरस्व गा" (श्रीमद्भाग. ११.७.६.) मित्यादिस्मृतिर्भगवद्भाववतस्तत्सङ्गविशिष्टस्यापि
बहिर्गमनमाह, तदाचारोपि तथैव श्रूयतेतस्तथा, अत्रायमाशयः, आश्रमधर्मत्वेन गृहत्यागो "यदह-
रेव" (जाबा. ४.) त्यादिश्रुतिभ्यः पूर्वमुपपादितोपि यदधुना पुनरुच्यते तेन तदतिरिक्तोयमिति
ज्ञायते, तथा चोक्तवाक्यान्मुमुक्षुमुक्तिप्रतिबन्धकत्वाभावेपि व्यासङ्गस्यात्रावश्यकत्वादुक्तोभयोरप्य-
नवरतं प्रभुरसास्वादे प्रतिबन्धकत्वेन तस्य तत्त्यागस्य विप्रयोगरसानुभावकत्वेन च स कर्तव्यो यद्यपि
स्वेष्टान्तरायत्वेन स्वत एव तत्त्यागो भावी तथा "प्याश्रमादाश्रमं गच्छे" (श्रीमद्भाग. ११.१७.३८.)
दितिवाक्यादत्राश्रमान्तरत्वाभावेन त्यागस्याविहितत्वशङ्काभावायेयमुक्तिरिति ॥ ४२ ॥

स्वामिनः फलश्रुतेरित्यात्रेयः ॥ ४३ ॥

पुष्टिमार्गीयभक्तस्य विहितत्वादिज्ञानमप्रयोजकं, तत्र हेतुस्तस्य भक्तिमार्गस्वामिनः
श्रीगोकुलेशादेव फलस्य श्रुतेरतो बहिर्गमनं न साधनत्वेनात्र कार्यमितिभावः, अत्र "यमेवैष
वृणुते" (मुण्ड. ३.२.३.) इतिश्रुतिरनुसन्धेया, एतदनुपदमेव पठ्यते "नायमात्मा बलहीनेन
लभ्य" (मुण्ड. ३.२.४.) इति, अत्र भगवद्वरणानन्तरमपि जीवबलं कतमं यदपेक्षा भगवल्लाभ
इतिजिज्ञासायां सर्वात्मभाव एव 'बल'मिति निर्णीयते, तस्यैव मर्यादाबलोपमर्दकत्वाद् भगवद्वशी-
कारहेतुत्वाच्च व्रजसीमन्तिनीनां प्रभुवचनातिक्रममपि कृत्वा स्वरूपपरिग्रहस्त'द्बले'नैव यत इत्यात्रेय

वर्गनरकेष्वपि तुल्यार्थदर्शिनः', अशनवदितिसूत्रभागार्थमाहुर्भक्तिमार्ग इत्यादिना, अशनवद् भगवत्सम्बन्धिसर्व-
भोगाशनवदित्यर्थः ॥ ४१ ॥ ५ ॥

॥ इति तृतीयचतुर्थे पञ्चमाधिकरणम् ॥ ५ ॥

बहिस्तूभयथापि स्मृतेराचाराच्च ॥ ४२ ॥ सूत्रमवतारयन्त्यथेत्यादिना, संशयमाहुः प्रचुरेत्यादिना,
फलस्य भगवद्भावभगवत्साक्षात्कारान्यतररूपफलस्य, नेतीति, गृहत्यागो न कर्तव्य इत्यर्थः, व्यवच्छेदाय चेति
चकारेण फलस्य सिद्धत्वाच्च त्याग इतिपक्षसमुच्चयः, तत्सङ्गो भगवद्भाववतः सङ्गः, तदाचारोपि स्मृत्योपदिष्टस्या-
चारोपि, तथैवोपदेशानुसारेणैव, तथा त्यागावश्यकता, अत्र त्यागे, पूर्वमूर्ध्वरेत.सूत्रे, व्यासङ्गस्य लौकिकव्यासङ्गस्य,
अत्र गृहस्थितौ, उक्तोभयोः केवलभाववत्साक्षाद्भोगवतोः, तस्योक्तविधभक्तयोस्तत्त्यागस्य, चकारोप्यर्थः, तथा च
मनिबन्धकाभावेपि रसास्वादायावश्यक इत्यर्थः, स्वेष्टान्तरायत्वेन गृहस्योक्तरसभोगान्तरायत्वेनेत्यर्थः, अत्र गृह-
स्थितौ, सूत्रकारस्येयमुक्तिरित्यर्थः ॥ ४२ ॥

स्वामिनः फलश्रुतेरित्यात्रेयः ॥ ४३ ॥ सूत्रमवतारयन्ति पुष्टीत्यादिना, अप्रयोजकं स्वकर्तव्ये विहितत्व-
ज्ञानं न प्रयोजकमित्यर्थः, तस्य पुष्टिमार्गीयभक्तस्य, अत्र पुष्टिमार्गीयभक्ते, अत्र स्वामिसकाशादेव फललाभे, कतमं

---

१. तदीय° कगो। २. मन्यते मपागो। ३. विचार्यते पा। ४. तत्र सर्वत्र। ५. °दिति° कंगो। ६. °मत् यपा। ७. °पेक्षो ब।

आचार्यो मनुते, इदमत्राभिप्रेतं, सर्वात्मभावस्य यद् बलं तत् तदात्मकस्य प्रभोरेव, तस्य चायं स्वभावो यदन्यन्न रोचतेत एव व्रजपरिवृढवदनेन्दुवचनकिरणप्रचारप्रोच्छलत्केवलभावाम्भोधिवचनवीचयो गीयन्ते "यर्ह्यम्बुजाक्ष तव पादतलमस्माक्षम तत्प्रभृति नान्यसमक्षं स्थातुं पारयाम" (श्रीमद्भाग. १०.२९.३६.) इत्यादयः, अतस्त्यागस्तु पृष्ठलग्न एवायातीति न तदर्थं यतनीयमिति, विष्ण्ववतारत्वेन पुरुषोत्तमभावस्वरूपज्ञोयमिति तथा ॥ ४३ ॥

आर्त्विज्यमित्यौडुलोमिस्तस्मै हि परिक्रीयते ॥ ४४ ॥

सर्वत्यागपूर्वकं यद् बहिः प्रभुसमीपगमनं भक्तस्य तदार्त्विज्यमृत्विक्कर्मैवेत्यौडुलोमिराचार्यो मन्यते, तस्यायमभिसन्धिः, यजमानो हि स्वेष्टसिद्ध्यर्थमृत्विज आदौ वृणुते, प्रकृते च "यमेवैष वृणुत" (कठ.२.२३.) इतिश्रुते"स्तस्मादेकाकी न रमत" (बृह. ३.४.३.) इतिश्रुतेश्च स्वक्रीडार्थं भगवान् स्वचिकीर्षिततत्तल्लीलानुरूपान् जीवान् वृणुते "यूनः स्थविरान् वे" (आप. श्रौत.) तिविकल्पादेकरूपाणां यथा सोमादिषु वरणं तथा सर्वात्मभाववत्त्वेनैकरूपाणामेवात्र वरणं, तत्र यथा स्वीयस्वीयतदङ्गमात्रकरणं तेषां तथेतरसम्बन्धनिवर्तनपूर्वकं तद्भोग्यसमर्पकत्वमत्र, तदुक्तं भगवता "यदा पुमांस्त्यक्तसमस्तकर्मा निवेदितात्मा विचिकीर्षितो म" (श्रीमद्भाग. ११.२९.३४.) इति, अत्र पूर्वपदेनेतरसम्बन्धनिवर्तनोक्त्या सर्वात्मभाव उक्तो भवति, तदनन्तरमात्मनिवेदने सत्येतद्विषयकलीलाकरणेच्छाविषयः स भवति, अन्तरङ्गलीलाप्रवेशनमिच्छायां विशेषस्तस्मात् सुष्ठूक्तमार्त्विज्यमिति, एतेन "न ददाति न पचती" (आप. श्रौ. १०.१४.६.७.) त्यादिश्रुतेर्यथा सोमादौ दीक्षितस्य तद्यागेतरधर्मनिवृत्तिः स एव परमो धर्मो यतस्तथा पुरुषोत्तमस्योक्तभक्तैः सह रमणमेव सार्वदिकमेतदेव च महन्महत्त्वमिति सूचितं भवति, प्रकृते भक्तानामृत्विक्त्वेन निरूपणे हेतुत्वेन तात्पर्यान्तरमप्याह तस्मै यजमानारब्धकर्मसाङ्गत्वाय ऋत्विक् परिक्रीयते वरणेन स्वकार्यमात्रोपयोगित्वाय स्वीयः क्रियते, तथा प्रकृतेपि, न च "कच्चित् कल्याण्यो दक्षिणा" (आप. श्रौत.) इतिप्रश्नवचनात् तदर्थैव तत्प्रवृत्तिरत्र तु स्वतःपुरुषार्थत्वेन भगवदर्था प्रवृत्तिरतो वैषम्यमिति वाच्यं, नीरागस्यापि वरणसमये तत्प्रश्नस्यावश्यकत्वात् तथैव दक्षिणादानमपि, अन्यथा निरङ्गत्वापत्तेः, प्रकृतेपि भक्तानां स्नेहादेव प्रवृत्तिर्भगवान् स्वानुभवार्थमेवताननुभावयतीति न वैषम्यम् ॥ ४४ ॥

किंरूपमित्यर्थः, तस्य सर्वात्मभावस्य, अन्यद्भगवदतिरिक्तं, पृष्ठलग्न एव सर्वात्मभावस्य पृष्ठलग्न एव, एवकारेण कर्तृताव्यवच्छेदः, नन्वेतावज्ज्ञानमात्रेयस्य कुत इत्याकाङ्क्षायामाहुर्विष्ण्ववतारत्वेनेत्यादि, अत्रये भगवता वरदानाद् विष्ण्ववतारूप एवात्रेयो जात इत्यर्थः, तथा पुष्टिभावाभिज्ञः ॥ ४३ ॥

आर्त्विज्यमित्यौडुलोमिस्तस्मै हि परिक्रीयते ॥ ४४ ॥ एकरूपाणां यौवनत्ववतां स्थविरत्ववतां वैकधर्मवतां वरणमित्यर्थः, तत्र सोमादौ, अत्र पुष्टौ वृते, तदुक्तमिति 'यदा पुमा'निति वाक्यमेकादशस्कन्धीयैकोनत्रिंशदध्याये भगवतोक्तं, अत्रैतद्वाक्ये, एतद्विषयको निवेदनवाक्यविषयकः, स आत्मनिवेदनकर्ता, अन्तरङ्गेत्यादि, तथा च 'विचिकीर्षितो म' इत्यत्र व्युपसर्गेणेच्छायां विशेषलाभः, रमणमेवेत्येवकारेण सोमयजमानस्येव भगवतोपीतरकरणं व्यवच्छिद्यते, एतदेव रमणकरणमेव, आह सूत्रकार आह, तथा प्रकृतेपि स्वकीयसाङ्गलीलानिष्पादनार्थं भगवतापि भक्ता व्रियन्त इत्यर्थः, तदर्थैव तत्प्रवृत्तिर्दक्षिणार्थैव यज्ञादौ प्रवृत्तिरित्यर्थः, अत्र तु भक्तानां वरणस्थले तु, वैषम्यमत्र दक्षिणाभावाद् वैषम्यं, नीरागस्यापि यागे दक्षिणामनिच्छतोपि, प्रश्नस्य 'कच्चित् कल्याण्यो दक्षिणा' इतिप्रश्नस्यावश्यकत्वात्, प्रकृतेपीत्यादि, तथा च यथा वैधत्वमेव प्रश्नादिप्रयोजकं तथात्र स्नेह एव भक्तानां निरुपाधिकः प्रयोजकः, तत्र यथा दक्षिणादानेन कर्मसाङ्गता तथात्र भक्तानां साङ्गतेति न वैषम्यमित्यर्थः ॥ ४४ ॥

---

१. अन्यत्रेति पाठोऽशुद्ध एव । २. इवा° सर्वत्र । ३. सर्वात्मभावत्वेन क्वचित् । ४. °सम्बन्धि° क्वचित् । ५. तद्वि° सर्वत्र । ६. सम्भवति क्वचित् । ७. विषय इति पाठोऽशुद्ध एव । ८. कच्चिदिति पाठोऽशुद्ध एव ।

श्रुतेश्च ॥ ४५ ॥

आथर्वणोपनिषत्सु पठ्यते "भक्तिरस्य भजनं तदिहामुत्रोपाधिनैराश्येनैवामुष्मिन् मनःकल्पन-
तदेव च नैष्कर्म्यं" (गो. पू. ता. १.) मिति[1] ।
भक्तिमार्गप्रचारैकहृदयो बादरायणः । मानं भागवतं तत्र तेनैवं ज्ञेयमुत्तमैः ॥ १ ॥ ४५ ॥ ६ ॥
॥ इति तृतीयाध्याये चतुर्थपादे षष्ठं बहिस्तूभयथेत्यधिकरणम् ॥ ६ ॥
ननु (कठोप. २. २२.) "यमेवे"तिश्रुतिः साधनान्तरनिषेधपूर्वकं वरणस्यैव साधनत्वमाह
(बृ. ६. ४. २३.) "तस्मादेवंविच्छान्तो दान्त उपरतस्तितिक्षुः श्रद्धावित्तो भूत्वात्मन्येवात्मानं
पश्ये"दितिश्रुतिः साधनान्तरमप्याह, एवं विरोधे श्रुतित्वाविशेषात् किमादरणीयं किं नेतिसंशये
साधनान्तरविधिरेवादरणीयोन्यथा शास्त्रवैयर्थ्यं स्यादिति प्राप्त उच्यते सहकार्यन्तरविधिरिति ।

सहकार्यन्तरविधिः पक्षेण तृतीयं तद्वतो विध्यादिवत् ॥ ४६ ॥

सहकार्यन्तरविधिस्तु मर्यादापक्षेणोच्यते
मर्यादापुष्टिभेदेन वरणं द्विधोच्यते, तत्र सहकार्यन्तरविधिस्तु मर्यादापक्षेणोच्यते
पुष्टौ तु नान्यापेक्षेति न विरोधगन्धोपि, अपरं च, साधनं हि कायिकं वाचिकं[3] मानसिकं च
विधीयते, तत्र (कठोप ४.११.) "मनसैवाप्तव्य"मितिश्रुतेस्तृतीयं मुख्यं, तदपि तावदेव मार्यादिक-
स्यापि विधेयत्वेन कर्तव्यं यावत् स्नेहो न भवति, यतस्तद्वतः स्नेहवतस्तूक्तं तृतीयं साधनमपि
विध्यादिवत्, यथा तद्वतो विधिरर्थवादो वा प्रवृत्तावप्रयोजकस्तस्य स्वत एव सम्भवात् तथा
भगवत्प्राप्ताविदमित्यर्थं कैमुतिकन्यायेन पूर्वयोरप्रयोजकत्वमेतच्छेषत्वादेवायास्यतीति तृतीय-
मेवोक्तम् ॥ ४६ ॥ ७ ॥
इति तृतीयाध्याये चतुर्थपादे सप्तमं सहकार्यन्तराधिकरणम् ॥ ७ ॥
ननु (ब्र. सू. ३. ४. ४३.) "बहिस्तूभयथे" त्यादिना भगवदीयस्य गृहत्याग आवश्यक इति
निरूपितं, छान्दोग्ये (छान्दो. १०. १५. १.) त्वा"चार्यकुला" दित्युपक्रम्य छान्दोग्योपनिषदन्त
"आचार्यकुलाद् वेदमधीत्य गुरोः कर्मातिशेषेणाभिसमावृत्य कुटुम्बे शुचौ देशे स्वाध्यायमधीयानो
धार्मिकान् विदधत् आत्मनि सर्वेन्द्रियाणि सम्प्रतिष्ठाप्याहिंसन्[6] सर्वाणि भूतान्यन्यत्र तीर्थेभ्यः स

श्रुतेश्च ॥४५॥ सूत्रं विवृण्वन्त्याथर्वणेत्यादिना, 'भक्तिरस्य भजन'मितिश्रुतिः, तद् भजनं, अमुष्मिन् भग-
वति, मानं भागवतं तत्रावैधव्रजसीमन्तिनीनां सख्यासे वैधोद्धवादिसख्यासे च श्रीभागवतं प्रमाणमित्यर्थः ॥४५॥६॥
॥ इति तृतीयचतुर्थे षष्ठमधिकरणम् ॥ ६ ॥
सहकार्यन्तरविधिः पक्षेण तृतीयं तद्वतो विध्यादिवत् ॥ ४६ ॥ भक्तिमार्गीयस्य प्रदर्शितगृहत्याग-
समानतया श्रुत्युक्तशमदमादिकमपि कर्तव्यत्वेन प्रसक्तं भवत्यतोधिकरणमवतारयन्ति नन्वित्यादिना, उच्यते सूत्रेण
सिद्धान्त उच्यते, नान्यापेक्षा 'यमेवे'तिश्रुत्या 'नायमात्मे'तिश्रुतिविरोधान्नान्यापेक्षेतिभाव इत्यर्थः, तदपि मानसिक-
मपि, तद्वतो भगवति प्रेमवतः, तस्य भगवदनुकूलभक्तेष्टसाधकप्रवृत्तिमात्रस्य, स्वत एव स्नेहत एव, तथा
विध्यर्थवादाविव, इदं श्रुतिबोधितशमदमादिकमप्रयोजकमिति विभक्तिविपरिणामेन पूर्वान्वयीत्यर्थः, पूर्वयोः
कायिकवाचनिकयोः, एतन्मानसिकम् ॥ ४६ ॥ ७ ॥
॥ इति तृतीयचतुर्थे सप्तमाधिकरणम् ॥ ७ ॥
पूर्वाधिकरणोक्तभक्तिमार्गं दृढीकर्तुं किञ्चिदाशङ्क्य समाधातुं
कृत्स्नभावात् तु गृहिणोपसंहारः ॥ ४७ ॥ 'आचार्यकुलादि'त्यादिश्रुत्यर्थस्तु-आचार्यकुलाद् गुरुकुलाद्
सूत्रमिदमित्यधिकरणमवतारयन्ति नन्वित्यादिना, कुलपदं, वेदमधीत्य गुरोः कर्मातिशेषेण
गुर्वभावे तत्पदयां तत्पुत्रे तद्गोत्रे वा ब्रह्मचर्यं समावर्तनीयमिति ज्ञापयितुं कुलपदं, वेदाध्ययनं साङ्गं रहस्यार्थज्ञानपुरःसरं
गुरोः सेवारूपं यत् कर्म तत् कृत्वा ततोतिशेषोवशेषो यः कालस्तेन कालेन वेदाध्ययनं साङ्गं रहस्यार्थज्ञानपुरःसरं
सम्पाद्याभिसमावृत्य जिज्ञासाद्वयसमापनोत्तरमाचार्यकुलान्निवृत्य दारानाहृत्य कुटुम्बे स्थित्वा गार्हस्थ्यविहिते कर्मणि
तिष्ठन् शुचौ देशे वेदमधीयानो विविक्तस्वाध्यायब्राह्मणोदितप्रकारे पवित्रे देशे यथावदासीन आवृत्तिमधीतस्य कुर्वन्

१. ज्ञातं कपुपुंगो । २. °श्रुतेश्च कं । ३. वाचनिकं कपु । ४. °ति° सर्वेष्यादर्शाः । ५. °तू° सर्वेष्या-
दर्शाः । ६. °स° सर्वेष्यादर्शाः ।

आचार्यो मनुते, इदमत्राभिप्रेतं, सर्वात्मभावस्य यद् बलं तत् तदात्मकस्य प्रभोरेव, तस्य चायं स्वभावो यदन्यत्र रोचतेत एव व्रजपरिवृढवदनेन्दुवचनकिरणप्रचारप्रोच्छलत्केवलभावाम्भोधिघनवीचयो गीयन्ते "यर्ह्यम्बुजाक्ष तव पादतलमस्प्राक्ष्म तत्प्रभृति नान्यसमक्षं स्थातुं पारयाम" (श्रीमद्भाग. १०.२९.३६.) इत्यादयः, अतस्त्यागस्तु पृष्ठलग्न एवायातीति न तदर्थं यतनीयमिति, विष्ण्ववतारत्वेन पुरुषोत्तमभावस्वरूपज्ञोयमिति तथा ॥ ४३ ॥

आर्त्विज्यमित्यौडुलोमिस्तस्मै हि परिक्रीयते ॥ ४४ ॥

सर्वत्यागपूर्वकं यद् बहिः प्रभुसमीपगमनं भक्तस्य तदार्त्विज्यमृत्विक्कर्मैवेत्यौडुलोमिराचार्यो मन्यते, तस्यायमभिसन्धिः, यजमानो हि स्वेष्टसिद्ध्यर्थमृत्विज आदौ वृणुते, प्रकृते च "यमेवैष वृणुत" (कठ.२.२३.) इतिश्रुते"स्तस्मादेकाकी न रमत" (बृह. ३.४.३.) इतिश्रुतेश्च स्वक्रीडार्थं भगवान् स्वचिकीर्षिततत्तल्लीलानुरूपान् जीवान् वृणुते "यूनः स्थविरान् वै" (आप. श्रौत.) तिविकल्पादेकरूपाणां यथा सोमादिषु वरणं तथा सर्वात्मभाववत्त्वेनैकरूपाणामेवात्र वरणं, तत्र यथा स्वीयस्वीयतदङ्गमात्रकरणं तेषां तथेतरसम्बन्धनिवर्तनपूर्वकं तद्भोग्यसमर्पकत्वमत्र, तदुक्तं भगवता "यदा पुमांस्त्यक्तसमस्तकर्मा निवेदितात्मा विचिकीर्षितो मे" (श्रीमद्भाग. ११.२९.३४.) इति, अत्र पूर्वपदेनेतरसम्बन्धनिवर्तनोक्त्या सर्वात्मभाव उक्तो भवति, तदनन्तरमात्मनिवेदने सत्येतद्विषयकलीलाकरणेच्छाविषयः स भवति, अन्तरङ्गलीलाप्रवेशनमिच्छायां विशेषस्तस्मात् सुष्ठूक्तमार्त्विज्यमिति, एतेन "न ददाति न पचती" (आप. श्रौ. १०.१४.६.७.) त्यादिश्रुतेर्यथा सोमादौ दीक्षितस्य तद्यागेतरधर्मनिवृत्तिः स एव परमो धर्मो यतस्तथा पुरुषोत्तमस्योक्तभक्तैः सह रमणमेव सार्वदिकमेतदेव च महन्महत्त्वमिति सूचितं भवति, प्रकृते भक्तानामृत्विक्त्वेन निरूपणे हेतुत्वेन तात्पर्यान्तरमप्याह तस्मै यजमानारब्धकर्मसाङ्गत्वाय ऋत्विक् परिक्रीयते वरणेन स्वकार्यमात्रोपयोगित्वाय स्वीयः क्रियते, तथा प्रकृतेपि, न च "कच्चित् कल्याण्यो दक्षिणा" (आप. श्रौत.) इतिप्रश्नवचनात् तदर्थैव तत्प्रवृत्तिरत्र तु स्वतःपुरुषार्थत्वेन भगवदर्था प्रवृत्तिरतो वैषम्यमिति वाच्यं, नीरागस्यापि वरणसमये तत्प्रश्नस्यावश्यकत्वात् तथैव दक्षिणादानमपि, अन्यथा निरङ्गत्वापत्तेः, प्रकृतेपि भक्तानां स्नेहादेव प्रवृत्तिर्भगवान् स्वानुभवार्थमेवताननुभावयतीति न वैषम्यम् ॥ ४४ ॥

किंरूपमित्यर्थः, तस्य सर्वात्मभावस्य, अन्यद्भगवदतिरिक्तं, पृष्ठलग्न एव सर्वात्मभावस्य पृष्ठलग्न एव, एवकारेण कर्तृताव्यवच्छेदः, नन्वेतावज्ज्ञानमात्रेयस्य कुत इत्याकाङ्क्षायामाहुर्विष्ण्ववतारत्वेनेत्यादि, अत्रये भगवता वरदानाद् विष्ण्ववताररूप एवात्रेयो जात इत्यर्थः, तथा पुष्टिभावाभिज्ञः ॥ ४३ ॥

आर्त्विज्यमित्यौडुलोमिस्तस्मै हि परिक्रीयते ॥ ४४ ॥ एकरूपाणां यौवनत्ववतां स्थविरत्ववतां वैकधर्मवतां वरणमित्यर्थः, तत्र सोमादौ, अत्र पुष्टौ वृते, तदुक्तमिति 'यदा पुमा'निति वाक्यमेकादशस्कन्धीयैकोनत्रिंशदध्याये भगवतोक्तं, अत्रैतद्वाक्ये, एतद्विषयको निवेदनवाक्यविषयकः, स आत्मनिवेदनकर्ता, अन्तरङ्गेत्यादि, तथा च 'विचिकीर्षितो मे' इत्यत्र व्युपसर्गेणेच्छायां विशेषलाभः, रमणमेवेत्येवकारेण सोमयजमानस्येव भगवतोपीतरकरणं व्यवच्छिद्यते, एतदेव रमणकरणमेव, आह सूत्रकार आह, तथा प्रकृतेपि स्वकीयसाङ्गलीलानिष्पादनार्थं भगवतापि भक्ता व्रियन्त इत्यर्थः, तदर्थैव तत्प्रवृत्तिर्दक्षिणार्थैव यज्ञादौ प्रवृत्तिरित्यर्थः, अत्र तु भक्तानां वरणस्थले तु, 'वैषम्यमत्र दक्षिणाभावाद् वैधर्म्यं, नीरागस्यापि यागे दक्षिणामनिच्छतोपि, प्रश्नस्य 'कच्चित् कल्याण्यो दक्षिणा' इतिप्रश्नस्यावश्यकत्वात्, प्रकृतेपीत्यादि, तथा च यथा वैधत्वमेव प्रश्नादिप्रयोजकं तथात्र स्नेह एव भक्तानां निरुपाधिकः प्रयोजकः, तत्र यथा दक्षिणादानेन कर्मसाङ्गता तथात्र भक्तानां साङ्गतेति न वैषम्यमित्यर्थः ॥ ४४ ॥

---

१. अन्यत्रेति पापाठोशुद्ध एव । २. इवा° सर्वत्र । ३. सर्वात्मभावत्वेन कपु । ४. °सम्बन्धि° कैगो । ५. तद्वि° सर्वत्र । ६. सम्भवति कवपागो । ७. विषय इति पापाठोशुद्ध एव । ८. क्वचिदिति पापाठोशुद्ध एव ।

मौनवदितरेषामप्युपदेशात् ॥ ४८ ॥

मौनपदमनीहानिलायामादित्रिदण्डिधर्मोपलक्षकं, यथा वागिन्द्रियमात्रदेहमात्रचित्त-
नियामकास्ते धर्मा उक्ता न्यासिनस्तथैतरेषामपीन्द्रियनियामकानां धर्माणा "मात्मनि सर्व-
... सम्प्रतिष्ठाप्ये" तिश्रुत्या गृहिण उपदिश्यन्त इति युक्तो "गृहिणोपसंहार" इत्यर्थः,
नियमनमात्रमत्र तु भगवति विनियोगादाधिक्यमितिभावः, वस्तुतस्तु केवलनियमन-
साप्रयोजकत्वात् तत्रापि भगवति विनियोग एव तात्पर्यमिति ज्ञेयम् ॥ ४८ ॥

ननु भगवति सर्वेन्द्रियविनियोगात् "गृहिणोपसंहार" इति न युज्यते "शुचौ देशे
स्वाध्यायमधीयान" इत्यादिकर्ममार्गीयसाधनश्रुतेरित्याशङ्क्य तत्तात्पर्यमाहानाविःकुर्वन्निति ।

अनाविःकुर्वन्नन्वयात् ॥ ४९ ॥

भगवद्भावस्य रसात्मकत्वेन गुप्तस्यैवाभिवृद्धिस्वभावकत्वादाश्रमधर्मैरेव लोके स्वं भगवद्भाव-
मनाविःकुर्वन् भजेतेत्येतदाशयेन ते धर्मा उक्ताः, गोपने मुख्यं हेतुमाहान्वयादिति, यतो
भगवता सममन्वयं सम्बन्धं प्राप्य वर्ततेतो हेतोस्तथा, अत्र ल्यब्लोपे पञ्चमी, एतेन यावदन्तः-
करणे साक्षात्प्रभोः प्राकट्यं नास्ति तावदेव बहिराविःकरणं भवति प्राकट्ये तु न तथा सम्भव-
तीति ज्ञापितम् ॥ ४९ ॥

वैदिककर्मकरणे तात्पर्यमुक्त्वा लौकिकस्यानावश्यकत्वेपि तत्समयमाह ।

ऐहिकमप्रस्तुतप्रतिबन्धे तद्दर्शनात् ॥ ५० ॥

प्रस्तुतं प्रभुभजनं तत्प्रतिबन्धासम्भव एवैहिकं कर्म कार्यं, नन्वैहिकं कर्मास्तु मा वात-
त्तत्समयोक्तिर्व्यर्थेत्याशङ्क्याह तद्दर्शनादिति, (छान्दो. १०. १५. १.) "आचार्यकुला" दित्युप-
क्रम्याग्रे पठ्यते "धार्मिकान् विदधदि" ति, अतो धार्मिकपुत्रविधानमैहिकं कर्म श्रुतौ दृश्यते-
ततत्समयोक्तिरावश्यकी, अन्यथा श्रुतावुक्तमस्तीति प्रस्तुतबाधेपि तत्करणे फलप्रतिबन्धः
स्यादितिभावः ॥ ५० ॥ ८ ॥

॥ इति तृतीयाध्याये चतुर्थपादेष्टमं गृहिणोपसंहार इत्यधिकरणम् ॥ ८ ॥

ननु (छान्दो. ८. १४. २.) "तस्य तावदेव चिरं यावन्न विमोक्ष्येथ सम्पत्स्य" इतिश्रुतौ
मुक्त्यनन्तरं ब्रह्मसम्पत्तिः श्रूयते, सा तु पुरुषोत्तमसङ्गे लीलारसानुभवातिरिक्ता वक्तुमशक्या
(ब्र. सू. १. ३. २.) "मुक्तोपसृप्यव्यपदेशात्" (श्रीमद्भा. ६. १४. १५.) "मुक्तानामपि सिद्धानां
नारायणपरायणः सुदुर्लभः प्रशान्तात्मा कोटिष्वपि महामुन" इतिस्मृतेश्च मुक्तेः फलं भक्तिरसानु-
भव एव, एवं सत्युक्तगृहिणस्तत् फलं भवति नवेति संशये निर्णयमाह ।

संहारः कृतो ब्रह्मप्राप्त्यन्तसाधनकलापस्य गृहस्थ उपसंहारः कृत, तत्र न्यासिनि, अत्र तु गृहिणि तु, तत्रापि
न्यासिन्यपि, तथा चात्र त्रयाणां भगवति विनियोगेपि न सर्वेन्द्रियाणां भगवति विनियोग इति गृहिण्येवोपसंहारः
फलित. ॥ ४८ ॥

अनाविःकुर्वन्नन्वयात् ॥ ४९ ॥ सूत्रमवतारयन्ति नन्वित्यादिना, आश्रमधर्मैरिति करणे तृतीया,
अनाविःकुर्वन् प्रच्छन्नीकुर्वन्, ते धर्मा आश्रमधर्माः प्रच्छादनार्थमुक्ता इत्यर्थः, तथाश्रमधर्मा आच्छादनार्थाः,
अत्रान्वयादितिसूत्रभागे, बहिराविःकरणमाश्रमधर्माणां बहिराविःकरणम् ॥ ४९ ॥

ऐहिकमप्रस्तुतप्रतिबन्धे तद्दर्शनात् ॥ ५० ॥ तत्समयो लौकिककर्तव्यकालः, अन्यथा सूत्रकारेण
प्रस्तुताबाधेन लौकिककरणस्यानुक्तौ ॥ ५० ॥ ८ ॥

॥ इति तृतीयचतुर्थेष्टमाधिकरणम् ॥ ८ ॥

एवं मुक्तिफलानियमस्तदवस्थावधृतेस्तदवस्थावधृतेः ॥ ५१ ॥ अधिकरणमवतारयन्ति नन्वित्यादिना,

---

१. ०ल० पा । २. समन्वयं पा । ३. ०व्यप्र० क । ४. प्रस्तुतं प्रभुभजनमित्यधिकं वैयपागो । ५. छत्तं कपु ।